मालिनीविजयोत्तरतन्त्रम्

# Mālinīvijayōttaratantram

(Malini Vijaya Uttara Tantra – cov version)

## सृष्ट्यधिकारः प्रथमः १ ॥

अथ मालिनीविजयोत्तरे तन्त्रे प्रथमोऽधिकारः।

atha Mālinīvijayottare tantre prathamo'dhikāraḥ|

जयन्ति जगदानन्दविपक्षक्षपणक्षमाः।

परमेशमुखोद्भूतज्ञानचन्द्रमरीचयः॥ १.१॥

jayanti jagadānandavipakṣakṣapaṇakṣamāḥ|
paramēśamukhōdbhūtajñānacandramarīcayaḥ||1.1||

जगदर्णवमग्नानां तारकं तारकान्तकम्।

सनत्कुमारसनकसनातनसनन्दनाः॥ १.२॥

jagadarṇavamagnānāṁ tārakaṁ tārakāntakam|
sanatkumārasanakasanātanasanandanāḥ||1.2||

नारदागस्त्यसंवर्तवसिष्ठाद्या महर्षयः।

जिज्ञासवः परं तत्त्वं शिवशक्त्युन्मुखीकृताः॥ १.३॥

nāradāgastyasaṁvartavasiṣṭhādyā maharṣayaḥ|
jijñāsavaḥ paraṁ tattvaṁ śivaśaktyunmukhīkṛtāḥ||1.3||

समभ्यर्च्य विधानेन ते तमूचुः प्रहर्षिताः।

भगवन्योगसंसिद्धिकाङ्क्षिणो वयमागताः॥ १.४॥

samabhyarcya vidhānena te tamūcuḥ praharṣitāḥ|
bhagavanyogasaṁsiddhikāṅkṣiṇo vayamāgatāḥ||1.4||

सा च योगं विना यस्मान्न भवेत्तमतो वद।

ऋषिभिर्योगमिच्छद्भिः स तैरेवमुदाहृतः॥ १.५॥

sā ca yōgaṁ vinā yasmān na bhavēttamatō vada|
ṛṣibhiryogamicchadbhiḥ sa tairevamudāhṛtaḥ||1.5||

प्रत्युवाच प्रहृष्टात्मा नमस्कृत्य महेश्वरम्।

श्रृणुध्वं सम्प्रवक्ष्यामि सर्वसिद्धिफलप्रदम्॥ १.६॥

pratyuvāca prahṛṣṭātmā namaskṛtya maheśvaram|
śṛṇudhvaṁ sampravakṣyāmi sarvasiddhiphalapradam||1.6||

मालिनीविजयं तन्त्रं परमेशमुखोद्गतम्।

भुक्तिमुक्तिप्रदातारमुमेशममरार्चितम्॥ १.७॥

mālinīvijayaṁ tantraṁ parameśamukhodgatam|
bhuktimuktipradātāramumeśamamarārcitam||1.7||

स्वस्थानस्थमुमा देवी प्रणिपत्येदमब्रवीत्।

सिद्धयोगीश्वरीतन्त्रं नवकोटिप्रविस्तरम्॥ १.८॥

svasthānasthamumā devī praṇipatyedamabravīt|
siddhayogīśvarītantraṁ navakoṭipravistaram||1.8||

यत्त्वया कथितं पूर्वं भेदत्रयविसर्पितम्।

मालिनीविजये तन्त्रे कोटित्रितयलक्षिते॥ १.९॥

yattvayā kathitaṁ pūrvaṁ bhedatrayavisarpitam|
mālinīvijaye tantre koṭitritayalakṣite||1.9||

योगमार्गस्त्वया प्रोक्तः सुविस्तीर्णो महेश्वर।

भूयस्तस्योपसंहारः प्रोक्तो द्वादशभिस्तथा॥ १.१०॥

yogamārgastvayā proktaḥ suvistīrṇo maheśvara|
bhūyastasyopasaṁhāraḥ prokto dvādaśabhistathā||1.10||

सहस्रैः सोऽपि विस्तीर्णो गृह्यते नाल्पबुद्धिभिः।

अतस्तमुपसंहृत्य समासादल्पधीहितम्॥ १.११॥

sahasraiḥ so'pi vistīrṇo gṛhyate nālpabuddhibhiḥ|
atastamupasaṁhṛtya samāsādalpadhīhitam||1.11||

सर्वसिद्धिकरं ब्रूहि प्रसादात्परमेश्वर।

एवमुक्तस्तदा देव्या प्रहस्योवाच विश्वराट्॥ १.१२॥

sarvasiddhikaraṁ brūhi prasādātparameśvara|
evamuktastadā devyā prahasyovāca viśvarāṭ||1.12||

शृणु देवि प्रवक्ष्यामि सिद्धयोगीश्वरीमतम्।

यन्न कस्यचिदाख्यातं मालिनीविजयोत्तरम्॥ १.१३॥

śṛṇu devi pravakṣyāmi siddhayogīśvarīmatam|
yanna kasyacidākhyātaṁ mālinīvijayottaram||1.13||

मयाप्येतत्पुरा प्राप्तमघोरात्परमात्मनः।

उपादेयं च हेयं च विज्ञेयं परमार्थतः॥ १.१४॥

mayāpyetatpurā prāptamaghorātparamātmanaḥ|
upādeyaṁ ca heyaṁ ca vijñeyaṁ paramārthataḥ||1.14||

शिवः शक्तिः सविद्येशा मन्त्रा मन्त्रेश्वराणवः।

उपादेयमिति प्रोक्तमेतत्षट्कं फलार्थिनाम्॥ १.१५॥

śivaḥ śaktiḥ savidyeśā mantrā mantreśvarāṇavaḥ|
upādeyamiti proktametatṣaṭkaṁ phalārthinām||1.15||

मलः कर्म च माया च मायीयमखिलं जगत्।

सर्वं हेयमिति प्रोक्तं विज्ञेयं वस्तु निश्चितम्॥ १.१६॥

malaḥ karma ca māyā ca māyīyamakhilaṁ jagat|
sarvaṁ heyamiti proktaṁ vijñeyaṁ vastu niścitam||1.16||

एतज्ज्ञात्वा परित्यज्य सर्वसिद्धिफलं लभेत्।

तत्रेशः सर्वकृच्छान्तः सर्वज्ञः सर्वकृत्प्रभुः॥ १.१७॥

etajjñātvā parityajya sarvasiddhiphalaṁ labhet|
tatreśaḥ sarvakṛcchāntaḥ sarvajñaḥ sarvakṛtprabhuḥ||1.17||

सकलो निष्कलोऽनन्तः शक्तिरप्यस्य तद्विधा।

स सिसृक्षुर्जगत्सृष्टेरादावेव निजेच्छया॥ १.१८॥

sakalō niṣkalō:'nantaḥ śaktirapyasya tadvidhā|

sa sisṛkṣurjagatsṛṣṭerādāveva nijecchayā||1.18||

विज्ञानकेवलानष्टौ बोधयामास पुद्गलान्।
अघोरः परमो घोरो घोररूपस्तदाननः॥१.१९॥
vijñānakevalānaṣṭau bodhayāmāsa pudgalān|
aghoraḥ paramo ghoro ghorarūpastadānanaḥ||1.19||

भीमश्च भीषणश्चैव वमनः पिवनस्तथा।
एतानष्टौ स्थितिध्वंसरक्षानुग्रहकारिणः॥१.२०॥
bhīmaśca bhīṣaṇaścaiva vamanaḥ pivanastathā|
etānaṣṭau sthitidhvaṁsarakṣānugrahakāriṇaḥ||1.20||

मन्त्रमन्त्रेश्वरेशत्वे सन्नियोज्य ततः पुनः।
मन्त्राणामसृजत्तद्वत्सप्त कोटीः समण्डलाः॥१.२१॥
mantramantreśvareśatve sanniyojya tataḥ punaḥ|
mantrāṇāmasṛjattadvatsapta koṭīḥ samaṇḍalāḥ||1.21||

सर्वेऽप्येते महात्मानो मन्त्राः सर्वफलप्रदाः।
आत्मा चतुर्विधो ज्ञेयस्तत्र विज्ञानकेवलः॥१.२२॥
sarve'pyete mahātmāno mantrāḥ sarvaphalapradāḥ|
ātmā caturvidho jñeyastatra vijñānakevalaḥ||1.22||

मलैकयुक्तस्तत्कर्मयुक्तः प्रलयकेवलः।
मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्॥१.२३॥
malaikayuktastatkarmayuktaḥ pralayakevalaḥ|
malamajñānamicchanti saṁsārāṅkurakāraṇam||1.23||

धर्माधर्मात्मकं कर्म सुखदुःखादिलक्षणम्।
ईश्वरेच्छावशादस्य भोगेच्छा सम्प्रजायते॥१.२४॥
dharmādharmātmakaṁ karma sukhaduḥkhādilakṣaṇam|
īśvarecchāvaśādasya bhogecchā samprajāyate||1.24||

भोगसाधनसंसिद्ध्यै भोगेच्छोरस्य मन्त्रराट्।

जगदुत्पादयामास मायामाविश्य शक्तिभिः॥१.२५॥

bhogasādhanasaṁsiddhyai bhogecchorasya mantrarāṭ|
jagadutpādayāmāsa māyāmāviśya śaktibhiḥ||1.25||

सा चैका व्यापिनीरूपा निष्कला जगतो निधिः।

अनाद्यन्ताशिवेशानी व्ययहीना च कथ्यते॥१.२६॥

sā caikā vyāpinīrūpā niṣkalā jagatō nidhiḥ|
anādyantāśiveśānī vyayahīnā ca kathyate||1.26||

असूत सा कलातत्त्वं यद्योगादभवत्पुमान्।

जातकर्तृत्वसामर्थ्यो विद्यारागौ ततोऽसृजत्॥१.२७॥

asūta sā kalātattvaṁ yadyogādabhavatpumān|
jātakartṛtvasāmarthyo vidyārāgau tato'sṛjat||1.27||

विद्या विवेचयत्यस्य कर्म तत्कार्यकारणे।

रागोऽपि रञ्जयत्येनं स्वभोगेष्वशुचिष्वपि॥१.२८॥

vidyā vivecayatyasya karma tatkāryakāraṇe|
rāgo'pi rañjayatyenaṁ svabhogeṣvaśuciṣvapi||1.28||

नियतिर्योजयत्येनं स्वके कर्मणि पुद्गलम्।

कालोऽपि कलयत्येनं तुट्यादिभिरवस्थितः॥१.२९॥

niyatiryojayatyenaṁ svake karmaṇi pudgalam|
kālo'pi kalayatyenaṁ tuṭyādibhiravasthitaḥ||1.29||

तत एव कलातत्त्वादव्यक्तमसृजत्ततः।

गुणानष्टगुणां तेभ्यो धियं धीतोऽप्यहङ्कृतम्॥१.३०॥

tata eva kalātattvādavyaktamasṛjattataḥ|
guṇānaṣṭaguṇāṁ tebhyo dhiyaṁ dhīto'pyahaṅkṛtam||1.30||

तत्त्रिधा तैजसात्तस्मात्मनोऽक्षेशमजायत।

वैकारिकात्ततोऽक्षाणि तन्मात्राणि तृतीयकात्॥ १.३१॥

tattridhā taijasāttasmātmano'kṣeśamajāyata|
vaikārikāttato'kṣāṇi tanmātrāṇi tṛtīyakāt||1.31||

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं बुद्धीन्द्रियाणि तु।

कर्मेन्द्रियाणि वाक्पाणिपायूपस्थाङ्घ्रयः क्रमात्॥ १.३२॥

śrotraṁ tvakcakṣuṣī jihvā ghrāṇaṁ buddhīndriyāṇi tu|
karmendriyāṇi vākpāṇipāyūpasthāṅghrayaḥ kramāt||1.32||

कलादिक्षितिपर्यन्तमेतत्संसारमण्डलम्।

समुद्रादि जगत्कृत्स्नं परिवर्तयतीच्छया॥ १.३३॥

kalādikṣitiparyantametatsaṁsāramaṇḍalam|
samudrādi jagatkṛtsnaṁ parivartayatīcchayā||1.33||

भेदः परः कलादीनां भुवनत्वेन यः स्थितः।

असृजत्तमसावेव भोगिनां भोगसिद्धये॥ १.३४॥

bhedaḥ paraḥ kalādīnāṁ bhuvanatvena yaḥ sthitaḥ|
asṛjattamasāveva bhogināṁ bhogasiddhaye||1.34||

इत्यनेन कलाद्येन धरान्तेन समास्थिताः।

पुमांसः सकला ज्ञेयास्तदवस्थाजिघांसुभिः॥ १.३५॥

ityanena kalādyena dharāntena samāsthitāḥ|
pumāṁsaḥ sakalā jñeyāstadavasthājighāṁsubhiḥ||1.35||

अवस्थात्रितयेऽप्यस्मिंस्तिरोभावनशीलया।

शिवशक्त्योभयाक्रान्ताः प्रकुर्वन्ति विचेष्टितम्॥ १.३६॥

avasthātritaye'pyasmiṁstirobhāvanaśīlayā|
śivaśaktyobhayākrāntāḥ prakurvanti viceṣṭitam||1.36||

एवं जगति सवत्र रुद्राणां योग्यतावशात्।

अङ्गुष्ठमात्रपूर्वाणां शतमष्टादशोत्तरम्॥ १.३७॥

evaṁ jagati savatra rudrāṇāṁ yogyatāvaśāt|

aṅguṣṭhamātrapūrvāṇāṁ śatamaṣṭādaśottaram||1.37||

अनुगृह्य शिवः साक्षान्मन्त्रेशत्वे नियुक्तवान्।
ते स्वगोचरमासाद्य भुक्तिमुक्तिफलार्थिनाम्॥ १.३८॥
anugṛhya śivaḥ sākṣānmantreśatve niyuktavān|
te svagocaramāsādya bhuktimuktiphalārthinām||1.38||

ब्रह्मादीनां प्रयच्छन्ति स्वबलेन समं फलम्।
ऋषिभ्यस्तेऽपि ते चानु मन्वन्तेभ्यो महाधिपाः॥ १.३९॥
brahmādīnāṁ prayacchanti svabalena samaṁ phalam|
ṛṣibhyaste'pi te cānu manvantebhyo mahādhipāḥ||1.39||

हेयोपादेयविज्ञानं कथयन्ति शिवोदितम्।
ब्रह्मादिस्तम्बपर्यन्ते जातमात्रे जगत्यलम्॥ १.४०॥
heyopādeyavijñānaṁ kathayanti śivoditam|
brahmādistambaparyante jātamātre jagatyalam||1.40||

मन्त्राणां कोट्यस्तिस्रः सार्धाः शिवनियोजिताः।
अनुगृह्याणुसङ्घातं याताः पदमनामयम्॥ १.४१॥
mantrāṇāṁ koṭyastisraḥ sārdhāḥ śivaniyojitāḥ|
anugṛhyāṇusaṅghātaṁ yātāḥ padamanāmayam||1.41||

एवमस्यात्मनः काले कस्मिंश्चिद्योग्यतावशात्।
शैवी सम्बध्यते शक्तिः शान्ता मुक्तिफलप्रदा॥ १.४२॥
evamasyātmanaḥ kāle kasmiṁścidyogyatāvaśāt|
śaivī sambadhyate śaktiḥ śāntā muktiphalapradā||1.42||

तत्सम्बन्धात्ततः कश्चित्तत्क्षणादपवृज्यते।
अज्ञानेन सहैकत्वं कस्यचिद्विनिवर्तते॥ १.४३॥
tatsambandhāttataḥ kaścittatkṣaṇādapavṛjyate|
ajñānena sahaikatvaṁ kasyacidvinivartate||1.43||

रुद्रशक्तिसमाविष्टः स यियासुः शिवेच्छया।

भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति॥ १.४४॥

rudraśaktisamāviṣṭaḥ sa yiyāsuḥ śivecchayā|
bhuktimuktiprasiddhyarthaṁ nīyate sadguruṁ prati||1.44||

तमाराध्य ततस्तुष्टाद्दीक्षामासाद्य शाङ्करीम्।

तत्क्षणाद्वोपभोगाद्वा देहपाताच्छिवं व्रजेत्॥ १.४५॥

tamārādhya tatastuṣṭāddīkṣāmāsādya śāṅkarīm|
tatkṣaṇādvopabhogādvā dehapātācchivaṁ vrajet||1.45||

योगदीक्षां समासाद्य ज्ञात्वा योगं समभ्यसेत्।

योगसिद्धिमवाप्नोति तदन्ते शाश्वतं पदम्॥ १.४६॥

yogadīkṣāṁ samāsādya jñātvā yogaṁ samabhyaset|
yogasiddhimavāpnoti tadante śāśvataṁ padam||1.46||

अनेन क्रमयोगेन सम्प्राप्तः परमं पदम्।

न भूयः पशुतामेति शुद्धे स्वात्मनि तिष्ठति॥ १.४७॥

anena kramayogena samprāptaḥ paramaṁ padam|
na bhūyaḥ paśutāmeti śuddhe svātmani tiṣṭhati||1.47||

आत्मा चतुर्विधो ह्येष पुनरेष चतुर्विधः।

आचार्यत्वादिभेदेन शुद्धात्मा परिपठ्यते॥ १.४८॥

ātmā caturvidho hyeṣa punareṣa caturvidhaḥ|
ācāryatvādibhedena śuddhātmā paripaṭhyate||1.48||

नित्यादित्रितयं कुर्याद्गुरुः साधक एव च।

नित्यमेव द्वयं चान्यद्यावज्जीवं शिवाज्ञया॥ १.४९॥

nityāditritayaṁ kuryādguruḥ sādhaka eva ca|
nityameva dvayaṁ cānyadyāvajjīvaṁ śivājñayā||1.49||

उपादेयं च हेयं च तदेतत् परिकीर्तितम्।

ज्ञात्वैतज्ज्ञेयसर्वस्वं सर्वसिद्ध्यरहो भवेत्॥ १.५०॥

upādeyaṁ ca heyaṁ ca tadetat parikīrtitam|
jñātvaitajjñeyasarvasvaṁ sarvasiddhyaraho bhavet||1.50||

इति श्रीमालिनीविजयोत्तरे प्रथमोऽधिकारः॥ १॥

iti śrīmālinīvijayottare prathamo'dhikāraḥ||1||

## व्याप्त्यधिकारो द्वितीयः २ ॥

अथ द्वितीयोऽधिकारः

atha dvitīyo'dhikāraḥ

अथैषामेव तत्त्वानां धरादीनामनुक्रमात्।

प्रपञ्चः कथ्यते लेशाद्योगिनां योगसिद्धये॥२.१॥

athaiṣāmeva tattvānāṁ dharādīnāmanukramāt|
prapañcaḥ kathyate leśādyogināṁ yogasiddhaye||2.1||

शक्तिमच्छक्तिभेदेन धरातत्त्वं विभिद्यते।

स्वरूपसहितं तच्च विज्ञेयं दशपञ्चधा॥२.२॥

śaktimacchaktibhedena dharātattvaṁ vibhidyate|
svarūpasahitaṁ tacca vijñeyaṁ daśapañcadhā||2.2||

शिवादिसकलात्मान्ताः शक्तिमन्तः प्रकीर्तिताः।

तच्छक्तयश्च विज्ञेयास्तद्वदेव विचक्षणैः॥२.३॥

śivādisakalātmāntāḥ śaktimantaḥ prakīrtitāḥ|
tacchaktayaśca vijñeyāstadvadeva vicakṣaṇaiḥ||2.3||

एवं जलादिमूलान्तं तत्त्वव्रातमिदं महत्।

पृथग्भेदैरिमैर्भिन्नं विज्ञेयं तत्फलेप्सुभिः॥२.४॥

evaṁ jalādimūlāntaṁ tattvavrātamidaṁ mahat|
pṛthagbhedairimairbhinnaṁ vijñeyaṁ tatphalepsubhiḥ||2.4||

अनेनैव विधानेन पुंस्तत्त्वात्तु कलान्तिकम्।

त्रयोदशविधं ज्ञेयं रुद्रवत्प्रलयाकलाः॥२.५॥

anenaiva vidhānena puṁstattvāttu kalāntikam|
trayodaśavidhaṁ jñeyaṁ rudravatpralayākalāḥ||2.5||

तद्वन्मायापि विज्ञेया नवधा ज्ञानकेवलाः।

मन्त्राः सप्तविधास्तद्वत्पञ्चधा मन्त्रनायकाः॥२.६॥

tadvanmāyāpi vijñeyā navadhā jñānakevalāḥ|
mantrāḥ saptavidhāstadvatpañcadhā mantranāyakāḥ||2.6||

त्रिधा मन्त्रेश्वरेशानाः शिवः साक्षान्न भिद्यते।

भेदः प्रकथितो लेशादनन्तो विस्तरादयम्॥२.७॥

tridhā mantreśvareśānāḥ śivaḥ sākṣānna bhidyate|
bhedaḥ prakathito leśādananto vistarādayam||2.7||

एवं भुवनमालापि भिन्ना भेदैरिमैः स्फुटम्।

विज्ञेया योगसिद्ध्यर्थं योगिभिर्योगपूजिता॥२.८॥

evaṁ bhuvanamālāpi bhinnā bhedairimaiḥ sphuṭam|
vijñeyā yogasiddhyarthaṁ yogibhiryogapūjitā||2.8||

एतेषामेव तत्त्वानां भुवनानां च शाङ्करि।

य एकमग्नि जानाति सोऽपि योगफलं लभेत्॥२.९॥

eteṣāmeva tattvānāṁ bhuvanānāṁ ca śāṅkari|
ya ekamagni jānāti so'pi yogaphalaṁ labhet||2.9||

यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः।

स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः॥२.१०॥

yaḥ punaḥ sarvatattvāni vettyetāni yathārthataḥ|
sa gururmatsamaḥ prokto mantravīryaprakāśakaḥ||2.10||

स्पृष्टाः सम्भाषितास्तेन दृष्टाश्च प्रीतचेतसा।

नराः पापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि॥२.११॥

spṛṣṭāḥ sambhāṣitāstena dṛṣṭāśca prītacetasā|
narāḥ pāpaiḥ pramucyante saptajanmakṛtairapi||2.11||

ये पुनर्दीक्षितास्तेन प्राणिनः शिवचोदिताः।

ते यथेष्टं फलं प्राप्य पदं गच्छन्त्यनामयम्॥ २.१२॥

ye punardīkṣitāstena prāṇinaḥ śivacoditāḥ|
te yatheṣṭaṁ phalaṁ prāpya padaṁ gacchantyanāmayam||2.12||

रुद्रशक्तिसमावेशस्तत्र नित्यं प्रतिष्ठितः।

सति तस्मिंश्च चिह्नानि तस्यैतानि विलक्षयेत्॥ २.१३॥

rudraśaktisamāveśastatra nityaṁ pratiṣṭhitaḥ|
sati tasmiṁśca cihnāni tasyaitāni vilakṣayet||2.13||

तत्रैतत्प्रथमं चिह्नं रुद्रे भक्तिः सुनिश्चला।

द्वितीयं मन्त्रसिद्धिः स्यात्सद्यः प्रत्ययकारिका॥ २.१४॥

tatraitatprathamaṁ cihnaṁ rudre bhaktiḥ suniścalā|
dvitīyaṁ mantrasiddhiḥ syātsadyaḥ pratyayakārikā||2.14||

सर्वसत्त्ववशित्वं च तृतीयं लक्षणं स्मृतम्।

प्रारब्धकार्यनिष्पत्तिश्चिह्नमाहुश्चतुर्थकम्॥ २.१५॥

sarvasattvavaśitvaṁ ca tṛtīyaṁ lakṣaṇaṁ smṛtam|
prārabdhakāryaniṣpattiścihnamāhuścaturthakam||2.15||

कवित्वं पञ्चमं ज्ञेयं सालङ्कारं मनोहरम्।

सर्वशास्त्रार्थवेत्तृत्वमकस्माच्चास्य जायते॥ २.१६॥

kavitvaṁ pañcamaṁ jñeyaṁ sālaṅkāraṁ manoharam|
sarvaśāstrārthavettṛtvamakasmāccāsya jāyate||2.16||

रुद्रशक्तिसमावेशः पञ्चधा परिपठ्यते।

भूततत्त्वात्ममन्त्रेशशक्तिभेदाद्वरानने॥ २.१७॥

rudraśaktisamāveśaḥ pañcadhā paripaṭhyate|
bhūtatattvātmamantreśaśaktibhedādvarānane||2.17||

पञ्चधा भूतसञ्ज्ञस्तु तथा त्रिंशतिधा परः।

आत्माख्यस्त्रिविधः प्रोक्तो दशधा मन्त्रसञ्ज्ञकः॥ २.१८॥

pañcadhā bhūtasañjñastu tathā triṁśatidhā paraḥ|

ātmākhyastrividhaḥ prokto daśadhā mantrasañjñakaḥ||2.18||

द्विविधः शक्तिसञ्ज्ञोऽपि ज्ञातव्यः परमार्थतः।
पञ्चाशद्भेदभिन्नोऽयं समावेशः प्रकीर्तितः॥ १९॥
dvividhaḥ śaktisañjño'pi jñātavyaḥ paramārthataḥ|
pañcāśadbhedabhinno'yaṁ samāveśaḥ prakīrtitaḥ||2.19||

आणवोऽयं समाख्यातः शाक्तोऽप्येवंविधः स्मृतः।
एवं शाम्भवमप्येभिर्भेदैर्भिन्नं विलक्षयेत्॥ २.२०॥
āṇavo'yaṁ samākhyātaḥ śākto'pyevaṁvidhaḥ smṛtaḥ|
evaṁ śāmbhavamapyebhirbhedairbhinnaṁ vilakṣayet||2.20||

उच्चारकरणध्यानवर्णस्थानप्रकल्पनैः।
यो भवेत्स समावेशः सम्यगाणव उच्यते॥ २.२१॥
uccārakaraṇadhyānavarṇasthānaprakalpanaiḥ|
yo bhavetsa samāveśaḥ samyagāṇava ucyate||2.21||

उच्चाररहितं वस्तु चेतसैव विचिन्तयन्।
यं समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते॥ २.२२॥
uccārarahitaṁ vastu cetasaiva vicintayan|
yaṁ samāveśamāpnoti śāktaḥ so'trābhidhīyate||2.22||

अकिञ्चिच्चिन्तकस्यैव गुरुणा प्रतिबोधतः।
जायते यः समावेशः शाम्भवोऽसावुदाहृतः॥ २.२३॥
akiñciccintakasyaiva guruṇā pratibodhataḥ|
jāyate yaḥ samāveśaḥ śāmbhavo'sāvudāhṛtaḥ||2.23||

सार्धमेतच्छतं प्रोक्तं भेदानामनुपूर्वशः।
सङ्क्षेपाद्विस्तरादस्य परिसङ्ख्या न विद्यते॥ २.२४॥
sārdhametacchataṁ proktaṁ bhedānāmanupūrvaśaḥ|
saṅkṣepādvistarādasya parisaṅkhyā na vidyate||2.24||

संवित्तिफलभेदोऽत्र न प्रकल्प्यो मनीषिभिः।
भेदोऽपरोऽपि सङ्क्षेपात्कथ्यमानोऽवधार्यताम्॥२.२५॥
saṁvittiphalabhedo'tra na prakalpyo manīṣibhiḥ|
bhedo'paro'pi saṅkṣepātkathyamāno'vadhāryatām||2.25||

जाग्रत्स्वप्नादिभेदेन सर्वावेशक्रमो बुधैः।
पञ्चभिस्तु परिज्ञेयः स्वव्यापारात्पृथक् पृथक्॥२.२६॥
jāgratsvapnādibhedena sarvāveśakramo budhaiḥ|
pañcabhistu parijñeyaḥ svavyāpārātpṛthak pṛthak||2.26||

तत्र स्वरूपं शक्तिश्च सकलश्चेति तत्त्रयम्।
इति जाग्रदवस्थेयं भेदे पञ्चदशात्मके॥२.२७॥
tatra svarūpaṃ śaktiśca sakalaśceti tattrayam|
iti jāgradavastheyaṃ bhede pañcadaśātmake||2.27||

अकलौ द्वौ परिज्ञेयौ सम्यक् स्वप्नसुषुप्तयोः।
मन्त्रादितत्पतीशानवर्गस्तुर्य इति स्मृतः॥२.२८॥
akalau dvau parijñeyau samyak svapnasuṣuptayoḥ|
mantrāditatpatīśānavargasturya iti smṛtaḥ||2.28||

शक्तिशम्भू परिज्ञेयौ तुर्यातीते वरानने।
त्रयोदशात्मके भेदे स्वरूपमकलावुभौ॥२.२९॥
śaktiśambhū parijñeyau turyātīte varānane|
trayodaśātmake bhede svarūpamakalāvubhau||2.29||

मन्त्रमन्त्रेश्वरेशानाः शक्तिशम्भू च कीर्तितौ।
प्रलयाकलभेदेऽपि स्वं विज्ञानाकलावुभौ॥२.३०॥
mantramantreśvareśānāḥ śaktiśambhū ca kīrtitau|
pralayākalabhede'pi svaṃ vijñānākalāvubhau||2.30||

मन्त्रमन्त्रेश्वरेशानाः शक्तीशावपि पूर्ववत्।

नवधा कीर्तिते भेदे स्वं मन्त्राः मन्त्रनायकाः॥२.३१॥

mantramantreśvareśānāḥ śaktīśāvapi pūrvavat|
navadhā kīrtite bhede svaṃ mantrāḥ mantranāyakāḥ||2.31||

तदीशाः शक्तिशम्भू च पञ्चावस्थाः प्रकीर्तिताः।

पूर्ववत्सप्तभेदेऽपि स्वं मन्त्रेशेशशक्तयः॥२.३२॥

tadīśāḥ śaktiśambhū ca pañcāvasthāḥ prakīrtitāḥ|
pūrvavatsaptabhede'pi svaṃ mantreśeśaśaktayaḥ||2.32||

शिवश्चेति परिज्ञेयाः पञ्चैव वरवर्णिनि।

स्वं शक्तिः स्वनिजेशाना शक्तिशम्भू च पञ्चके॥२.३३॥

śivaśceti parijñeyāḥ pañcaiva varavarṇini|
svaṃ śaktiḥ svanijeśānā śaktiśambhū ca pañcake||2.33||

त्रिके स्वं शक्तिशक्तीच्छाशिवभेदं विलक्षयेत्।

सव्यापाराधिपत्वेन तद्धीनप्रेरकत्वतः॥२.३४॥

trike svaṃ śaktiśaktīcchāśivabhedaṃ vilakṣayet|
savyāpārādhipatvena taddhīnaprerakatvataḥ||2.34||

इच्छानिवृत्तेः स्वस्थत्वादभिन्नमपि पञ्चधा।

इति पञ्चात्मके भेदे विज्ञेयं वस्तु कीर्तितम्॥२.३५॥

icchānivṛtteḥ svasthatvādabhinnamapi pañcadhā|
iti pañcātmake bhede vijñeyaṃ vastu kīrtitam||2.35||

भूयोऽप्यासामवस्थानां सञ्ज्ञाभेदः प्रकाश्यते।

पिण्डस्थः सर्वतोभद्रो जाग्रन्नाम द्वयं मतम्॥२.३६॥

bhūyo'pyāsāmavasthānāṃ sañjñābhedaḥ prakāśyate|
piṇḍasthaḥ sarvatobhadro jāgrannāma dvayaṃ matam||2.36||

द्विसञ्ज्ञं स्वप्नमिच्छन्ति पदस्थं व्याप्तिरित्यपि।

रूपस्थं तु महाव्याप्तिः सुषुप्तस्यापि तद्वयम्॥२.३७॥

dvisañjñaṃ svapnamicchanti padasthaṃ vyāptirityapi|

rūpasthaṃ tu mahāvyāptiḥ suṣuptasyāpi taddvayam||2.37||

प्रचयं रूपातीतं च सम्यक् तुर्यमुदाहृतम्।

महाप्रचयमिच्छन्ति तुर्यातीतं विचक्षणाः॥२.३८॥

pracayaṃ rūpātītaṃ ca samyak turyamudāhṛtam|
mahāpracayamicchanti turyātītaṃ vicakṣaṇāḥ||2.38||

पृथक्तत्त्वप्रभेदेन भेदोऽयं समुदाहृतः।

सर्वाण्येव हि तत्त्वानि पञ्चैतानि यथा श्रृणु॥२.३९॥

pṛthaktattvaprabhedena bhedo'yaṃ samudāhṛtaḥ|
sarvāṇyeva hi tattvāni pañcaitāni yathā śṛṇu||2.39||

भूततत्त्वाभिधानानां योगोऽधिष्ठेय इष्यते।

पिण्डस्थमिति तं प्राहुः पदस्थमपरं विदुः॥२.४०॥

bhūtatattvābhidhānāṃ yogo'dhiṣṭheya iṣyate|
piṇḍasthamiti taṃ prāhuḥ padasthamaparaṃ viduḥ||2.40||

मन्त्रास्तत्पतयः सेशा रूपस्थमिति कीर्त्यते।

रूपातीतं परा शक्तिः सव्यापाराप्यनामया॥२.४१॥

mantrāstatpatayaḥ seśā rūpasthamiti kīrtyate|
rūpātītaṃ parā śaktiḥ savyāpārāpyanāmayā||2.41||

निष्प्रपञ्चो निराभासः शुद्धः स्वात्मन्यवस्थितः।

सर्वातीतः शिवो ज्ञेयो यं विदित्वा विमुच्यते॥२.४२॥

niṣprapañco nirābhāsaḥ śuddhaḥ svātmanyavasthitaḥ|
sarvātītaḥ śivo jñeyo yaṃ viditvā vimucyate||2.42||

चतुर्विधं तु पिण्डस्थमबुद्धं बुद्धमेव च।

प्रबुद्धं सुप्रबुद्धं च पदस्थं च चतुर्विधम्॥२.४३॥

caturvidhaṃ tu piṇḍasthamabuddhaṃ buddhameva ca|
prabuddhaṃ suprabuddhaṃ ca padasthaṃ ca caturvidham||2.43||

गतागतं सुविक्षिप्तं सङ्गतं सुसमाहितम्।

चतुर्धा रूपसञ्ज्ञं तु ज्ञातव्यं योगचिन्तकैः॥२.४४॥

gatāgataṃ suvikṣiptaṃ saṅgataṃ susamāhitam|
caturdhā rūpasañjñaṃ tu jñātavyaṃ yogacintakaiḥ||44||

उदितं विपुलं शान्तं सुप्रसन्नमथापरम्।

मनोन्मनमनन्तं च सर्वार्थं सततोदितम्॥२.४५॥

uditaṃ vipulaṃ śāntaṃ suprasannamathāparam|
manonmanamanantaṃ ca sarvārthaṃ satatoditam||2.45||

प्रचये तत्र सञ्ज्ञेयमेकं तन्महति स्थितम्।

इत्येवं पञ्चधाध्वानं त्रिधेदानीं निगद्यते॥२.४६॥

pracaye tatra sañjñeyamekaṃ tanmahati sthitam|
ityevaṃ pañcadhādhvānaṃ tridhedānīṃ nigadyate||2.46||

विज्ञानाकलपर्यन्तमात्मतत्त्वमुदाहृतम्।

ईश्वरान्तं च विद्याह्वं शेषं शिवपदं विदुः॥२.४७॥

vijñānākalaparyantamātmatattvamudāhṛtam|
īśvarāntaṃ ca vidyāhvaṃ śeṣaṃ śivapadaṃ viduḥ||2.47||

एवं भेदैरिमैर्भिन्नस्तत्राध्वा परिकीर्तितः।

युगपत्सर्वमार्गाणां प्रभेदः प्रोच्यतेऽधुना॥२.४८॥

evaṃ bhedairimairbhinnastatrādhvā parikīrtitaḥ|
yugapatsarvamārgāṇāṃ prabhedaḥ procyate'dhunā||2.48||

पार्थिवं प्राकृतं चैव मायीयं शाक्तमेव च।

इति सङ्क्षेपतः प्रोक्तमेतदण्डचतुष्टयम्॥२.४९॥

pārthivaṃ prākṛtaṃ caiva māyīyaṃ śāktameva ca|
iti saṅkṣepataḥ proktametadaṇḍacatuṣṭayam||2.49||

पृथग्द्वयमसङ्ख्यातमेकमेकं पृथक् पृथक्।

आद्यं धारिकया व्याप्तं तत्रैकं तत्त्वमिष्यते॥२.५०॥
pṛthagdvayamasaṅkhyātamekamekaṃ pṛthak pṛthak|
ādyaṃ dhārikayā vyāptaṃ tatraikaṃ tattvamiṣyate||2.50||

एकमेकं पृथक् क्षार्णं पदार्णमनुषु स्मरेत्।
कालाग्निभुवनाद्यावद्वीरभद्रपुरोत्तमम्॥२.५१॥
ekamekaṃ pṛthak kṣārṇaṃ padārṇamanuṣu smaret|
kālāgnibhuvanādyāvadvīrabhadrapurottamam||2.51||

पुरषोडशकं ज्ञेयं षड्विधोऽध्वा प्रकीर्तितः।
आप्यायिन्या द्वितीयं च तत्र तत्त्वानि लक्षयेत्॥२.५२॥
puraṣoḍaśakaṃ jñeyaṃ ṣaḍvidho'dhvā prakīrtitaḥ|
āpyāyinyā dvitīyaṃ ca tatra tattvāni lakṣayet||2.52||

त्रयोविंशत्यवादीनि तद्वट्टाद्यक्षराणि च।
पदानि पञ्च मन्त्राश्च षट्पञ्चाशत्पुराणि च॥२.५३॥
trayoviṃśatyavādīni tadvaṭṭādyakṣarāṇi ca|
padāni pañca mantrāśca ṣaṭpañcāśatpurāṇi ca||2.53||

तत्त्वानि सप्त बोधिन्या तच्चतुर्धा पुराणि च।
तृतीये सप्त वर्णाः स्युः पदमन्त्रद्वयं द्वयम्॥२.५४॥
tattvāni sapta bodhinyā taccaturdhā purāṇi ca|
tṛtīye sapta varṇāḥ syuḥ padamantradvayaṃ dvayam||2.54||

उत्पूयिन्या चतुर्थं तु तत्र तत्त्वत्रयं विदुः।
वर्णत्रयं मन्त्रमेकं पदमेकं च लक्षयेत्॥२.५५॥
utpūyinyā caturthaṃ tu tatra tattvatrayaṃ viduḥ|
varṇatrayaṃ mantramekaṃ padamekaṃ ca lakṣayet||2.55||

अष्टादश विजानीयाद्भुवनानि समासतः।
शिवतत्त्वं परं शान्तं कला तत्रावकाशदा॥२.५६॥
aṣṭādaśa vijānīyādbhuvanāni samāsataḥ|

śivatattvaṃ paraṃ śāntaṃ kalā tatrāvakāśadā||2.56||

स्वरषोडशकं मन्त्रं पदं चैकं विलक्षयेत्।
इत्येवं षड्विधोऽप्यध्वा समासात्परिकीर्तितः॥२.५७॥
svaraṣoḍaśakaṃ mantraṃ padaṃ caikaṃ vilakṣayet|
ityevaṃ ṣaḍvidho'pyadhvā samāsātparikīrtitaḥ||2.57||

शुद्धाशुद्धं जगत्सर्वं ब्रह्माण्डप्रभवं यतः।
तस्माच्छुद्धमिमैः शुद्धैर्ब्रह्माण्डैः सर्वमिष्यते॥२.५८॥
śuddhāśuddhaṃ jagatsarvaṃ brahmāṇḍaprabhavaṃ yataḥ|
tasmācchuddhamimaiḥ śuddhairbrahmāṇḍaiḥ sarvamiṣyate||2.58||

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्चेति सुव्रते।
पृथगेतेषु बोद्धव्यं शान्तं पतिचतुष्टयम्॥२.५९॥
brahmā viṣṇuśca rudraśca īśvaraśceti suvrate|
pṛthageteṣu boddhavyaṃ śāntaṃ paticatuṣṭayam||2.59||

यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्व उच्यते।
एतत्ते कथितं सर्वं किमन्यत्परिपृच्छसि॥२.६०॥
yo hi yasmādguṇotkṛṣṭaḥ sa tasmādūrdhva ucyate|
etatte kathitaṃ sarvaṃ kimanyatparipṛcchasi||2.60||

इति श्रीमालिनीविजयोत्तरे तन्त्रे व्याप्त्यधिकारो द्वितीयः॥२॥
iti śrīmālinīvijayottare tantre vyāptyadhikāro dvitīyaḥ||2||

## मन्त्रोद्धाराधिकारः तृतीयः ३ ॥

अथ तृतीयोऽधिकारः।

atha tṛtīyo'dhikāraḥ|

एवमुक्ता महादेवी जगदानन्दकारिणा।

प्रणिपत्य पुनर्वाक्यमिदमाह जगत्पतिम्॥ ३.१ ॥

evamuktā mahādevī jagadānandakāriṇā|

praṇipatya punarvākyamidamāha jagatpatim||3.1||

एवमेतन्महादेव नान्यथा समुदाहृतम्।

यथाख्यातं तथा ज्ञातमादितः समनुक्रमात्॥ ३.२ ॥

evametanmahādeva nānyathā samudāhṛtam|

yathākhyātaṁ tathā jñātamāditaḥ samanukramāt||3.2||

शिवादिवस्तुरूपाणां वाचकान्परमेश्वर।

साम्प्रतं श्रोतुमिच्छामि प्रसादाद्वक्तुमर्हसि॥ ३.३ ॥

śivādivasturūpāṇāṁ vācakānparameśvara|

sāmprataṁ śrotumicchāmi prasādādvaktumarhasi||3.3||

इत्युक्तः स महेशान्या जगदार्तिहरो हरः।

वाचकानवदन्मन्त्रान्पारम्पर्यक्रमागतान्॥ ३.४ ॥

ityuktaḥ sa maheśānyā jagadārtiharo haraḥ|

vācakānavadanmantrānpāramparyakramāgatān||3.4||

या सा शक्तिर्जगद्धातुः कथिता समवायिनी।

इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते॥ ३.५ ॥

yā sā śaktirjagaddhātuḥ kathitā samavāyinī|

icchātvaṁ tasya sā devi sisṛkṣoḥ pratipadyate||3.5||

सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम्॥ ३.६॥
saikāpi satyanekatvaṁ yathā gacchati tacchṛṇu|
evametaditi jñeyaṁ nānyatheti suniścitam||3.6||

ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते।
एवम्भूतमिदं वस्तु भवत्विति यदा पुनः॥ ३.७॥
jñāpayantī jagatyatra jñānaśaktirnigadyate|
evambhūtamidaṁ vastu bhavatviti yadā punaḥ||3.7||

जाता तदैव तत्तद्वत्कुर्वत्यत्र क्रियोच्यते।
एवं सैषा द्विरूपापि पुनर्भेदैरनेकताम्॥ ३.८॥
jātā tadaiva tattadvatkurvatyatra kriyocyate|
evaṁ saiṣā dvirūpāpi punarbhedairanekatām||3.8||

अर्थोपाधिवशाद्याति चिन्तामणिरिवेश्वरी।
तत्र तावत्समापन्ना मातृभावं विभिद्यते॥ ३.९॥
arthopādhivaśādyāti cintāmaṇiriveśvarī|
tatra tāvatsamāpannā mātṛbhāvaṁ vibhidyate||3.9||

द्विधा च नवधा चैव पञ्चाशद्धा च मालिनी।
बीजयोन्यात्मकाद्भेदाद्द्विधा बीजं स्वरा मताः॥ ३.१०॥
dvidhā ca navadhā caiva pañcāśaddhā ca mālinī|
bījayonyātmakādbhedāddvidhā bījaṁ svarā matāḥ||3.10||

कादिभिश्च स्मृता योनिर्नवधा वर्गभेदतः।
प्रतिवर्णविभेदेन शतार्धकिरणोज्ज्वला॥ ३.११॥
kādibhiśca smṛtā yonirnavadhā vargabhedataḥ|
prativarṇavibhedena śatārdhakiraṇojjvalā||3.11||

बीजमत्र शिवः शक्तिर्योनिरित्यभिधीयते।

वाचकत्वेन सर्वापि शम्भोः शक्तिश्च सस्यते॥१२॥

bījamatra śivaḥ śaktiryonirityabhidhīyate|
vācakatvena sarvāpi śambhoḥ śaktiśca śasyate||3.12||

वर्गाष्टकमिह ज्ञेयमघोराद्यमनुक्रमात्।

तदेव शक्तिभेदेन माहेश्वर्यादि चाष्टकम्॥३.१३॥

vargāṣṭakamiha jñeyamaghorādyamanukramāt|
tadeva śaktibhedena māheśvaryādi cāṣṭakam||3.13||

माहेशी ब्राह्मणी चैव कौमारी वैष्णवी तथा।

ऐन्द्री याम्या च चामुण्डा योगीशी चेति ता मताः॥३.१४॥

māheśī brāhmaṇī caiva kaumārī vaiṣṇavī tathā|
aindrī yāmyā ca cāmuṇḍā yogīśī ceti tā matāḥ||3.14||

शतार्धभेदभिन्नानां तत्सङ्ख्यानां वरानने।

रुद्राणां वाचकत्वेन कल्पिताः परमेष्ठिना॥३.१५॥

śatārdhabhedabhinnānāṁ tatsaṅkhyānāṁ varānane|
rudrāṇāṁ vācakatvena kalpitāḥ parameṣṭhinā||3.15||

तद्वदेव च शक्तीनां तत्सङ्ख्यानमनुक्रमात्।

सर्वं च कथयिष्यामि तासां भेदं यथा शृणु॥३.१६॥

tadvadeva ca śaktīnāṁ tatsaṅkhyānamanukramāt|
sarvaṁ ca kathayiṣyāmi tāsāṁ bhedaṁ yathā śṛṇu||3.16||

अमृतोऽमृतपूर्णश्च अमृताभोऽमृतद्रवः।

अमृतौघोऽमृतोर्मिश्च अमृतस्यन्दनोऽपरः॥३.१७॥

amṛto'mṛtapūrṇaśca amṛtābho'mṛtadravaḥ|
amṛtaugho'mṛtormiśca amṛtasyandano'paraḥ||3.17||

अमृताङ्गोऽमृतवपुरमृतोद्गार एव च।

अमृतास्योऽमृततनुस्तथा चामृतसेचनः॥३.१८॥

amṛtāṅgo'mṛtavapuramṛtodgāra eva ca|

amṛtāsyo'mṛtatanustathā cāmṛtasecanaḥ||3.18||

तन्मूर्तिरमृतेशश्च सर्वामृतधरोऽपरः।
षोडशैते समाख्याता रुद्रबीजसमुद्भवाः॥३.१९॥
tanmūrtiramṛteśaśca sarvāmṛtadharo'paraḥ|
ṣoḍaśaite samākhyātā rudrabījasamudbhavāḥ||3.19||

जयश्च विजयश्चैव जयन्तश्चापराजितः।
सुजयो जयरुद्रश्च जयकीर्तिर्जयावहः॥३.२०॥
jayaśca vijayaścaiva jayantaścāparājitaḥ|
sujayo jayarudraśca jayakīrtirjayāvahaḥ||3.20||

जयमूर्तिर्जयोत्साहो जयदो जयवर्धनः।
बलश्चातिबलश्चैव बलभद्रो बलप्रदः॥३.२१॥
jayamūrtirjayotsāho jayado jayavardhanaḥ|
balaścātibalaścaiva balabhadro balapradaḥ||3.21||

बलावहश्च बलवान् बलदाता बलेश्वरः।
नन्दनः सर्वतोभद्रो भद्रमूर्तिः शिवप्रदः॥३.२२॥
balāvahaśca balavān baladātā baleśvaraḥ|
nandanaḥ sarvatobhadro bhadramūrtiḥ śivapradaḥ||3.22||

सुमनाः स्पृहणो दुर्गो भद्रकालो मनोनुगः।
कौशिकः कालविश्वेशौ सुशिवः कोप एव च॥३.२३॥
sumanāḥ spṛhaṇo durgo bhadrakālo manonugaḥ|
kauśikaḥ kālaviśveśau suśivaḥ kopa eva ca||3.23||

एते योनिसमुद्भूताश्चतुस्त्रिंशत्प्रकीर्तिताः।
स्त्रीपाठवशमापन्ना एत एवात्र शक्तयः॥३.२४॥
ete yonisamudbhūtāścatustriṁśatprakīrtitāḥ|
strīpāṭhavaśamāpannā eta evātra śaktayaḥ||3.24||

बीजयोनिसमुद्भूता रुद्रशक्तिसमाश्रयाः।

वाचकानामनन्तत्वात्परिसङ्ख्या न विद्यते॥३.२५॥

bījayonisamudbhūtā rudraśaktisamāśrayāḥ|
vācakānām anantatvātparisaṅkhyā na vidyate||3.25||

सर्वशास्त्रार्थगर्भिण्या इत्येवं विधयानया।

अघोरं बोधयामास स्वेच्छया परमेश्वरः॥३.२६॥

sarvaśāstrārthagarbhiṇyā ityevaṁ vidhayānayā|
aghoraṁ bodhayāmāsa svecchayā parameśvaraḥ||3.26||

स तया सम्प्रबुद्धः सन्योनिं विक्षोभ्य शक्तिभिः।

तत्समानश्रुतीन्वर्णांस्तत्सङ्ख्यानसृजत्प्रभुः॥३.२७॥

sa tayā samprabuddhaḥ sanyoniṁ vikṣobhya śaktibhiḥ|
tatsamānaśrutīnvarṇāṁstatsaṅkhyānasṛjatprabhuḥ||3.27||

ते तैरालिङ्गिताः सन्तः सर्वकामफलप्रदाः।

भवन्ति साधकेन्द्राणां नान्यथा वीरवन्दिते॥३.२८॥

te tairāliṅgitāḥ santaḥ sarvakāmaphalapradāḥ|
bhavanti sādhakendrāṇāṁ nānyathā vīravandite||3.28||

तैरिदं सन्ततं विश्वं सदेवासुरमानुषम्।

तेभ्यः शास्त्राणि वेदाश्च सम्भवन्ति पुनः पुनः॥३.२९॥

tairidaṁ santataṁ viśvaṁ sadevāsuramānuṣam|
tebhyaḥ śāstrāṇi vedāśca sambhavanti punaḥ punaḥ||3.29||

अनन्तस्यापि भेदस्य शिवशक्तेर्महात्मनः।

कार्यभेदान्महादेवि त्रैविध्यं समुदाहृतम्॥३.३०॥

anantasyāpi bhedasya śivaśaktermahātmanaḥ|
kāryabhedānmahādevi traividhyaṁ samudāhṛtam||3.30||

विषयेष्वेव संलीनानधोऽधः पातयन्त्यणून्।

रुद्राणून्याः समालिङ्ग्य घोरतर्योऽपराः स्मृताः॥३.३१॥

viṣayeṣveva saṁlīnānadho'dhaḥ pātayantyaṇūn|

rudrāṇūnyāḥ samāliṅgya ghorataryo'parāḥ smṛtāḥ||3.31||

मिश्रकर्मफलासक्तिं पूर्ववज्जनयन्ति याः।

मुक्तिमार्गनिरोधिन्यस्ताः स्युर्घोराः परापराः॥३.३२॥

miśrakarmaphalāsaktiṁ pūrvavajjanayanti yāḥ|

muktimārganirodhinyastāḥ syurghorāḥ parāparāḥ||3.32||

पूर्ववज्जन्तुजातस्य शिवधामफलप्रदाः।

पराः प्रकथितास्तज्ज्ञैरघोराः शिवशक्तयः॥३.३३॥

pūrvavajjantujātasya śivadhāmaphalapradāḥ|

parāḥ prakathitāstajjñairaghorāḥ śivaśaktayaḥ||3.33||

एताः सर्वाणुसङ्घातमपि निष्ठा यथा स्थिताः।

तथा ते कथिताः शम्भोः शक्तिरेकैव शाङ्करी॥३.३४॥

etāḥ sarvāṇusaṅghātamapi niṣṭhā yathā sthitāḥ|

tathā te kathitāḥ śambhoḥ śaktirekaiva śāṅkarī||3.34||

अस्या वाचकभेदेन भेदोऽन्यः सम्प्रचक्ष्यते।

यथेष्टफलसंसिद्ध्यै मन्त्रातन्त्रानुवर्तिनाम्॥३.३५॥

asyā vācakabhedena bhedo'nyaḥ sampracakṣyate|

yatheṣṭaphalasaṁsiddhyai mantrātantrānuvartinām||3.35||

विशेषविधिहीनेषु न्यासकर्मसु मन्त्रवित्।

न्यसेच्छाक्तशरीरार्थं भिन्नयोनिं तु मालिनीम्॥३.३६॥

viśeṣavidhihīneṣu nyāsakarmasu mantravit|

nyasecchāktaśarīrārthaṁ bhinnayoniṁ tu mālinīm||3.36||

न शिखा ऋॠ ऌॡ च शिरोमाला थ मस्तकम्।

नेत्राणि च ध वै नासा ई समुद्रे णु णू श्रुती॥३.३७॥

na śikhā ṛṝ ḷḹ ca śiromālā tha mastakam|

netrāṇi ca dha vai nāsā ī samudre ṇu ṇū śrutī||3.37||

बकवर्गैआ वक्रदन्तजिह्वासु वाचि च।

वभयाः कण्ठदक्षादिस्कन्धयोर्भुजयोर्डढौ॥ ३.३८॥

bakavargaiā vaktradantajihvāsu vāci ca|
vabhayāḥ kaṇṭhadakṣādiskandhayorbhujayorḍaḍhau||3.38||

ठो हस्तयोर्झञौ शाखा ज्रटौ शूलकपालके।

पहृच्छलौ स्तनौ क्षीरमा स जीवो विसर्गयुक्॥ ३.३९॥

ṭho hastayorjhañau śākhā jraṭau śūlakapālake|
pahṛcchalau stanau kṣīramā sa jīvo visargayuk||3.39||

तत्परः कथितः प्राणः षक्षावुदरनाभिगौ।

मशांताः कटिगुह्योरुयुग्मगा जानुनी तथा॥ ३.४०॥

tatparaḥ kathitaḥ prāṇaḥ ṣakṣāvudaranābhigau|
maśāṁtāḥ kaṭiguhyoruyugmagā jānunī tathā||3.40||

एऐकारौ तथा जङ्घे तत्परौ चरणौ दफौ।

अतो विद्याश्च मन्त्राश्च समुद्धार्या यथा शृणु॥ ३.४१॥

eaikārau tathā jaṅghe tatparau caraṇau daphau|
ato vidyāśca mantrāśca samuddhāryā yathā śṛṇu||3.41||

सबिन्दुकां दक्षजङ्घां ततो वाचं प्रकल्पयेत्।

तथैव जङ्घया युक्तं चतुर्थं दशनं ततः॥ ३.४२॥

sabindukāṁ dakṣajaṅghāṁ tato vācaṁ prakalpayet|
tathaiva jaṅghayā yuktaṁ caturthaṁ daśanaṁ tataḥ||3.42||

दक्षजानुयुतं दण्डं प्राणं दण्डस्थमीर्युतम्।

पृथग् घृद्दण्डकटिगा द्विजदण्डौ च पूर्ववत्॥ ३.४३॥

dakṣajānuyutaṁ daṇḍaṁ prāṇaṁ daṇḍasthamīryutam|
pṛthag ghṛddaṇḍakaṭigā dvijadaṇḍau ca pūrvavat||3.43||

उत्थितं बिन्दुयुक्प्राणं पूर्ववद्दशनं ततः।

दण्डं केवलमुद्धृत्य वाममुद्रान्वितं पुनः॥३.४४॥

utthitaṁ binduyukprāṇaṁ pūrvavaddaśanaṁ tataḥ|
daṇḍaṁ kevalamuddhṛtya vāmamudrānvitaṁ punaḥ||3.44||

दक्षजानुयुतं हृच्च प्राणं जीवात्मना युतम्।

दशनं पूर्ववन्न्यस्य दण्डं केवलमेव च॥३.४५॥

dakṣajānuyutaṁ hṛcca prāṇaṁ jīvātmanā yutam|
daśanaṁ pūrvavannyasya daṇḍaṁ kevalameva ca||3.45||

नितम्बं दक्षमुद्रेतं द्वितीयं जिह्वया द्विजम्।

सनासं दक्षशिखरं नितम्बं केवलं ततः॥३.४६॥

nitambaṁ dakṣamudretaṁ dvitīyaṁ jihvayā dvijam|
sanāsaṁ dakṣaśikharaṁ nitambaṁ kevalaṁ tataḥ||3.46||

पुनस्तथैव शिखरं जठरं केवलं ततः।

दक्षजानुयुतं कर्णं कण्ठं केवलमेव च॥३.४७॥

punastathaiva śikharaṁ jaṭharaṁ kevalaṁ tataḥ|
dakṣajānuyutaṁ karṇaṁ kaṇṭhaṁ kevalameva ca||3.47||

नितम्बं केवलं न्यस्य हृदयं जिह्वया युतम्।

वक्त्रं केवलमुद्धृत्य प्राणमाद्येन जानुना॥३.४८॥

nitambaṁ kevalaṁ nyasya hṛdayaṁ jihvayā yutam|
vaktraṁ kevalamuddhṛtya prāṇamādyena jānunā||3.48||

शूलदण्डचतुष्कं च तत्राद्यं द्वयसंस्थितम्।

वामपादं च तस्यान्ते कपालं पतितं न्यसेत्॥३.४९॥

śūladaṇḍacatuṣkaṁ ca tatrādyaṁ dvayasaṁsthitam|
vāmapādaṁ ca tasyānte kapālaṁ patitaṁ nyaset||3.49||

ततः परमघोरान्तं पाद्यकाद्ये च पूर्ववत्।

परापरा समाख्याता अपरा च प्रकथ्यते॥ ३.५०॥

tataḥ paramaghorāntaṁ pādyakādye ca pūrvavat|
parāparā samākhyātā aparā ca prakathyate||3.50||

अघोरान्तं न्यसेदादौ प्राणं बिन्दुयुतं पुनः।

वाममुद्रान्वितं न्यस्य पाद्यं काद्येन पूर्ववत्॥ ३.५१॥

aghorāntaṁ nyasedādau prāṇaṁ binduyutaṁ punaḥ|
vāmamudrānvitaṁ nyasya pādyaṁ kādyena pūrvavat||3.51||

अपरेयं समाख्याता रुद्रशक्तिं परां शृणु।

मन्त्राः संमुखतां यान्ति ययोच्चारितमात्रया॥ ३.५२॥

apareyaṁ samākhyātā rudraśaktiṁ parāṁ śṛṇu|
mantrāḥ saṁmukhatāṁ yānti yayoccāritamātrayā||3.52||

कम्पते गात्रयष्टिश्च द्रुतं चोत्पतनं भवेत्।

मुद्राबन्धं च गेयं च शिवारुदितमेव च॥ ३.५३॥

kampate gātrayaṣṭiśca drutaṁ cotpatanaṁ bhavet|
mudrābandhaṁ ca geyaṁ ca śivāruditameva ca||3.53||

अतीतानागतार्थस्य कुर्याद्वा कथनादिकम्।

वामजङ्घान्वितो जीवः पारम्पर्यक्रमागतः॥ ३.५४॥

atītānāgatārthasya kuryādvā kathanādikam|
vāmajaṅghānvito jīvaḥ pāramparyakramāgataḥ||3.54||

परेयमनया सिद्धिः सर्वकामफलप्रदा।

नाशिष्याय प्रदेयेयं नाभक्ताय कदाचन॥ ३.५५॥

pareyamanayā siddhiḥ sarvakāmaphalapradā|
nāśiṣyāya pradeyeyaṁ nābhaktāya kadācana||3.55||

रुद्रश्च रुद्रशक्तिश्च गुरुश्चेति त्रयं समम्।

भक्त्या प्रपश्यते यस्तु तस्मै देया वरानने॥ ३.५६॥

rudraśca rudraśaktiśca guruśceti trayaṁ samam|

bhaktyā prapaśyate yastu tasmai deyā varānane||3.56||

शिष्येणापि तदा ग्राह्या यदा सन्तोषितो गुरुः।

शरीरद्रव्यविज्ञानशुद्धिकर्मगुणादिभिः॥३.५७॥

śiṣyeṇāpi tadā grāhyā yadā santoṣito guruḥ|
śarīradravyavijñānaśuddhikarmaguṇādibhiḥ||3.57||

बोधिता तु यदा तेन गुरुणा हृष्टचेतसा।

तदा सिद्धिप्रदा ज्ञेया नान्यथा वीरवन्दिते॥३.५८॥

bodhitā tu yadā tena guruṇā hṛṣṭacetasā|
tadā siddhipradā jñeyā nānyathā vīravandite||3.58||

परापराङ्गसम्भूता योगिन्योऽष्टौ महाबलाः।

पञ्च षट् पञ्च चत्वारि द्वित्रिद्व्यर्णाः क्रमेण तु॥३.५९॥

parāparāṅgasambhūtā yoginyo'ṣṭau mahābalāḥ|
pañca ṣaṭ pañca catvāri dvitridvyarṇāḥ krameṇa tu||3.59||

ज्ञेयाः सप्तैकादशार्णा एकार्धार्णद्वयान्विताः।

जीवो दीर्घस्वरैः षड्भिः पृथग्जातिसमन्वितः॥३.६०॥

jñeyāḥ saptaikādaśārṇā ekārdhārṇadvayānvitāḥ|
jīvo dīrghasvaraiḥ ṣaḍbhiḥ pṛthagjātisamanvitaḥ||3.60||

विद्यात्रयस्य गात्राणि ह्रस्वैर्वक्त्राणि पञ्चभिः।

ओङ्कारैः पञ्चभिर्मन्त्रो विद्याङ्गहृदयं भवेत्॥३.६१॥

vidyātrayasya gātrāṇi hrasvairvaktrāṇi pañcabhiḥ|
oṁkāraiḥ pañcabhirmantro vidyāṅgahṛdayaṁ bhavet||3.61||

ॐ अमृते तेजोमालिनि स्वाहापदानि भूषितम्।

एकादशाक्षरं प्रोक्तमेतद्ब्रह्मशिरः प्रिये॥३.६२॥

oṁ amṛte tejomālini svāhāpadāni bhūṣitam|
ekādaśākṣaraṁ proktametadbrahmaśiraḥ priye||3.62||

वेद्वेदिनि हूँफट् च प्रणवादिसमन्विता।

रुद्राण्यष्टाक्षरा ज्ञेया शिखा विद्यागणस्य तु॥ ३.६३॥

vedavedini hūm̐phaṭ ca praṇavādisamanvitā|
rudrāṇyaṣṭākṣarā jñeyā śikhā vidyāgaṇasya tu||3.63||

वज्रिणे वज्रधराय स्वाहान्तं प्रणवादिकम्।

एकादशाक्षरं वर्म पुरुष्टुतमिति स्मृतम्॥ ३.६४॥

vajriṇe vajradharāya svāhāntaṁ praṇavādikam|
ekādaśākṣaraṁ varma puruṣṭutamiti smṛtam||3.64||

श्लीपदं पशुशब्दं च हूँफडन्तं भवादिकम्।

एतत्पाशुपतं प्रोक्तमर्धसप्ताक्षरं परम्॥ ३.६५॥

ślīpadaṁ paśuśabdaṁ ca hūm̐phaḍantaṁ bhavādikam|
etatpāśupataṁ proktamardhasaptākṣaraṁ param||3.65||

लरटक्षवयैर्दीर्घैः समायुक्तैः सबिन्दुकैः।

इन्द्रादीन्कल्पयेद्ध्रस्वैस्तदस्त्राणि विचक्षणः॥ ३.६६॥

laraṭakṣavayairdīrghaiḥ samāyuktaiḥ sabindukaiḥ|
indrādīnkalpayeddhrasvaistadastrāṇi vicakṣaṇaḥ||3.66||

तद्वन्नासापयोभ्यां तु कल्प्यौ विष्णुप्रजापती।

स्वरावाद्यतृतीयौ तु वाचकौ पद्मचक्रयोः॥ ३.६७॥

tadvannāsāpayobhyāṁ tu kalpyau viṣṇuprajāpatī|
svarāvādyatṛtīyau tu vācakau padmacakrayoḥ||3.67||

इति मातृगणः प्रोक्तः सर्वकामफलप्रदः।

योगिनां योगसिद्ध्यर्थं किमन्यत्परिपृच्छसि॥ ३.६८॥

iti mātṛgaṇaḥ proktaḥ sarvakāmaphalapradaḥ|
yogināṁ yogasiddhyarthaṁ kimanyatparipṛcchasi||3.68||

इति श्रीमालिनीविजयोत्तरे तन्त्रे मन्त्रोद्धाराधिकारस्तृतीयः॥ ३॥

iti śrīmālinīvijayottare tantre mantroddhārādhikārastṛtīyaḥ||3||

## योगलक्षणाधिकारः चतुर्थः ४ ॥

अथ चतुर्थोऽधिकारः।

atha caturtho'dhikāraḥ|

अथैतदुपसंश्रुत्य मुनयो मुदितेक्षणाः।

प्रणम्य क्रौञ्चहन्तारं पुनरूचुरिदं वचः॥४.१॥

athaitadupasaṁśrutya munayo muditekṣaṇāḥ|
praṇamya krauñcahantāraṁ punarūcuridaṁ vacaḥ||4.1||

योगमार्गविधिं देव्या पृष्टेन परमेष्ठिना।

तत्प्रतिज्ञावताप्युक्तं किमर्थं मन्त्रलक्षणम्॥४.२॥

yogamārgavidhiṁ devyā pṛṣṭena parameṣṭhinā|
tatpratijñāvatāpyuktaṁ kimarthaṁ mantralakṣaṇam||4.2||

एवमुक्तः स तैः सम्यक्कार्तिकेयो महामतिः।

इदमाह वचस्तेषां सन्देहविनिवृत्तये॥४.३॥

evamuktaḥ sa taiḥ samyakkārtikeyo mahāmatiḥ|
idamāha vacasteṣāṁ sandehavinivṛttaye||4.3||

योगमेकत्वमिच्छन्ति वस्तुनोऽन्येन वस्तुना।

यद्वस्तु ज्ञेयमित्युक्तं हेयत्वादिप्रसिद्धये॥४.४॥

yogamekatvamicchanti vastuno'nyena vastunā|
yadvastu jñeyamityuktaṁ heyatvādiprasiddhaye||4.4||

द्विरूपमपि तज्ज्ञानं विना ज्ञातुं न शक्यते।

तत्प्रसिद्ध्यै शिवेनोक्तं ज्ञानं यदुपवर्णितम्॥४.५॥

dvirūpamapi tajjñānaṁ vinā jñātuṁ na śakyate|
tatprasiddhyai śivenoktaṁ jñānaṁ yadupavarṇitam||4.5||

सबीजयोगसंसिद्ध्यै मन्त्रलक्षणमप्यलम्।

न चाधिकारिता दीक्षां विना योगेऽस्ति शाङ्करे॥४.६॥

sabījayogasaṁsiddhyai mantralakṣaṇamapyalam|
na cādhikāritā dīkṣāṁ vinā yoge'sti śāṅkare||4.6||

क्रियाज्ञनविभेदेन सा च द्वेधा निगद्यते।

द्विविधा सा प्रकर्तव्या तेन चैतदुदाहृतम्॥४.७॥

kriyājñanavibhedena sā ca dvedhā nigadyate|
dvividhā sā prakartavyā tena caitadudāhṛtam||4.7||

न च योगाधिकारित्वमेकमेवानया भवेत्।

अपि मन्त्राधिकारित्वं मुक्तिश्च शिवदीक्षया॥४.८॥

na ca yogādhikāritvamekamevānayā bhavet|
api mantrādhikāritvaṁ muktiśca śivadīkṣayā||4.8||

श्रुत्वा चैतत्पतेर्वाक्यं रोमाञ्चितशरीरिणी।

इदमाह पुनर्वाक्यमम्बा मुनिवरोत्तमाः॥४.९॥

śrutvā caitatpatervākyaṁ romāñcitaśarīriṇī|
idamāha punarvākyamambā munivarottamāḥ||4.9||

अभिन्नमालिनीकाये तत्त्वानि भुवनानि च।

कलाः पदानि मन्त्राश्च यथावदवधारिताः॥४.१०॥

abhinnamālinīkāye tattvāni bhuvanāni ca|
kalāḥ padāni mantrāśca yathāvadavadhāritāḥ||4.10||

भिन्नयोनिस्तु या देव त्वयोक्ता मालिनी मम।

तस्या अङ्गे यथैतानि संस्थितानि तथा वद॥४.११॥

bhinnayonistu yā deva tvayoktā mālinī mama|
tasyā aṅge yathaitāni saṁsthitāni tathā vada||4.11||

एवमुक्तो महादेव्या भैरवो भूरिभोगदः।

स्फुरद्धिमांशुसन्तानप्रकाशितदिगन्तरः॥४.१२॥
evamukto mahādevyā bhairavo bhūribhogadaḥ|
sphuraddhimāṁśusantānaprakāśitadigantaraḥ||4.12||

सुरासुरशिरोमौलिमालाललितशासनः।
उवाच मधुरां वाचमिमामक्लेशिताशयाम्॥४.१३॥
surāsuraśiromaulimālālalitaśāsanaḥ|
uvāca madhurāṁ vācamimāmakleśitāśayām||4.13||

या मया कथिता देवि भिन्नयोनिस्तु मालिनी।
तदङ्गे सम्प्रवक्ष्यामि सर्वमेतद्यथा स्थितम्॥४.१४॥
yā mayā kathitā devi bhinnayonistu mālinī|
tadaṅge sampravakṣyāmi sarvametadyathā sthitam||4.14||

फे धरातत्त्वमुद्दिष्टं दादिझान्तेऽनुपूर्वशः।
त्रयोविंशत्यबादीनि प्रधानान्तानि लक्षयेत्॥४.१५॥
phe dharātattvamuddiṣṭaṁ dādijhānte'nupūrvaśaḥ|
trayoviṁśatyabādīni pradhānāntāni lakṣayet||4.15||

ठादौ च सप्तके सप्त पुरुषादीनि पूर्ववत्।
इङ्घेषु त्रयं विद्याद्विद्यातः सकलावधि॥४.१६॥
ṭhādau ca saptake sapta puruṣādīni pūrvavat|
iṅgheṣu trayaṁ vidyādvidyātaḥ sakalāvadhi||4.16||

शिवतत्त्वे गकारादिनान्तान् षोडश लक्षयेत्।
कलाः पदानि मन्त्राश्च भुवनानि च सुन्दरि॥४.१७॥
śivatattve gakārādināntān ṣoḍaśa lakṣayet|
kalāḥ padāni mantrāśca bhuvanāni ca sundari||4.17||

पूर्ववद्वेदितव्यानि तत्सङ्ख्यार्णविभेदतः।
विद्यात्रयविभागेन यथेदानीं तथा शृणु॥४.१८॥
pūrvavadveditavyāni tatsaṅkhyārṇavibhedataḥ|

vidyātrayavibhāgena yathedānīṁ tathā śṛṇu||4.18||

निष्कले पदमेकार्णं त्र्यर्णैकार्णमिति द्वयम्।
सकले तु परिज्ञेयं पञ्चैकार्णद्वयं द्वये॥४.१९॥
niṣkale padamekārṇaṁ tryarṇaikārṇamiti dvayam|
sakale tu parijñeyaṁ pañcaikārṇadvayaṁ dvaye||4.19||

चतुरेकाक्षरे द्वे च मायादित्रितये मते।
चतुरक्षरमेकं च कालादिद्वितये मतम्॥४.२०॥
caturekākṣare dve ca māyāditritaye mate|
caturakṣaramekaṁ ca kālādidvitaye matam||4.20||

रञ्जके द्व्यर्णमुद्दिष्टं प्रधाने त्र्यर्णमिष्यते।
बुद्धौ देवाष्टकव्याप्त्या पदं द्व्यक्षरमिष्यते॥४.२१॥
rañjake dvyarṇamuddiṣṭaṁ pradhāne tryarṇamiṣyate|
buddhau devāṣṭakavyāptyā padaṁ dvyakṣaramiṣyate||4.21||

ततः पञ्चाष्टकव्याप्त्या द्व्येकद्विद्व्यक्षराणि तु।
विद्यापदानि चत्वारि सार्धवर्णं तु पञ्चमम्॥४.२२॥
tataḥ pañcāṣṭakavyāptyā dvyekadvidvyakṣarāṇi tu|
vidyāpadāni catvāri sārdhavarṇaṁ tu pañcamam||4.22||

एकैकसार्धवर्णानि त्रीणि तत्त्वे तु पार्थिवे।
पराङ्गे सर्वमन्यच्च वर्णमन्त्रकलादिकम्॥४.२३॥
ekaikasārdhavarṇāni trīṇi tattve tu pārthive|
parāṅge sarvamanyacca varṇamantrakalādikam||4.23||

सार्धेनाण्डद्वयं व्याप्तमेकैकेन पृथग्द्वयम्।
अपरायाः समाख्याता व्याप्तिरेषा विलोमतः॥४.२४॥
sārdhenāṇḍadvayaṁ vyāptamekaikena pṛthagdvayam|
aparāyāḥ samākhyātā vyāptireṣā vilomataḥ||4.24||

सार्णेनाण्डत्रयं व्याप्तं त्रिशूलेन चतुर्थकम्।

सर्वातीतं विसर्गेण पराया व्याप्तिरिष्यते॥४.२५॥

sārṇenāṇḍatrayaṁ vyāptaṁ triśūlena caturthakam|
sarvātītaṁ visargeṇa parāyā vyāptiriṣyate||4.25||

एतत्सर्वं परिज्ञेयं योगिना हितमिच्छता।

आत्मनो वा परेषां वा नान्यथा तदवाप्यते॥४.२६॥

etatsarvaṁ parijñeyaṁ yoginā hitamicchatā|
ātmano vā pareṣāṁ vā nānyathā tadavāpyate||4.26||

द्वावेव मोक्षदौ ज्ञेयौ ज्ञानी योगी च शाङ्करि।

पृथक्त्वात्तत्र बोद्धव्यं फलकाङ्क्षिभिः॥४.२७॥

dvāveva mokṣadau jñeyau jñānī yogī ca śāṅkari|
pṛthaktvāttatra boddhavyaṁ phalakāṅkṣibhiḥ||4.27||

ज्ञानं तत्त्रिविधं प्रोक्तं तत्राद्यं श्रुतमिष्यते।

चिन्तामयमथान्यच्च भावनामयमेव च॥४.२८॥

jñānaṁ tattrividhaṁ proktaṁ tatrādyaṁ śrutamiṣyate|
cintāmayamathānyacca bhāvanāmayameva ca||4.28||

शास्त्रार्थस्य परिज्ञानं विक्षिप्तस्य श्रुतं मतम्।

इदमत्रेदमत्रेति इदमत्रोपयुज्यते॥४.२९॥

śāstrārthasya parijñānaṁ vikṣiptasya śrutaṁ matam|
idamatredamatreti idamatropayujyate||4.29||

सर्वमालोच्य शास्त्रार्थमानुपूर्व्या व्यवस्थितम्।

तद्वच्चिन्तामयं ज्ञानं द्विरूपमुपदिश्यते॥४.३०॥

sarvamālocya śāstrārthamānupūrvyā vyavasthitam|
tadvaccintāmayaṁ jñānaṁ dvirūpamupadiśyate||4.30||

मन्दस्वभ्यस्तभेदेन तत्र स्वभ्यस्तमुच्यते।

सुनिष्पन्ने ततस्तस्मिञ्जायते भावनामयम्॥४.३१॥

mandasvabhyastabhedena tatra svabhyastamucyate|
suniṣpanne tatastasmiñjāyate bhāvanāmayam||4.31||

यतो योगं समासाद्य योगी योगफलं लभेत्।

एवं विज्ञानभेदेन ज्ञानी प्रोक्तश्चतुर्विधः॥४.३२॥

yato yogaṁ samāsādya yogī yogaphalaṁ labhet|
evaṁ vijñānabhedena jñānī proktaścaturvidhaḥ||4.32||

सम्प्राप्तो घटमानश्च सिद्धः सिद्धतमोऽन्यथा।

योगी चतुर्विधो देवि यथावत्प्रतिपद्यते॥४.३३॥

samprāpto ghaṭamānaśca siddhaḥ siddhatamo'nyathā|
yogī caturvidho devi yathāvatpratipadyate||4.33||

समावेशोक्तिवद्योगस्त्रिविधः समुदाहृतः।

तत्र प्राप्तोपदेशस्तु पारम्पर्यक्रमेण यः॥४.३४॥

samāveśoktivadyogastrividhaḥ samudāhṛtaḥ|
tatra prāptopadeśastu pāramparyakrameṇa yaḥ||4.34||

प्राप्तयोगः स विज्ञेयस्त्रिविधोऽपि मनीषिभिः।

चेतसो घटनं तत्त्वाच्चलितस्य पुनः पुनः॥४.३५॥

prāptayogaḥ sa vijñeyastrividho'pi manīṣibhiḥ|
cetaso ghaṭanaṁ tattvāccalitasya punaḥ punaḥ||4.35||

यः करोति तमिच्छन्ति घटमानं मनीषिणः।

तदेव चेतसा नान्यद्द्वितीयमवलम्बते॥४.३६॥

yaḥ karoti tamicchanti ghaṭamānaṁ manīṣiṇaḥ|
tadeva cetasā nānyaddvitīyamavalambate||4.36||

सिद्धयोगस्तदा ज्ञेयो योगो योगफलार्थिभिः।

यः पुनर्यत्र तत्रैव संस्थितोऽपि यथा तथा॥४.३७॥

siddhayogastadā jñeyo yogo yogaphalārthibhiḥ|

yaḥ punaryatra tatraiva saṁsthito'pi yathā tathā||4.37||

भुञ्जानस्तत्फलं तेन हीयते न कथञ्चन।

सुसिद्धः स तु बोद्धव्यः सदाशिवसमः प्रिये॥४.३८॥

bhuñjānastatphalaṁ tena hīyate na kathañcana|
susiddhaḥ sa tu boddhavyaḥ sadāśivasamaḥ priye||4.38||

उत्तरोत्तरवैशिष्ट्यमेतेषां समुदाहृतम्।

ज्ञानिनां योगिनां चैव सिद्धो योगविदुत्तमः॥४.३९॥

uttarottaravaiśiṣṭyameteṣāṁ samudāhṛtam|
jñāninām yogināṁ caiva siddho yogaviduttamaḥ||4.39||

यतोऽस्य ज्ञानमप्यस्ति पूर्वो योगफलोज्झितः।

यतश्च मोक्षदः प्रोक्तः स्वभ्यस्तज्ञानवान्बुधैः॥४.४०॥

yato'sya jñānamapyasti pūrvo yogaphalojjhitaḥ|
yataśca mokṣadaḥ proktaḥ svabhyastajñānavānbudhaiḥ||4.40||

इत्येतत्कथितं सर्वं विज्ञेयं योगिपूजिते।

तन्त्रार्थमुपसंहृत्य समासाद्योगिनां हितम्॥४.४१॥

ityetatkathitaṁ sarvaṁ vijñeyaṁ yogipūjite|
tantrārthamupasaṁhṛtya samāsādyogināṁ hitam||4.41||

इति श्रीमालिनीविजयोत्तरे तन्त्रे चतुर्थोऽधिकारः॥४॥

iti śrīmālinīvijayottare tantre caturtho'dhikāraḥ||4||

## भुवनाध्वाधिकारः पञ्चमः ५॥

अथ पञ्चमोऽधिकारः।

atha pañcamo'dhikāraḥ|

अथातः सम्प्रवक्ष्यामि भुवनाध्वानमीश्वरि।

आदौ कालाग्निभुवनं शोधितव्यं प्रयत्नतः॥५.१॥

athātaḥ sampravakṣyāmi bhuvanādhvānamīśvari|

ādau kālāgnibhuvanaṁ śodhitavyaṁ prayatnataḥ||5.1||

अवीचिः कुम्भीपाकश्च रौरवश्च तृतीयकः।

कूष्माण्डभुवने शुद्धे सर्वे शुद्धा न संशयः॥५.२॥

avīciḥ kumbhīpākaśca rauravaśca tṛtīyakaḥ|

kūṣmāṇḍabhuvane śuddhe sarve śuddhā na saṁśayaḥ||5.2||

पातालानि ततः सप्त तेषामादौ महातलम्।

रसातलं ततश्चान्यत्तलातलमतः परम्॥५.३॥

pātālāni tataḥ sapta teṣāmādau mahātalam|

rasātalaṁ tataścānyattalātalamataḥ param||5.3||

सुतलं नितलं चेति वितलं तलमेव च।

हाटकेन विशुद्धेन सर्वेषां शुद्धिरिष्यते॥५.४॥

sutalaṁ nitalaṁ ceti vitalaṁ talameva ca|

hāṭakena viśuddhena sarveṣāṁ śuddhiriṣyate||5.4||

तदूर्ध्वं पृथिवी ज्ञेया सप्तद्वीपार्णवान्विता।

देवानामाश्रयो मेरुस्तन्मध्ये संव्यवस्थितः॥५.५॥

tadūrdhvaṁ pṛthivī jñeyā saptadvīpārṇavānvitā|

devānāmāśrayo merustanmadhye saṁvyavasthitaḥ||5.5||

भुवोलोकस्तदूर्ध्वे च स्वर्लोकस्तस्य चोपरि।

महो जनस्तपः सत्यमित्येतल्लोकसप्तकम्॥५.६॥

bhuvolokastadūrdhve ca svarlokastasya copari|
maho janastapaḥ satyamityetallokasaptakam||5.6||

चतुर्दशविधो यत्र भूतग्रामः प्रवर्तते।

स्थावरः सर्पजातिश्च पक्षिजातिस्तथापरा॥५.७॥

caturdaśavidho yatra bhūtagrāmaḥ pravartate|
sthāvaraḥ sarpajātiśca pakṣijātistathāparā||5.7||

मृगसञ्ज्ञश्च पश्चाख्यः पञ्चमोऽन्यश्च मानुषः।

पैशाचो राक्षसो याक्षो गान्धर्वश्चैन्द्र एव च॥५.८॥

mṛgasañjñaśca paścākhyaḥ pañcamo'nyaśca mānuṣaḥ|
paiśāco rākṣaso yākṣo gāndharvaścaindra eva ca||5.8||

सौम्यश्च प्राजापत्यश्च ब्राह्मश्चात्र चतुर्दश।

सर्वस्यैवास्य संशुद्धिर्ब्राह्मे संशोधिते सति॥५.९॥

saumyaśca prājāpatyaśca brāhmaścātra caturdaśa|
sarvasyaivāsya saṁśuddhirbrāhme saṁśodhite sati||5.9||

भुवनं वैष्णवं तस्मान्मदीयं तदनन्तरम्।

तत्र शुद्धे भवेच्छुद्धं सर्वमेतन्न संशयः॥५.१०॥

bhuvanaṁ vaiṣṇavaṁ tasmānmadīyaṁ tadanantaram|
tatra śuddhe bhavecchuddhaṁ sarvametanna saṁśayaḥ||5.10||

कालाग्निपूर्वकैरेभिर्भुवनैः पञ्चभिः प्रिये।

शुद्धैः सर्वमिदं शुद्धं ब्रह्माण्डान्तर्व्यवस्थितम्॥५.११॥

kālāgnipūrvakairebhirbhuvanaiḥ pañcabhiḥ priye|
śuddhaiḥ sarvamidaṁ śuddhaṁ brahmāṇḍāntarvyavasthitam||5.11||

तद्बहिः शतरुद्राणां भुवनानि पृथक् पृथक्।

दश संशोधयेत्पश्चादेकं तन्नायकावृतम्॥५.१२॥

tadbahiḥ śatarudrāṇāṁ bhuvanāni pṛthak pṛthak|
daśa saṁśodhayetpaścādekaṁ tannāyakāvṛtam||5.12||

अनन्तः प्रथमस्तेषां कपालीशस्तथापरः।

अग्निरुद्रो यमश्चैव नैर्ऋतो बल एव च॥५.१३॥

anantaḥ prathamasteṣāṁ kapālīśastathāparaḥ|
agnirudro yamaścaiva nairṛto bala eva ca||5.13||

शीघ्रो निधीश्वरश्चैव सर्वविद्याधिपोऽपरः।

शम्भुश्च वीरभद्रश्च विधूमज्वलनप्रभः॥५.१४॥

śīghro nidhīśvaraścaiva sarvavidyādhipo'paraḥ|
śambhuśca vīrabhadraśca vidhūmajvalanaprabhaḥ||5.14||

एभिर्दशैकसङ्ख्यातैः शुद्धैं शुद्धं शतं मतम्।

उपरिष्टात्पुरस्तेषामष्टकाः पञ्च संस्थिताः॥५.१५॥

ebhirdaśaikasaṅkhyātaiḥ śuddhaiṁ śuddhaṁ śataṁ matam|
upariṣṭātpurasteṣāmaṣṭakāḥ pañca saṁsthitāḥ||5.15||

लकुली भारभूतिश्च दिण्ढ्याषाढी सपुष्करौ।

नैमिषं च प्रभासं च अमरेशमथाष्टकम्॥५.१६॥

lakulī bhārabhūtiśca diṇḍhyāṣāḍhī sapuṣkarau|
naimiṣaṁ ca prabhāsaṁ ca amareśamathāṣṭakam||5.16||

एतत्पत्यष्टकं प्रोक्तमतो गुह्यातिगुह्यकम्।

तत्र भैरवकेदारमहाकालाः समध्यमाः॥५.१७॥

etatpatyaṣṭakaṁ proktamato guhyātiguhyakam|
tatra bhairavakedāramahākālāḥ samadhyamāḥ||5.17||

आम्रातिकेशजल्पेशश्रीशैलाः सहरीन्दवः।

भीमेश्वरमहेन्द्राट्टहासाः सविमलेश्वराः॥५.१८॥

āmrātikeśajalpeśaśrīśailāḥ saharīndavaḥ|

bhīmeśvaramahendrādṛhāsāḥ savimaleśvarāḥ||5.18||

कनखलं नाखलं च कुरुक्षेत्रं गया तथा।

गुह्यमेतत्तृतीयं तु पवित्रमधुनोच्यते॥५.१९॥

kanakhalaṁ nākhalaṁ ca kurukṣetraṁ gayā tathā|
guhyametattṛtīyaṁ tu pavitramadhunocyate||5.19||

स्थाणुस्वर्णाक्षकावाद्यौ भद्रगोकर्णकौ परौ।

महाकालाविमुक्तेशरुद्रकोट्यम्बरापदाः॥५.२०॥

sthāṇusvarṇākṣakāvādyau bhadragokarṇakau parau|
mahākālāvimukteśarudrakoṭyambarāpadāḥ||5.20||

स्थूलः स्थूलेश्वरः शङ्कुकर्णकालञ्जरावपि।

मण्डलेश्वरमाकोटद्विरण्डछगलाण्डकौ॥५.२१॥

sthūlaḥ sthūleśvaraḥ śaṅkukarṇakālañjarāvapi|
maṇḍaleśvaramākoṭadviraṇḍachagalāṇḍakau||5.21||

स्थाण्वष्टकमिति प्रोक्तमहङ्कारावधि स्थितम्।

देवयोन्यष्टकं बुधौ कथ्यमानं मया शृणु॥२२॥

sthāṇvaṣṭakamiti proktamahaṅkārāvadhi sthitam|
devayonyaṣṭakaṁ budhau kathyamānaṁ mayā śṛṇu||5.22||

पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च।

तथा सौम्यं सप्राजेशं ब्राह्ममष्टममिष्यते॥५.२३॥

paiśācaṁ rākṣasaṁ yākṣaṁ gāndharvaṁ caindrameva ca|
tathā saumyaṁ saprājeśaṁ brāhmamaṣṭamamiṣyate||5.23||

योगाष्टकं प्रधाने तु तत्रादावकृतं भवेत्।

कृतं च वैभवं ब्राह्मं वैष्णवं तदनन्तरम्॥५.२४॥

yogāṣṭakaṁ pradhāne tu tatrādāvakṛtaṁ bhavet|
kṛtaṁ ca vaibhavaṁ brāhmaṁ vaiṣṇavaṁ tadanantaram||5.24||

कौमारमौमं श्रैकण्ठमिति योगाष्टकं तथा।

पुरुषे वामभीमोग्रभवेशानैकवीरकाः॥५.२५॥

kaumāramaumaṁ śraikaṇṭhamiti yogāṣṭakaṁ tathā|
puruṣe vāmabhīmograbhaveśānaikavīrakāḥ||5.25||

प्रचण्डोमाधवाजाश्च अनन्तैकशिवावथ।

क्रोधेशचण्डौ विद्यायां संवर्तो ज्योतिरेव च॥५.२६॥

pracaṇḍomādhavājāśca anantaikaśivāvatha|
krodheśacaṇḍau vidyāyāṁ saṁvarto jyotireva ca||5.26||

कलातत्त्वे परिज्ञेयौ सुरपञ्चान्तकौ परे।

एकवीरशिखण्डीशश्रीकण्ठाः कालमाश्रिताः॥५.२७॥

kalātattve parijñeyau surapañcāntakau pare|
ekavīraśikhaṇḍīśaśrīkaṇṭhāḥ kālamāśritāḥ||5.27||

महातेजः प्रभृतयो मण्डलेशानसञ्ज्ञकाः।

मायातत्त्वे स्थितास्तत्र वामदेवभवोद्भवौ॥५.२८॥

mahātejaḥ prabhṛtayo maṇḍaleśānasañjñakāḥ|
māyātattve sthitāstatra vāmadevabhavodbhavau||5.28||

एकपिङ्गेक्षणेशानभुवनेशपुरः सराः।

अङ्गुष्ठमात्रसहिताः कालानलसमत्विषः॥५.२९॥

ekapiṅgekṣaṇeśānabhuvaneśapuraḥ sarāḥ|
aṅguṣṭhamātrasahitāḥ kālānalasamatviṣaḥ||5.29||

विद्यातत्त्वेऽपि पञ्चाहुर्भुवनानि मनीषिणः।

तत्र हालाहलः पूर्वो रुद्रः क्रोधस्तथापरः॥५.३०॥

vidyātattve'pi pañcāhurbhuvanāni manīṣiṇaḥ|
tatra hālāhalaḥ pūrvo rudraḥ krodhastathāparaḥ||5.30||

अम्बिका च अघोरा च वामदेवी च कीर्त्यते।

ईश्वरे पिवनाद्याः स्युरघोरान्ता महेश्वराः॥५.३१॥
ambikā ca aghorā ca vāmadevī ca kīrtyate|
īśvare pivanādyāḥ syuraghorāntā maheśvarāḥ||5.31||

रौद्री ज्येष्ठा च वामा च तथा शक्तिसदाशिवौ।
एतानि सकले पञ्च भुवनानि विदुर्बुधाः॥५.३२॥
raudrī jyeṣṭhā ca vāmā ca tathā śaktisadāśivau|
etāni sakale pañca bhuvanāni vidurbudhāḥ||5.32||

एवं तु सर्वतत्त्वेषु शतमष्टादशोत्तरम्।
भुवनानां परिज्ञेयं सङ्क्षेपान्न तु विस्तरात्॥५.३३॥
evaṁ tu sarvatattveṣu śatamaṣṭādaśottaram|
bhuvanānāṁ parijñeyaṁ saṅkṣepānna tu vistarāt||5.33||

शुद्धेनानेन शुद्ध्यन्ति सर्वाण्यपि न शंशयः।
सर्वमार्गविशुद्धौ तु कर्तव्यायां महामतिः॥५.३४॥
śuddhenānena śuddhyanti sarvāṇyapi na śaṁśayaḥ|
sarvamārgaviśuddhau tu kartavyāyāṁ mahāmatiḥ||5.34||

सकलावधि संशोध्य शिवे योगं प्रकल्पयेत्।
बुभुक्षोः सकलं ध्यात्वा योगं कुर्वीत योगवित्॥५.३५॥
sakalāvadhi saṁśodhya śive yogaṁ prakalpayet|
bubhukṣoḥ sakalaṁ dhyātvā yogaṁ kurvīta yogavit||5.35||

इत्येष कीर्तितो मार्गो भुवनाख्यस्य मे मतः।
ityeṣa kīrtito mārgo bhuvanākhyasya me mataḥ|

इति श्रीमालिनीविजयोत्तरे तन्त्रे भुवनाध्वाधिकारः पञ्चमः॥५॥
iti śrīmālinīvijayottare tantre bhuvanādhvādhikāraḥ pañcamaḥ||5||

देहमार्गाधिकारः षष्ठः ६ ॥

अथ षष्ठोऽधिकारः।

atha ṣaṣṭho'dhikāraḥ|

अथास्य वस्तुजातस्य यथा देहे व्यवस्थितिः।
क्रियते ज्ञानदीक्षासु तथेदानीं निगद्यते॥ ६.१॥
athāsya vastujātasya yathā dehe vyavasthitiḥ|
kriyate jñānadīkṣāsu tathedānīṁ nigadyate||6.1||

पादाधः पञ्चभूतानी व्याप्त्या द्व्यङ्गुलया न्यसेत्।
धरातत्त्वं च गुल्फान्तमवादीनि ततः क्रमात्॥ ६.२॥
pādādhaḥ pañcabhūtānī vyāptyā dvyaṅgulayā nyaset|
dharātattvaṁ ca gulphāntamavādīni tataḥ kramāt||6.2||

तद्वत्तदुपरिष्टात्तु पर्वषट्कावसानकम्।
पुंस्तत्त्वात्कलातत्त्वान्तं तत्त्वषट्कं विचिन्तयेत्॥ ६.३॥
tadvattadupariṣṭāttu parvaṣaṭkāvasānakam|
puṁstattvātkalātattvāntaṁ tattvaṣaṭkaṁ vicintayet||6.3||

ततो मायादितत्त्वानि चत्वारि सुसमाहितः।
चतुरङ्गुलया व्याप्त्या सकलान्तानि भावयेत्॥ ६.४॥
tato māyāditattvāni catvāri susamāhitaḥ|
caturaṅgulayā vyāptyā sakalāntāni bhāvayet||6.4||

शिवतत्त्वं ततः पश्चात्तेजोरूपमनाकुलम्।
सर्वेषां व्यापकत्वेन सबाह्याभ्यन्तरं स्मरेत्॥ ६.५॥
śivatattvaṁ tataḥ paścāttejorūpamanākulam|
sarveṣāṁ vyāpakatvena sabāhyābhyantaraṁ smaret||6.5||

षट्त्रिंशत्तत्त्वभेदेन न्यासोऽयं समुदाहृतः।

अधुना पञ्चतत्त्वानि यथा देहे तथोच्यते॥ ६.६॥

ṣaṭtriṁśattattvabhedena nyāso'yaṁ samudāhṛtaḥ|
adhunā pañcatattvāni yathā dehe tathocyate||6.6||

नाभेरूर्ध्वं तु यावत्स्यात्पर्वषट्कमनुक्रमात्।

धरातत्त्वेन गुल्फान्तं व्याप्तं शेषमिहाम्बुना॥ ६.७॥

nābherūrdhvaṁ tu yāvatsyātparvaṣaṭkamanukramāt|
dharātattvena gulphāntaṁ vyāptaṁ śeṣamihāmbunā||6.7||

द्वाविंशतिश्च पर्वाणि तदूर्ध्वं तेजसावृतम्।

तस्माद्द्वादश पर्वाणि वायुव्याप्तिरुदाहृता॥ ६.८॥

dvāviṁśatiśca parvāṇi tadūrdhvaṁ tejasāvṛtam|
tasmāddvādaśa parvāṇi vāyuvyāptirudāhṛtā||6.8||

आकाशान्तं परं शान्तं सर्वेषां व्यापकं स्मरेत्।

शक्त्यादिपञ्चखण्डाध्वविधिष्वप्येवमिष्यते॥ ६.९॥

ākāśāntaṁ paraṁ śāntaṁ sarveṣāṁ vyāpakaṁ smaret|
śaktyādipañcakhaṇḍādhvavidhiṣvapyevamiṣyate||6.9||

त्रिखण्डे कण्ठपर्यन्तमात्मतत्त्वमुदाहृतम्।

विद्यातत्त्वमतोर्ध्वं तु शिवतत्त्वं तु पूर्ववत्॥ ६.१०॥

trikhaṇḍe kaṇṭhaparyantamātmatattvamudāhṛtam|
vidyātattvamatordhvaṁ tu śivatattvaṁ tu pūrvavat||6.10||

एवं तत्त्वविधिः प्रोक्तो भुवनाध्वा तथोच्यते।

कालाग्नेर्वीरभद्रान्तं पुरषोडशकं ततः॥ ६.११॥

evaṁ tattvavidhiḥ prokto bhuvanādhvā tathocyate|
kālāgnervīrabhadrāntaṁ puraṣoḍaśakaṁ tataḥ||6.11||

गुल्फान्तं विन्यसेद्ध्यात्वा यथावदनुपूर्वशः।

तस्मादेकाङ्गुलव्याप्त्या लकुलीशादितः क्रमात्॥ ६.१२॥

gulphāntaṁ vinyaseddhyātvā yathāvadanupūrvaśaḥ|
tasmādekāṅgulavyāptyā lakulīśāditaḥ kramāt||6.12||

विन्यसेत्तु द्विरण्डान्तं त्र्यङ्गुलं छगलाण्डकम्।

ततः पादाङ्गुलव्याप्त्या देवयोगाष्टकं पृथक्॥ ६.१३॥

vinyasettu dviraṇḍāntaṁ tryaṅgulaṁ chagalāṇḍakam|
tataḥ pādāṅgulavyāptyā devayogāṣṭakaṁ pṛthak||6.13||

ततोऽप्यर्धाङ्गुलव्याप्त्या पुरषट्कमनुक्रमात्।

चतुष्कं तु द्वयेऽन्यस्मिन्नेकमेकत्र चिन्तयन्॥ ६.१४॥

tato'pyardhāṅgulavyāptyā puraṣaṭkamanukramāt|
catuṣkaṁ tu dvaye'nyasminnekamekatra cintayan||6.14||

उत्तरादिक्रमाद्द्व्येकभेदो विद्यादिके त्रये।

काले प्रत्येकमुद्दिष्टमेकैक तु यथाक्रमम्॥ ६.१५॥

uttarādikramāddvyekabhedo vidyādike traye|
kāle pratyekamuddiṣṭamekaika tu yathākramam||6.15||

मण्डलाधिपतीनां तु व्याप्तिरर्धाङ्गुला मता।

त्रिभागन्यूनपर्वाख्या त्रितयस्य तथोपरि॥ ६.१६॥

maṇḍalādhipatīnāṁ tu vyāptirardhāṅgulā matā|
tribhāganyūnaparvākhyā tritayasya tathopari||6.16||

द्वितीयस्य तु सम्पूर्णा पञ्चकं समुदाहृतम्।

अष्टकं पञ्चकं चान्यदेवमेव विलक्षयेत्॥ ६.१७॥

dvitīyasya tu sampūrṇā pañcakaṁ samudāhṛtam|
aṣṭakaṁ pañcakaṁ cānyadevameva vilakṣayet||17||

भुवनाध्वविधावत्र पूर्ववच्चिन्तयेच्छिवम्।

पदानि द्विविधान्यत्र वर्गविद्याविभेदता॥ ६.१८॥

bhuvanādhvavidhāvatra pūrvavaccintayecchivam|

padāni dvividhānyatra vargavidyāvibhedatā||6.18||

तेषां तन्मन्त्रवद्व्याप्तिर्यथेदानीं तथा शृणु।
चतुरङ्गुलमाद्यं तु द्वे चान्यऽष्टाङ्गुले पृथक्॥६.१९॥
teṣāṁ tanmantravadvyāptiryathedānīṁ tathā śṛṇu|
caturaṅgulamādyaṁ tu dve cānya'ṣṭāṅgule pṛthak||6.19||

दशाङ्गुलानि त्रीएयस्मादेकं पञ्चदशाङ्गुलम्।
चतुर्भिरधिकैरन्यन्नवमं व्यापकं महत्॥६.२०॥
daśāṅgulāni trīeyasmādekaṁ pañcadaśāṅgulam|
caturbhiradhikairanyannavamaṁ vyāpakaṁ mahat||6.20||

ऊनविंशतिके भेदे पदानां व्याप्तिरुच्यते।
एकैकं द्व्यङ्गुलं ज्ञेयं ततः पूर्व पदत्रयम्॥६.२१॥
ūnaviṁśatike bhede padānāṁ vyāptirucyate|
ekaikaṁ dvyaṅgulaṁ jñeyaṁ tataḥ pūrva padatrayam||6.21||

सप्ताङ्गुलानि चत्वारि दशाङ्गुलमतः परम्।
द्व्यङ्गुलं द्वे पदे चान्ये षडङ्गुलमतः परम्॥६.२२॥
saptāṅgulāni catvāri daśāṅgulamataḥ param|
dvyaṅgulaṁ dve pade cānye ṣaḍaṅgulamataḥ param||6.22||

द्वादशाङ्गुलमन्यच्च द्वेऽन्ये पञ्चाङ्गुले पृथक्।
पदद्वयं चतुष्पर्व द्वे पूर्वे द्वे पृथक्ततः॥६.२३॥
dvādaśāṅgulamanyacca dve'nye pañcāṅgule pṛthak|
padadvayaṁ catuṣparva dve pūrve dve pṛthaktataḥ||6.23||

व्यापकं पदम् अन्यच् च पूर्ववत् परिकीर्तितम्
अपरोऽयं विधिः प्रोक्तः परापरमतः शृणु॥६.२४॥
vyāpakaṁ padam anyac ca pūrvavat parikīrtitam|
aparo'yaṁ vidhiḥ proktaḥ parāparamataḥ śṛṇu||6.24||

पूर्ववत्पृथिवी तत्त्वं विज्ञेयं चतुरङ्गुलम्।

सार्धद्व्यङ्गुलमानानि धिषणान्तानि लक्षयेत्॥६.२५॥

pūrvavatpṛthivī tattvaṁ vijñeyaṁ caturaṅgulam|
sārdhadvyaṅgulamānāni dhiṣaṇāntāni lakṣayet||6.25||

प्रधानं त्र्यङ्गुलं ज्ञेयं शेषं पूर्ववदादिशेत्।

परेऽपि पूर्ववत्पृथ्वी त्र्यङ्गुलान्यपराणि च॥६.२६॥

pradhānaṁ tryaṅgulaṁ jñeyaṁ śeṣaṁ pūrvavadādiśet|
pare'pi pūrvavatpṛthvī tryaṅgulānyaparāṇi ca||6.26||

चतुष्पर्व प्रधानं च शेषं पूर्ववदाश्रयेत्।

द्विविधोऽपि हि वर्णानां षड्विधो भेद उच्यते॥६.२७॥

catuṣparva pradhānaṁ ca śeṣaṁ pūrvavadāśrayet|
dvividho'pi hi varṇānāṁ ṣaḍvidho bheda ucyate||6.27||

तत्त्वमार्गविधानेन ज्ञातव्यः परमार्थतः।

पदमन्त्रकलादीनां पूर्वसूत्रानुसारतः॥६.२८॥

tattvamārgavidhānena jñātavyaḥ paramārthataḥ|
padamantrakalādīnāṁ pūrvasūtrānusārataḥ||6.28||

त्रितयत्वं प्रकुर्वीत तत्त्ववर्णोक्तवर्त्मना।

इत्थं भूतशरीरस्य गुरुणा शिवमूर्तिना॥६.२९॥

tritayatvaṁ prakurvīta tattvavarṇoktavartmanā|
itthaṁ bhūtaśarīrasya guruṇā śivamūrtinā||6.29||

प्रकर्तव्या विधानेन दीक्षा सर्वफलप्रदा।

prakartavyā vidhānena dīkṣā sarvaphalapradā|

इति श्रीमालिनीविजयोत्तरे तन्त्रे देहमार्गाधिकारः षष्ठः॥६॥

iti śrīmālinīvijayottare tantre dehamārgādhikāraḥ ṣaṣṭhaḥ||6||

मुद्राधिकारः सप्तमः ७ ॥

अथ सप्तमोऽधिकारः।

atha saptamo'dhikāraḥ|

अथातः सम्प्रवक्ष्यामि मुद्राख्याः शिवशक्तयः।

याभिः संरक्षितो मन्त्री मन्त्रसिद्धिमवाप्नुयात्॥ ७.१ ॥

athātaḥ sampravakṣyāmi mudrākhyāḥ śivaśaktayaḥ|
yābhiḥ saṁrakṣito mantrī mantrasiddhimavāpnuyāt||7.1||

त्रिशूलं च तथा पद्मं शक्तिश्चक्रं सवज्रकम्।

दण्डदंष्ट्रे महाप्रेता महामुद्रा खगेश्वरी॥ ७.२ ॥

triśūlaṁ ca tathā padmaṁ śaktiścakraṁ savajrakam|
daṇḍadaṁṣṭre mahāpretā mahāmudrā khageśvarī||7.2||

महोदया कराला च खट्वाङ्गं सकपालकम्।

हलं पाशाङ्कुशं घण्टा मुद्गरस्त्रिशिखोऽपरः॥ ७.३ ॥

mahodayā karālā ca khaṭvāṅgaṁ sakapālakam|
halaṁ pāśāṅkuśaṁ ghaṇṭā mudgarastriśikho'paraḥ||7.3||

आवाहस्थापनीरोधा द्रव्यदा नतिरेव च।

अमृता योगमुद्रेति विज्ञेया वीरवन्दिते॥ ७.४ ॥

āvāhasthāpanīrodhā dravyadā natireva ca|
amṛtā yogamudreti vijñeyā vīravandite||7.4||

तर्जनीमध्यमानामा दक्षिणस्य प्रसारिताः।

कनिष्ठाङ्गुष्ठकाक्रान्तास्त्रिशूलं परिकीर्तितम्॥ ७.५ ॥

tarjanīmadhyamānāmā dakṣiṇasya prasāritāḥ|
kaniṣṭhāṅguṣṭhakākrāntāstriśūlaṁ parikīrtitam||7.5||

पद्माकारौ करौ कृत्वा पद्ममुद्रां प्रदर्शयेत्।

संमुखौ प्रसृतौ कृत्वा करानन्तरिताङ्गुली॥७.६॥

padmākārau karau kṛtvā padmamudrāṁ pradarśayet|
saṁmukhau prasṛtau kṛtvā karānantaritāṅgulī||7.6||

प्रसृते मध्यमे लग्ने कौमार्याः शक्तिरिष्य।

उत्तानवाममुष्टेस्तु दक्ष[६] ॥७.७॥

prasṛte madhyame lagne kaumāryāḥ śaktir iṣyate|
uttānavāmamuṣṭes tu dakṣa[6]|| 7.7||

[४] क्षिपेन्मुष्टिं चक्रं नारायणीप्रियम् ।

उत्तानवामकस्योर्ध्वं न्यसेद्दक्षमधोमुखम्॥७.८॥

[4] kṣipen muṣṭiṃ cakraṃ nārāyaṇīpriyam|
uttānavāmakasyordhvaṃ nyased dakṣam adhomukham||7.8||

कनिष्ठाङ्गुष्ठकौ श्लिष्टौ शेषाः स्युर्मणिबन्धगाः।

वज्रमुद्रेति विख्याता चैन्द्री सन्तोषकारिका॥७.९॥

kaniṣṭhāṅguṣṭhakau śliṣṭau śeṣāḥ syurmaṇibandhagāḥ|
vajramudreti vikhyātā caindrī santoṣakārikā||7.9||

ऊर्द्धप्रसारितो मुष्टिर्दक्षिणोऽङ्गुष्ठगर्भगः।

दण्डमुद्रेति विख्याता वैवस्वतकुलप्रिया॥७.१०॥

ūrddhvaprasārito muṣṭirdakṣiṇo'ṅguṣṭhagarbhagaḥ|
daṇḍamudreti vikhyātā vaivasvatakulapriyā||7.10||

वामतो वक्रगां कुर्याद्वाममुष्टेः कनिष्ठिकाम्।

दंष्ट्रेयं कीर्तिता देवि चामुण्डाकुलनन्दिनी॥७.११॥

vāmato vaktragāṁ kuryādvāmamuṣṭeḥ kaniṣṭhikām|
daṁṣṭreyaṁ kīrtitā devi cāmuṇḍākulanandinī||7.11||

वामजानुगतं पादं हस्तौ पृष्ठप्रलम्बिनौ।

विकृते लोचने ग्रीवा भग्ना जिह्वा प्रसारिता॥७.१२॥

vāmajānugataṁ pādaṁ hastau pṛṣṭhapralambinau|
vikṛte locane grīvā bhagnā jihvā prasāritā||7.12||

सर्वयोगिगणस्येष्टा प्रीता योगीश्वरी मता।
हस्तावधोमुखौ पद्भ्यां हृदयान्तं नयेद्बुधः॥७.१३॥

sarvayogigaṇasyeṣṭā prītā yogīśvarī matā|
hastāvadhomukhau padbhyāṁ hṛdayāntaṁ nayedbudhaḥ||7.13||

तिर्यग्मुखान्तमुपरि संमुखावूर्ध्वगौ नयेत्।
महामुद्रेति विख्याता देहशोधनकर्मणि॥७.१४॥

tiryagmukhāntamupari saṁmukhāvūrdhvagau nayet|
mahāmudreti vikhyātā dehaśodhanakarmaṇi||7.14||

सर्वकर्मकरी चैषा योगिनां योगसिद्धये।
वद्ध्वा पद्मासनं योगी नाभावक्षेश्वरं न्यसेत्॥७.१५॥

sarvakarmakarī caiṣā yogināṁ yogasiddhaye|
vaddhvā padmāsanaṁ yogī nābhāvakṣeśvaraṁ nyaset||7.15||

दण्डाकारं तु तं भावं नयेद्यावत्कखत्रयम्।
निगृह्य तत्र तत्तूर्णं प्रेरयेत् खत्रयेण तु॥७.१६॥

daṇḍākāraṁ tu taṁ bhāvaṁ nayedyāvatkakhatrayam|
nigṛhya tatra tattūrṇaṁ prerayet khatrayeṇa tu||7.16||

एतां बद्ध्वा महावीरः खेगतिं प्रतिपद्यते।
अधोमुखस्य दक्षस्य वाममुत्तानमूर्ध्वतः॥७.१७॥

etāṁ baddhvā mahāvīraḥ khegatiṁ pratipadyate|
adhomukhasya dakṣasya vāmamuttānamūrdhvataḥ||7.17||

अनामामध्यमे तस्य वामाङ्गुष्ठेन पीडयेत्।
तर्जन्या तत्कनिष्ठां च तर्जनीं च कनिष्ठया॥७.१८॥

anāmāmadhyame tasya vāmāṅguṣṭhena pīḍayet|

tarjanyā tatkaniṣṭhāṁ ca tarjanīṁ ca kaniṣṭhayā||7.18||

मध्यममानामिकाभ्यां च तदङ्गुष्ठं निपीडयेत्।
मुद्रा महोदयाख्येयं महोदयकरी नृणाम्॥७.१९॥
madhyamānāmikābhyāṁ ca tadaṅguṣṭhaṁ nipīḍayet|
mudrā mahodayākhyeyaṁ mahodayakarī nṛṇām||7.19||

अनामिकाकनिष्ठाभ्यां सृक्कण्यौ प्रविदारयेत्।
जिह्वां च चालयेन्मन्त्री हाहाकारं च कारयेत्॥७.२०॥
anāmikākaniṣṭhābhyāṁ sṛkvaṇyau pravidārayet|
jihvāṁ ca cālayenmantrī hāhākāraṁ ca kārayet||7.20||

क्रुद्धदृष्टिः करालेयं मुद्रा दुष्टभयङ्करी।
वामस्कन्धगतो वाममुष्टिरुच्छ्रिततर्जनी॥७.२१॥
kruddhadṛṣṭiḥ karāleyaṁ mudrā duṣṭabhayaṅkarī|
vāmaskandhagato vāmamuṣṭirucchritatarjanī||7.21||

खट्वाङ्गाख्या स्मृता मुद्रा कपालमधुना शृणु।
निम्नं पाणितलं दक्षमीषत्सङ्कुचिताङ्गुलि॥७.२२॥
khaṭvāṅgākhyā smṛtā mudrā kapālamadhunā śṛṇu|
nimnaṁ pāṇitalaṁ dakṣamīṣatsaṅkucitāṅguli||7.22||

कपालमिति विज्ञेयमधुना हलमुच्यते।
मुष्टिबद्धस्य दक्षस्य तर्जनी वाममुष्टिना॥७.२३॥
kapālamiti vijñeyamadhunā halamucyate|
muṣṭibaddhasya dakṣasya tarjanī vāmamuṣṭinā||7.23||

वक्रतर्जनिना ग्रस्ता हलमुद्रेति कीर्तिता।
मुष्ट्या गयोर्दक्षवामयोस्तर्जनीद्वयम्॥७.२४॥
vakratarjaninā grastā halamudreti kīrtitā|
muṣṭyā gayordakṣavāmayostarjanīdvayam||7.24||

वामाङ्गुष्ठाग्रसंलग्नं पाशः प्रसृतकुञ्चितः।

हले मुष्टिर्यथा वामो दक्षहीनस्तथाङ्कुशः॥७.२५॥

vāmāṅguṣṭhāgrasaṁlagnaṁ pāśaḥ prasṛtakuñcitaḥ|
hale muṣṭiryathā vāmo dakṣahīnastathāṅkuśaḥ||7.25||

अधोमुखस्थिते वामे दक्षिणां तर्जनीं बुधः।

चालयेन्मध्यदेशस्थां घण्टामुद्रा प्रिया मता॥७.२६॥

adhomukhasthite vāme dakṣiṇāṁ tarjanīṁ budhaḥ|
cālayenmadhyadeśasthāṁ ghaṇṭāmudrā priyā matā||7.26||

करावूर्ध्वमुखौ कार्यावन्योन्यान्तरिताङ्गुली।

अनामे मध्यपृष्ठस्थे तर्जन्यौ मूलपवर्गे॥७.२७॥

karāvūrdhvamukhau kāryāvanyonyāntaritāṅgulī|
anāme madhyapṛṣṭhasthe tarjanyau mūlapavarge||7.27||

मध्यमे द्वे युते कार्ये कनिष्ठे परुषावधि।

तर्जन्यौ मध्यपार्श्वस्थे विरले परिकल्पिते॥७.२८॥

madhyame dve yute kārye kaniṣṭhe paruṣāvadhi|
tarjanyau madhyapārśvasthe virale parikalpite||7.28||

मुद्गरस्त्रिशिखो ह्येष क्षणादावेशकारकः।

कराभ्यामञ्जलिं कृत्वा अनामामूलपर्वगौ॥७.२९॥

mudgarastriśikho hyeṣa kṣaṇādāveśakārakaḥ|
karābhyāmañjaliṁ kṛtvā anāmāmūlaparvagau||7.29||

अङ्गुष्ठौ कल्पयेद्विद्वान्मन्त्रावाहनकर्मणि।

मुष्टी द्वावुन्नताङ्गुष्ठौ स्थापनी परिकीर्तिता॥७.३०॥

aṅguṣṭhau kalpayedvidvānmantrāvāhanakarmaṇi|
muṣṭī dvāvunnatāṅguṣṭhau sthāpanī parikīrtitā||7.30||

द्वावेव गर्भगाङ्गुष्ठौ विज्ञेया संनिरोधिनी।

द्रव्यदा तु समाख्याता [४]त्र संमुखी॥७.३१॥

dvāvēva garbhagāṅguṣṭhau vijñēyā sannirōdhinī|
dravyadā tu samākhyātā [4] tra sammukhī||7.31||

हृदये संमुखौ हस्तौ संलग्नौ प्रसृताङ्गुली।
नमस्कृतिरियं मुद्रा मन्त्रवन्दनकर्मणि॥७.३२॥

hṛdaye saṁmukhau hastau saṁlagnau prasṛtāṅgulī|
namaskṛtiriyaṁ mudrā mantravandanakarmaṇi||7.32||

अन्योन्यान्तरिताः सर्धाः करयोरङ्गुलीः स्थिताः।
कनिष्ठां दक्षिणां वामेऽनामिकाग्रे नियोजयेत्॥७.३३॥

anyonyāntaritāḥ sardhāḥ karayoraṅgulīḥ sthitāḥ|
kaniṣṭhāṁ dakṣiṇāṁ vāme'nāmikāgre niyojayet||7.33||

दक्षिणे च तथा वामां तर्जनीमध्यमे तथा।
अङ्गुष्ठौ मध्यमूलस्थौ मुद्रेयममृतप्रभा॥७.३४॥

dakṣiṇe ca tathā vāmāṁ tarjanīmadhyame tathā|
aṅguṣṭhau madhyamūlasthau mudreyamamṛtaprabhā||7.34||

दक्षिणं नाभिमूले तु वामस्योपरि संस्थितम्।
तर्जन्यङ्गुष्ठकौ लग्नौ उच्छ्रितौ योगकर्मणि॥७.३५॥

dakṣiṇaṁ nābhimūle tu vāmasyopari saṁsthitam|
tarjanyaṅguṣṭhakau lagnau ucchritau yogakarmaṇi||7.35||

एवं मुद्रागणं मन्त्री बध्नीयाद्धृदये बुधः।
सर्वासां वाचकश्चासां ॐ ह्रीं नाम ततो नमः॥७.३६॥

evaṁ mudrāgaṇaṁ mantrī badhnīyāddhṛdaye budhaḥ|
sarvāsāṁ vācakaścāsāṁ oṁ hrīṁ nāma tato namaḥ||7.36||

इति श्रीमालिनीविजयोत्तरे तन्त्रे मुद्राधिकारः सप्तमः॥७॥

iti śrīmālinīvijayottare tantre mudrādhikārāḥ saptamaḥ||7||

अथ अष्टमोऽधिकारः।

atha aṣṭamo'dhikāraḥ|

अथातः सम्प्रवक्ष्यामि यजनं सर्वकामदम्।

यस्य दर्शनमात्रेण योगिनीसंमतो भवेत्॥८.१॥

athātaḥ sampravakṣyāmi yajanaṁ sarvakāmadam|
yasya darśanamātreṇa yoginīsaṁmato bhavet||8.1||

तत्रादौ यागसदनं शुभक्षेत्रे मनोरमम्।

कारयेदग्निकुण्डेन वर्तुलेन समन्वितम्॥८.२॥

tatrādau yāgasadanaṁ śubhakṣetre manoramam|
kārayedagnikuṇḍena vartulena samanvitam||8.2||

पञ्चविंशतिपर्वेण समन्तादर्धनाभिना।

तुर्यांशमेखलेनापि पर्वौष्ठेन सुशोभिना॥८.३॥

pañcaviṁśatiparveṇa samantādardhanābhinā|
turyāṁśamekhalenāpi parvauṣṭhena suśobhinā||8.3||

ततः स्नात्वा जितद्वन्द्वो भावस्नानेन मन्त्रवित्।

तच्च षड्विधमुद्दिष्टं भस्मस्नानाद्यनुक्रमात्॥८.४॥

tataḥ snātvā jitadvandvo bhāvasnānena mantravit|
tacca ṣaḍvidhamuddiṣṭaṁ bhasmasnānādyanukramāt||8.4||

भस्मस्नानं महास्त्रेण भस्म सप्ताभिमन्त्रितम्।

मलस्नानाय संहारक्रमेणोद्धूलयेत्तनुम्॥८.५॥

bhasmasnānaṁ mahāstreṇa bhasma saptābhimantritam|
malasnānāya saṁhārakrameṇoddhūlayettanum||8.5||

विद्याङ्गैः पञ्चभिः पश्चाच्छिरः प्रभृति गुण्ठयेत्।
अभिषेकं तु कुर्वीत मूलेनैव षडङ्गिना॥ ८.६॥
vidyāṅgaiḥ pañcabhiḥ paścācchiraḥ prabhṛti guṇṭhayet|
abhiṣekaṁ tu kurvīta mūlenaiva ṣaḍaṅginā||8.6||

ततोऽवासाः सुवासा वा हस्तौ पादौ च धावयेत्।
आचम्य मार्जनं कुर्याद्विद्यया भूरिवर्णया॥ ८.७॥
tato'vāsāḥ suvāsā vā hastau pādau ca dhāvayet|
ācamya mārjanaṁ kuryādvidyayā bhūrivarṇayā||8.7||

न्यासं कृत्वा तु सामान्यमघमर्षं द्वितीयया।
उपस्थानं च मालिन्या जपेच्चैकाक्षरां पराम्॥ ८.८॥
nyāsaṁ kṛtvā tu sāmānyamaghamarṣaṁ dvitīyayā|
upasthānaṁ ca mālinyā japeccaikākṣarāṁ parām||8.8||

जलस्नानेऽपि चास्त्रेण मृदं सप्ताभिमन्त्रिताम्।
पूर्ववत्तनुमालभ्य मलस्नानं समाचरेत्॥ ८.९॥
jalasnāne'pi cāstreṇa mṛdaṁ saptābhimantritām|
pūrvavattanumālabhya malasnānaṁ samācaret||8.9||

विधिस्नानादिकं चात्र पूर्ववत् किन्तु वारिणा।
साधारणविधिस्नातो विद्यात्रितयमन्त्रितम्॥ ८.१०॥
vidhisnānādikaṁ cātra pūrvavat kintu vāriṇā|
sādhāraṇavidhisnāto vidyātritayamantritam||8.10||

तोयं विनिक्षिपेन्मूर्ध्नि मन्त्रस्नानाय मन्त्रवित्।
रजसा गोधुतेनैव वायव्यं स्नानमाचरेत्॥ ८.११॥
toyaṁ vinikṣipenmūrdhni mantrasnānāya mantravit|
rajasā godhutenaiva vāyavyaṁ snānamācaret||8.11||

महास्त्रमुच्चरन् गच्छेद्ध्यानयुक् पदसप्तकम्।

तदेव पुनरागच्छेदनुस्मृत्य परापराम्॥८.१२॥

mahāstramuccaran gaccheddhyānayuk padasaptakam|
tadeva punarāgacchedanusmṛtya parāparām||8.12||

वर्षातपसमायोगाद्दिव्योऽप्येवंविधो मतः।

किन्तु तत्र परां मन्त्री स्रवन्तीममृतं स्मरेत्॥८.१३॥

varṣātapasamāyogāddivyo'pyevaṁvidho mataḥ|
kintu tatra parāṁ mantrī sravantīmamṛtaṁ smaret||8.13||

अस्त्रेणाङ्गुष्ठमूलात्तु वह्निमुत्थाप्य निर्दहेत्।

स्वतनुं प्लावयेत्पश्चात्परयैवामृतेन तु॥८.१४॥

astreṇāṅguṣṭhamūlāttu vahnimutthāpya nirdahet|
svatanuṁ plāvayetpaścātparayaivāmṛtena tu||8.14||

सूर्यादौ मन्त्रमादाय गच्छेदस्त्रमनुस्मरन्।

यागवेश्मास्त्रसंशुद्धं विशेच्छुचिरनाकुलः॥८.१५॥

sūryādau mantramādāya gacchedastramanusmaran|
yāgaveśmāstrasaṁśuddhaṁ viśecchuciranākulaḥ||8.15||

तत्र द्वारपतीन् पूज्य महास्त्रेणाभिमन्त्रितम्।

पुष्पं विनिक्षिपेद्ध्यात्वा ज्वलद्विघ्नप्रशान्तये॥८.१६॥

tatra dvārapatīn pūjya mahāstreṇābhimantritam|
puṣpaṁ vinikṣipeddhyātvā jvaladvighnapraśāntaye||8.16||

दशास्वपि ततोऽस्त्रेण दिक्षु सङ्कल्प्य रक्षणम्।

प्रविशेद्यागसदनं वह्निवद्वह्निसंयुतम्॥८.१७॥

daśasvapi tato'streṇa dikṣu saṅkalpya rakṣaṇam|
praviśedyāgasadanaṁ vahnivadvahnisaṁyutam||8.17||

पूर्वास्यः सौम्यवक्त्रो वा विशेषन्यासमारभेत्।

तत्रादावस्त्रमन्त्रेण कालानलसमत्विषा॥८.१८॥

pūrvāsyaḥ saumyavaktro vā viśeṣanyāsamārabhet|

tatrādāvastramantreṇa kālānalasamatviṣā||8.18||

अङ्गुष्ठाग्रात्तनुं दग्धां सबाह्याभ्यन्तरां स्मरेत्।
विकीर्यमाणं तद्भस्म ध्यात्वा कवचवायुना॥८.१९॥
aṅguṣṭhāgrāttanuṁ dagdhāṁ sabāhyābhyantarāṁ smaret|
vikīryamāṇaṁ tadbhasma dhyātvā kavacavāyunā||8.19||

शिवबिन्दुसमाकारमात्मानमनुचिन्तयेत्।
ततोऽस्य योजयेच्छक्तिं सोऽहमित्यपराजितः॥८.२०॥
śivabindusamākāramātmānamanucintayet|
tato'sya yojayecchaktiṁ so'hamityaparājitaḥ||8.20||

विद्यामूर्तिं ततो दध्यान्मन्त्रेणानेन शाङ्करि।
दण्डाक्रान्तं महाप्राणं दण्डारूढं सनाभिकम्॥८.२१॥
vidyāmūrtiṁ tato dadhyānmantreṇānena śāṅkari|
daṇḍākrāntaṁ mahāprāṇaṁ daṇḍārūḍhaṁ sanābhikam||8.21||

नितम्बं तदधस्ताच्च वामस्तनमधः पुनः।
कण्ठं च वामशिखरं वाममुद्राविभूषितम्॥८.२२॥
nitambaṁ tadadhastācca vāmastanamadhaḥ punaḥ|
kaṇṭhaṁ ca vāmaśikharaṁ vāmamudrāvibhūṣitam||8.22||

बिन्द्वर्धचन्द्रखं नादशक्तिबिन्दुविभूषितम्।
एष पिण्डवरो देवि नवात्मक इति श्रुतः॥८.२३॥
bindvardhacandrakhaṁ nādaśaktibinduvibhūṣitam|
eṣa piṇḍavaro devi navātmaka iti śrutaḥ||8.23||

सर्वसिद्धिकरश्चायं सरहस्यमुदाहृतः।
एष त्र्यर्णोज्झितोऽधस्ताद्दीर्घैः षड्भिः स्वरैर्युतः॥८.२४॥
sarvasiddhikaraścāyaṁ sarahasyamudāhṛtaḥ|
eṣa tryarṇojjhito'dhastāddīrghaiḥ ṣaḍbhiḥ svarairyutaḥ||8.24||

षडङ्गानि हृदादीनि जातिभेदेन कल्पयेत्।
क्षयरवलबीजैश्च दीप्तैर्बिन्दुविभूषितैः॥८.२५॥
ṣaḍaṅgāni hṛdādīni jātibhedena kalpayet|
kṣayaravalabījaiśca dīptairbinduvibhūṣitaiḥ||8.25||

वक्त्राणि कल्पयेत्पूर्वमूर्ध्ववक्त्रादितः क्रमात्।
प्रत्यङ्गविधिसिद्ध्यर्थं ललाटादिष्वथो न्यसेत्॥८.२६॥
vaktrāṇi kalpayetpūrvamūrdhvavaktrāditaḥ kramāt|
pratyaṅgavidhisiddhyarthaṁ lalāṭādiṣvatho nyaset||8.26||

अ ललाटे द्वितीयं च वक्त्रे सम्परिकल्पयेत्।
इ ई नेत्रद्वये दत्त्वा उ ऊ कर्णद्वये न्यसेत्॥८.२७॥
a lalāṭe dvitīyaṁ ca vaktre samparikalpayet|
i ī netradvaye dattvā u ū karṇadvaye nyaset||8.27||

ऋ ॠ नासापुटे तद्वन्त् ऌ ॡ गण्डद्वये तथा।
ए ऐ अधोर्ध्वदन्तेषु ओऔकारौ तथोऽष्ठयोः॥८.२८॥
ṛ ṝ nāsāpuṭe tadvant ḷ ḹ gaṇḍadvaye tathā|
e ai adhordhvadanteṣu oaukārau tatho'ṣṭhayoḥ||8.28||

अं शिखायां विसर्गेण जिह्वां सम्परिकल्पयेत्।
दक्षिणस्कन्धदोर्दण्डकराङ्गुलिनखेषु च॥८.२९॥
aṁ śikhāyāṁ visargeṇa jihvāṁ samparikalpayet|
dakṣiṇaskandhadordaṇḍakarāṅgulinakheṣu ca||8.29||

कवर्गं विन्यसेद्वामे तद्वच्चाद्यमनुक्रमात्।
टताद्यौ पूर्ववद्वर्गौ नितम्बोर्वादिषु न्यसेत्॥८.३०॥
kavargaṁ vinyasedvāme tadvaccādyamanukramāt|
ṭatādyau pūrvavadvargau nitamborvādiṣu nyaset||8.30||

पाद्यं पार्श्वद्वये पृष्ठे जठरे हृद्यनुक्रमात्।

त्वग्रक्तमांसमूत्रेषु यवर्गं परिकल्पयेत्॥८.३१॥

pādyaṁ pārśvadvaye pṛṣṭhe jaṭhare hṛdyanukramāt|
tvagraktamāṁsamūtreṣu yavargaṁ parikalpayet||8.31||

शाद्यमस्थिवसाशुक्रप्राणकूपेषु पञ्चकम्।
मूर्त्यङ्गानि ततो दत्त्वा शिवमावाहयेद्बुधः॥८.३२॥

śādyamasthivasāśukraprāṇakūpeṣu pañcakam|
mūrtyaṅgāni tato dattvā śivamāvāhayedbudhaḥ||8.32||

प्राणोपरि न्यसेन्नाभिं तदूर्ध्वे दक्षिणाङ्गुलिम्।
वामकर्णप्रमेयोतः सर्वसिद्धिप्रदः शिवः॥८.३३॥

prāṇopari nyasennābhiṁ tadūrdhve dakṣiṇāṅgulim|
vāmakarṇaprameyotaḥ sarvasiddhipradaḥ śivaḥ||8.33||

सद्भावः परमो ह्येष भैरवस्य महात्मनः।
अङ्गान्यनेन कार्याणि पूर्ववत्स्वरभेदतः॥८.३४॥

sadbhāvaḥ paramo hyeṣa bhairavasya mahātmanaḥ|
aṅgānyanena kāryāṇi pūrvavatsvarabhedataḥ||8.34||

मूर्तिः सृष्टिस्त्रितत्त्वं च अष्टौ मूर्त्यङ्गसंयुताः।
शिवः साङ्गश्च षोढैव न्यासः सम्परिकीर्तितः॥८.३५॥

mūrtiḥ sṛṣṭistritattvaṁ ca aṣṭau mūrtyaṅgasaṁyutāḥ|
śivaḥ sāṅgaśca ṣoḍhaiva nyāsaḥ samparikīrtitaḥ||8.35||

अस्योपरि ततः शाक्तं कुर्यान्न्यासं यथा शृणु।
मूर्तौ परापरां न्यस्य तद्वक्त्राणि च मालिनीम्॥८.३६॥

asyopari tataḥ śāktaṁ kuryānnyāsaṁ yathā śṛṇu|
mūrtau parāparāṁ nyasya tadvaktrāṇi ca mālinīm||8.36||

परादित्रितयं पश्चाच्छिखाहृत्पादगं न्यसेत्।
कवक्त्रकण्ठहृन्नाभिगुह्योरूपादगं क्रमात्॥८.३७॥

parāditritayaṁ paścācchikhāhṛtpādagaṁ nyaset|

kavaktrakaṇṭhahṛnnābhiguhyorūpādagaṁ kramāt||8.37||

अघोर्याद्यष्टकं न्यस्य विद्याङ्गानि तु पूर्ववत्।
ततस्त्वावाहयेच्छक्तिं सर्वयोगिनमस्कृताम्॥८.३८॥
aghoryādyaṣṭakaṁ nyasya vidyāṅgāni tu pūrvavat|
tatastvāvāhayecchaktiṁ sarvayoginamaskṛtām||8.38||

जीवः प्राणपुटान्तस्थः कालानलसमद्युतिः।
अतिदीप्तस्तु वामाङ्घ्रिभूषितो मूर्ध्नि बिन्दुना॥८.३९॥
jīvaḥ prāṇapuṭāntasthaḥ kālānalasamadyutiḥ|
atidīptastu vāmāṅghribhūṣito mūrdhni bindunā||8.39||

दक्षजानुयुतश्चायं सर्वमातृगणान्वितः।
अनेन प्रीणिताः सर्वा ददते वाञ्छितं फलम्॥८.४०॥
dakṣajānuyutaścāyaṁ sarvamātṛgaṇānvitaḥ|
anena prīṇitāḥ sarvā dadate vāñchitaṁ phalam||8.40||

सद्भावः परमो ह्येष मातृणां परिपठ्यते।
तस्मादेनां जपेन्मन्त्री य इच्छेत्सिद्धिमुत्तमाम्॥८.४१॥
sadbhāvaḥ paramo hyeṣa mātṝṇāṁ paripaṭhyate|
tasmādenāṁ japenmantrī ya icchetsiddhimuttamām||8.41||

रुद्रशक्तिसमावेशो नित्यमत्र प्रतिष्ठितः।
यस्मादेषा पराशक्तिर्भेदेनानेन कीर्तिता॥८.४२॥
rudraśaktisamāveśo nityamatra pratiṣṭhitaḥ|
yasmādeṣā parāśaktirbhedenānena kīrtitā||8.42||

यावत्यः सिद्धयस्तन्त्रे सर्वाः स्युरनया कृताः।
अङ्गानि कल्पयेदस्याः पूर्ववत्स्वरभेदतः॥८.४३॥
yāvatyaḥ siddhayastantre sarvāḥ syuranayā kṛtāḥ|
aṅgāni kalpayedasyāḥ pūrvavatsvarabhedataḥ||8.43||

मूर्तिः सवक्त्रा शक्तिश्च विद्यात्रितय एव च।
अघोर्याद्यष्टकं चेति तथा विद्याङ्गपञ्चकम्॥८.४४॥
mūrtiḥ savaktrā śaktiśca vidyātritaya eva ca|
aghoryādyaṣṭakaṁ ceti tathā vidyāṅgapañcakam||8.44||

साङ्गा चैव परा शक्तिर्न्यासः प्रोक्तोऽथ षड्विधः।
यामलोऽयमतो न्यासः सर्वसिद्धिप्रसिद्धये॥८.४५॥
sāṅgā caiva parā śaktirnyāsaḥ prokto'tha ṣaḍvidhaḥ|
yāmalo'yamato nyāsaḥ sarvasiddhiprasiddhaye||8.45||

वामो वायं विधिः कार्यो मुक्तिमार्गावलम्बिभिः।
वर्णमन्त्रविभेदेन पृथग्वा तत्फलार्थिभिः॥८.४६॥
vāmo vāyaṁ vidhiḥ kāryo muktimārgāvalambibhiḥ|
varṇamantravibhedena pṛthagvā tatphalārthibhiḥ||8.46||

यावन्तः कीर्तिता भेदैः शम्भुशक्त्यणुवाचकाः।
तावत्स्वप्येवमेवायं न्यासः पञ्चविधो मतः॥८.४७॥
yāvantaḥ kīrtitā bhedaiḥ śambhuśaktyaṇuvācakāḥ|
tāvatsvapyevamevāyaṁ nyāsaḥ pañcavidho mataḥ||8.47||

किन्तु बाह्यस्तु यो यत्र स तत्राङ्गसमन्वितः।
षष्ठः स्यादिति सर्वत्र षोढैवायमुदाहृतः॥८.४८॥
kintu bāhyastu yo yatra sa tatrāṅgasamanvitaḥ|
ṣaṣṭhaḥ syāditi sarvatra ṣoḍhaivāyamudāhṛtaḥ||8.48||

स्वानुष्ठानाविरोधेन भावाभावविकल्पनैः।
यागद्रव्याणि सर्वाणि कार्याणि विधिवद्बुधैः॥८.४९॥
svānuṣṭhānāvirodhena bhāvābhāvavikalpanaiḥ|
yāgadravyāṇi sarvāṇi kāryāṇi vidhivadbudhaiḥ||8.49||

ततोऽर्घपात्रमादाय भावाभावाविकल्पितम्।

ततश्चास्त्राग्निसन्दग्धं शक्त्यम्बुप्लावितं शुवि॥८.५०॥

tato'rghapātramādāya bhāvābhāvāvikalpitam|
tataścāstrāgnisandagdhaṁ śaktyambuplāvitaṁ śuvi||8.50||

कर्तव्या यस्य संशुद्धिरन्यस्याप्यत्र वस्तुनः।

तस्यानेनैव मार्गेण प्रकर्तव्या विजानता॥८.५१॥

kartavyā yasya saṁśuddhiranyasyāpyatra vastunaḥ|
tasyānenaiva mārgeṇa prakartavyā vijānatā||8.51||

ना चासंशोधितं वस्तु किञ्चिदप्यत्र कल्पयेत्।

तेन शुद्धं तु सर्वं यदशुद्धमपि तच्छुचि॥८.५२॥

nā cāsaṁśodhitaṁ vastu kiñcidapyatra kalpayet|
tena śuddhaṁ tu sarvaṁ yadaśuddhamapi tacchuci||8.52||

तदम्बुना समापूर्य षड्भिरङ्गैः समर्प्य च।

अमृतीकृत्य सर्वाणि तेन द्रव्याणि शोधयेत्॥८.५३॥

tadambunā samāpūrya ṣaḍbhiraṅgaiḥ samarpya ca|
amṛtīkṛtya sarvāṇi tena dravyāṇi śodhayet||8.53||

आत्मानं पूजयित्वा तु कुर्यादन्तः कृतिं यथा।

तथा ते कथयिष्यामि सर्वयोगिगणार्चिते॥८.५४॥

ātmānaṁ pūjayitvā tu kuryādantaḥ kṛtiṁ yathā|
tathā te kathayiṣyāmi sarvayogigaṇārcite||8.54||

आदावाधारशक्तिं तु नाभ्यधश्चतुरङ्गुलाम्।

धरां सुरोदं पोतं च कन्दश्चेति चतुष्टयम्॥८.५५॥

ādāvādhāraśaktiṁ tu nābhyadhaścaturaṅgulām|
dharāṁ surodaṁ potaṁ ca kandaśceti catuṣṭayam||8.55||

एकैकाङ्गुलमेतत्स्याच्छूलस्यामलसारकम्।

ततो नालमनन्ताख्यं दण्डमस्य प्रकल्पयेत्॥८.५६॥

ekaikāṅgulametatsyācchūlasyāmalasārakam|

tato nālamanantākhyaṁ daṇḍamasya prakalpayet||8.56||

लम्बिकावधितश्चात्र शूलोर्ध्वं ग्रन्थिरिष्यते।
अभित्त्वैनं महादेवि पाशजालमहार्णवम्॥८.५७॥
lambikāvadhitaścātra śūlordhvaṁ granthiriṣyate|
abhittvainaṁ mahādevi pāśajālamahārṇavam||8.57||

न स योगमवाप्नोति शिवेन सह मानवः।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम्॥८.५८॥
na sa yogamavāpnoti śivena saha mānavaḥ|
dharmaṁ jñānaṁ ca vairāgyamaiśvaryaṁ ca catuṣṭayam||8.58||

कोणेषु चिन्तयेन्मन्त्री आग्नेयादिष्वनुक्रमात्।
गात्रकाणां चतुष्कं च दिक्षु पूर्वादिषु स्मरेत्॥८.५९॥
koṇeṣu cintayenmantrī āgneyādiṣvanukramāt|
gātrakāṇāṁ catuṣkaṁ ca dikṣu pūrvādiṣu smaret||8.59||

ग्रन्थेरूर्ध्वं त्रीशूलाधो भवितव्या चतुष्किका।
विद्यातत्त्वं तदेवाहुश्छन्दनत्रयसंयुतम्॥८.६०॥
grantherūrdhvaṁ trīśūlādho bhavitavyā catuṣkikā|
vidyātattvaṁ tadevāhuśchandanatrayasaṁyutam||8.60||

कखलम्बिकयोर्मध्ये तत्तत्त्वमनुचिन्तयेत्।
पद्माकृति कखतत्त्वमैश्वरं चिन्तयेद्बुधः॥८.६१॥
kakhalambikayormadhye tattattvamanucintayet|
padmākṛti kakhatattvamaiśvaraṁ cintayedbudhaḥ||8.61||

कर्णिकाकेसरोपेतं सबीजं विकसत्सितम्।
पूर्वपत्रादितः पश्चाद्वामादिनवकं न्यसेत्॥८.६२॥
karṇikākesaropetaṁ sabījaṁ vikasatsitam|
pūrvapatrāditaḥ paścādvāmādinavakaṁ nyaset||8.62||

वामा ज्येष्ठा च रौद्री च काली चेति तथा परा।

कलविकरणी चैव बलविकरणी तथा॥८.६३॥

vāmā jyeṣṭhā ca raudrī ca kālī ceti tathā parā|
kalavikaraṇī caiva balavikaraṇī tathā||8.63||

बलप्रमथनी चान्या सर्वभूतदमन्यपि।

मनोन्मनी च मध्येऽपि भानुमार्गेण विन्यसेत्॥८.६४॥

balapramathanī cānyā sarvabhūtadamanyapi|
manonmanī ca madhye'pi bhānumārgeṇa vinyaset||8.64||

विभ्वादिनवकं चान्यद्विलोमात्परिकल्पयेत्।

विभुर्ज्ञानी क्रिया चेच्छ्वा वागीशी ज्वालिनी तथा॥८.६५॥

vibhvādinavakaṁ cānyadvilomātparikalpayet|
vibhurjñānī kriyā cecchvā vāgīśī jvālinī tathā||8.65||

वामा ज्येष्ठा च रौद्री च सर्वाः कालानलप्रभाः।

ब्रह्मविष्णुहराः पूर्वं ये शाक्ताः प्रतिपादिताः॥८.६६॥

vāmā jyeṣṭhā ca raudrī ca sarvāḥ kālānalaprabhāḥ|
brahmaviṣṇuharāḥ pūrvaṁ ye śāktāḥ pratipāditāḥ||8.66||

दलकेसरमध्यस्था मण्डलानां त ईश्वराः।

ध्वनि? चार्केन्दुवह्नीनां सञ्ज्ञया परिभावयेत्॥८.६७॥

dalakesaramadhyasthā maṇḍalānāṁ ta īśvarāḥ|
dhvani? cārkenduvahnīnāṁ sañjñayā paribhāvayet||8.67||

ईश्वरं च महाप्रेतं प्रहसन्तं सचेतनम्।

कालाग्निकोटिवपुषमित्येवं सर्वमासनम्॥८.६८॥

īśvaraṁ ca mahāpretaṁ prahasantaṁ sacetanam|
kālāgnikoṭivapuṣamityevaṁ sarvamāsanam||8.68||

तस्य नाभ्युत्थितं शक्तिशूलश्रृङ्गत्रयं स्मरेत्।

कखत्रयेण निर्यातं द्वादशान्तावसानकम्॥८.६९॥

tasya nābhyutthitaṁ śaktiśūlaśṛṅgatrayaṁ smaret|
kakhatrayeṇa niryātaṁ dvādaśāntāvasānakam||8.69||

चिन्तयेत्तस्य शृङ्गेषु शाक्तं पद्मत्रयं ततः।
सर्वाधिष्ठायकं शुक्लमित्येतत्परमासनम्॥८.७०॥

cintayettasya śṛṅgeṣu śāktaṁ padmatrayaṁ tataḥ|
sarvādhiṣṭhāyakaṁ śuklamityetatparamāsanam||8.70||

तत्रोपरि ततो मूर्तिं विद्याख्यामनुचिन्तयेत्।
आत्माख्यां च ततस्तस्यां पूर्वन्यासं शिवात्मकम्॥८.७१॥

tatropari tato mūrti vidyākhyāmanucintayet|
ātmākhyāṁ ca tatastasyāṁ pūrvanyāsaṁ śivātmakam||8.71||

ततो मध्ये परां शक्तिं दक्षिणोत्तरयोर्द्वयम्।
परापरां स्वरूपेण रक्तवर्णां महाबलाम्॥८.७२॥

tato madhye parāṁ śaktiṁ dakṣiṇottarayordvayam|
parāparāṁ svarūpeṇa raktavarṇāṁ mahābalām||8.72||

इच्छारूपधरां ध्यात्वा किञ्चिदुग्रां न भीषणाम्।
अपरां वामशृङ्गे तु भीषणां कृष्णपिङ्गलाम्॥८.७३॥

icchārūpadharāṁ dhyātvā kiñcidugrāṁ na bhīṣaṇām|
aparāṁ vāmaśṛṅge tu bhīṣaṇāṁ kṛṣṇapiṅgalām||8.73||

इच्छारूपधरां देवीं प्रणतार्तिविनाशिनीम्।
परां चाप्यायनीं देवीं चन्द्रकोट्ययुतप्रभाम्॥८.७४॥

icchārūpadharāṁ devīṁ praṇatārtivināśinīm|
parāṁ cāpyāyanīṁ devīṁ candrakoṭyayutaprabhām||8.74||

षड्विधेऽपि कृते शाक्ते मूर्त्यादावपि चिन्तयेत्।
विद्याङ्गपञ्चकं पश्चादाग्नेय्यादिषु विन्यसेत्॥८.७५॥

ṣaḍvidhe'pi kṛte śākte mūrtyādāvapi cintayet|

vidyāṅgapañcakaṁ paścādāgneyyādiṣu vinyaset||8.75||

अग्नीशरक्षोवायूनां दक्षिणे च यथाक्रमम्।
शक्त्यङ्गानि शिवाङ्गानि तथैव विधिना स्मरेत्॥ ८.७६ ॥
agnīśarakṣovāyūnāṁ dakṣiṇe ca yathākramam|
śaktyaṅgāni śivāṅgāni tathaiva vidhinā smaret||8.76||

किन्तु शक्रादिदिक्ष्वस्त्रमन्त्रं मध्ये च लोचनम्।
अघोराद्यष्टकं ध्यायेदघोर्याद्यष्टकान्वितम्॥ ८.७७ ॥
kintu śakrādidikṣvastramantraṁ madhye ca locanam|
aghorādyaṣṭakaṁ dhyāyedaghoryādyaṣṭakānvitam||8.77||

सर्वासामावृतत्वेन लोकपालांश्च बाह्यतः।
सास्त्रान्स्वमन्त्रैः सञ्चिन्त्य जपं पश्चात्समारभेत्॥ ८.७८ ॥
sarvāsāmāvṛtatvena lokapālāṁśca bāhyataḥ|
sāstrānsvamantraiḥ sañcintya japaṁ paścātsamārabhet||8.78||

स्वरूपे तल्लयो भूत्वा एकैकां दशधा स्मरेत्।
ज्वलत्पावकसङ्काशां ध्यात्वा स्वाहान्तमुच्चरेत्॥ ८.७९ ॥
svarūpe tallayo bhūtvā ekaikāṁ daśadhā smaret|
jvalatpāvakasaṅkāśāṁ dhyātvā svāhāntamuccaret||8.79||

सकृदेकैकशो मन्त्री होमकर्मप्रसिद्धये।
इत्येव मानसो यागः कथितः सामुदायिकः॥ ८.८० ॥
sakṛdekaikaśo mantrī homakarmaprasiddhaye|
ityeva mānaso yāgaḥ kathitaḥ sāmudāyikaḥ||8.80||

एतत्त्रिशूलमुद्दिष्टमेकदण्डं त्रिशक्तिकम्।
इत्थमेतदविज्ञाय शक्तिशूलं वरानने॥ ८.८१ ॥
etattriśūlamuddiṣṭamekadaṇḍaṁ triśaktikam|
itthametadavijñāya śaktiśūlaṁ varānane||8.81||

बद्ध्वापि खेचरीं मुद्रां नोत्पतत्यवनीतलात्।

इत्येतच्छाम्भवं प्रोक्तमष्टान्तं शाक्तमिष्यते॥८.८२॥

baddhvāpi khecarīṁ mudrāṁ notpatatyavanītalāt|
ityetacchāmbhavaṁ proktamaṣṭāntaṁ śāktamiṣyate||8.82||

तुर्यान्तमाणवं विद्यादिति शूलत्रयं मतम्।

पृथग्यागविधानेन शक्तिचक्रं विचिन्तयेत्॥८.८३॥

turyāntamāṇavaṁ vidyāditi śūlatrayaṁ matam|
pṛthagyāgavidhānena śakticakraṁ vicintayet||8.83||

तेनापि खेचरीं बद्ध्वा त्यजत्येवं महीतलम्।

ततोऽभिमन्त्र्य धान्यानि महास्त्रेण त्रिसप्तधा॥८.८४॥

tenāpi khecarīṁ baddhvā tyajatyevaṁ mahītalam|
tato'bhimantrya dhānyāni mahāstreṇa trisaptadhā||8.84||

निक्षिपेद्दिक्षु सर्वासु ज्वलत्पावकवत्स्मरेत्।

निर्विघ्नं तद्गृहं ध्यात्वा संहृत्येशदिशं नयेत्॥८.८५॥

nikṣipeddikṣu sarvāsu jvalatpāvakavatsmaret|
nirvighnaṁ tadgṛhaṁ dhyātvā saṁhṛtyeśadiśaṁ nayet||8.85||

पञ्चगव्यं ततः कुर्याद्वदनैः पञ्चभिर्बुधः।

गोमूत्रं गोमयं चैव क्षीरं दधि घृतं तथा॥८.८६॥

pañcagavyaṁ tataḥ kuryādvadanaiḥ pañcabhirbudhaḥ|
gomūtraṁ gomayaṁ caiva kṣīraṁ dadhi ghṛtaṁ tathā||8.86||

मन्त्रयेदूर्ध्वपर्यन्तैः षडङ्गेन कुशोदकम्।

मुद्रे द्रव्यामृते बद्ध्वा तत्त्वं तस्य विचिन्तयेत्॥८.८७॥

mantrayedūrdhvaparyantaiḥ ṣaḍaṅgena kuśodakam|
mudre dravyāmṛte baddhvā tattvaṁ tasya vicintayet||8.87||

तेन सम्प्रोक्षयेद्भूमिं स्वल्पेनान्यन्निधापयेत्।

वास्तुयागं ततः कुर्यान्मालिन्युच्चारयोगतः॥८.८८॥
tena samprokṣayedbhūmiṁ svalpenānyannidhāpayet|
vāstuyāgaṁ tataḥ kuryānmālinyuccārayogataḥ||8.88||

पुष्पैरञ्जलिमापूर्य फकारादि समुच्चरन्।
ध्यात्वा शक्त्यन्तमध्वानं नकारान्ते विनिक्षिपेत्॥८.८९॥
puṣpairañjalimāpūrya phakārādi samuccaran|
dhyātvā śaktyantamadhvānaṁ nakārānte vinikṣipet||8.89||

गन्धधूपादिकं दत्वा गणेशानं प्रपूजयेत्।
षडुत्थमासनं न्यस्य प्रणवेन ततोपरि॥८.९०॥
gandhadhūpādikaṁ datvā gaṇeśānaṁ prapūjayet|
ṣaḍutthamāsanaṁ nyasya praṇavena tatopari||8.90||

गामित्यनेन विघ्नेशं गन्धधूपादिभिर्यजेत्।
अस्याङ्गानि गकारेण षड्दीर्घस्वरयोगतः॥८.९१॥
gāmityanena vighneśaṁ gandhadhūpādibhiryajet|
asyāṅgāni gakāreṇa ṣaḍdīrghasvarayogataḥ||8.91||

त्रिनेत्रमुदितं ध्यात्वा गजास्यं वामनाकृतिम्।
विसर्ज्य सिद्धिकायस्तु महास्त्रमनुपूजयेत्॥८.९२॥
trinetramuditaṁ dhyātvā gajāsyaṁ vāmanākṛtim|
visarjya siddhikāyastu mahāstramanupūjayet||8.92||

दत्त्वानन्तं तथा धर्मं ज्ञानं वैराग्यमेव च।
ऐश्वर्यं कर्णिकायां च षडुत्थमिदमासनम्॥८.९३॥
dattvānantaṁ tathā dharmaṁ jñānaṁ vairāgyameva ca|
aiśvaryaṁ karṇikāyāṁ ca ṣaḍutthamidamāsanam||8.93||

अस्योपरि न्यसेद्ध्यात्वा खड्गखेटकधारिणम्।
विकरालं महादंष्ट्रं महोग्रं भ्रुकुटीमुखम्॥८.९४॥
asyopari nyaseddhyātvā khaḍgakheṭakadhāriṇam|

vikarālaṁ mahādaṁṣṭraṁ mahograṁ bhrukuṭīmukham||8.94||

स्वाङ्गषट्कसमोपेतं दिङ्मातृपरिवारितम्।
स्वार्णैरेवाङ्गषट्कं तु फट्कारपरिदीपितम्॥८.९५॥
svāṅgaṣaṭkasamopetaṁ diṅmātṛparivāritam|
svārṇairevāṅgaṣaṭkaṁ tu phaṭkāraparidīpitam||8.95||

तद्रूपमेव सञ्चिन्त्य ततो मात्रष्टकं यजेत्।
इन्द्राणीं पूर्वपत्रे तु सवज्रां युगपत्स्मरेत्॥८.९६॥
tadrūpameva sañcintya tato mātraṣṭakaṁ yajet|
indrāṇīṁ pūrvapatre tu savajrāṁ yugapatsmaret||8.96||

आग्नेयीं शक्तिहस्तां च याम्यां दण्डकरां ततः।
नैर्ऋतीं वरुणानीं च वायवीं च विचक्षणः॥८.९७॥
āgneyīṁ śaktihastāṁ ca yāmyāṁ daṇḍakarāṁ tataḥ|
nairṛtīṁ varuṇānīṁ ca vāyavīṁ ca vicakṣaṇaḥ||8.97||

खड्गपाशध्वजैर्युक्तां चिन्तयेद्युगपत्प्रिये।
कौवेरीं मुद्गरकरामीशानीं शूलसंयुताम्॥८.९८॥
khaḍgapāśadhvajairyuktāṁ cintayedyugapatpriye|
kauverīṁ mudgarakarāmīśānīṁ śūlasaṁyutām||8.98||

गन्धपुष्पादिभिः पूज्य स्वतन्त्रे होममाचरेत्।
आदौ च कलशं कुर्यात्सहस्राधिकमन्त्रितम्॥८.९९॥
gandhapuṣpādibhiḥ pūjya svatantre homamācaret|
ādau ca kalaśaṁ kuryātsahasrādhikamantritam||8.99||

सहस्रं होमयेत्तत्र ततो जप्त्वा विसर्जयेत्।
शतमष्टोत्तरं पूर्णं पश्चाद्यजनमारभेत्॥८.१००॥
sahasraṁ homayettatra tato japtvā visarjayet|
śatamaṣṭottaraṁ pūrṇaṁ paścādyajanamārabhet||8.100||

तत्रादौ कुम्भमादाय हेमादिमयमव्रणम्।

सर्वमन्त्रौषधीगर्भं गन्धाम्बुपरिपूरितम्॥८.१०१॥

tatrādau kumbhamādāya hemādimayamavraṇam|
sarvamanntrauṣadhīgarbhaṁ gandhāmbuparipūritam||8.101||

चूतपल्लववक्त्रं च स्रक्सूत्रसितङ्कण्ठकम्।

रक्षोघ्नतिलकाक्रान्तं सितवस्त्रयुगावृतम्॥८.१०२॥

cūtapallavavaktraṁ ca sraksūtrasitaṅkaṇṭhakam|
rakṣoghratilakākrāntaṁ sitavastrayugāvṛtam||8.102||

शताष्टोत्तरसञ्जप्त मूलमन्त्रप्रपूजितम्।

वार्धान्यपि तथाभूता किन्तु सस्त्रेण पूजिता॥८.१०३॥

śatāṣṭottarasañjapta mūlamantraprapūjitam|
vārdhānyapi tathābhūtā kintu sastreṇa pūjitā||8.103||

विकिरैरासनं दत्त्वा पूर्वोक्तं तु विचक्षणः।

इन्द्रादीन्पूजयेत्पश्चात्स्वदिक्षु प्रोक्तस्वस्वरैः॥८.१०४॥

vikirairāsanaṁ dattvā pūrvoktaṁ tu vicakṣaṇaḥ|
indrādīnpūjayetpaścātsvadikṣu proktasvasvaraiḥ||8.104||

अविच्छिन्नां ततो धारां वार्धान्या प्रतिपादयेत्।

भ्रामयेत्कलशं पश्चाद्ब्रूयाल्लोकेश्वरानिदम्॥८.१०५॥

avicchinnāṁ tato dhārāṁ vārdhānyā pratipādayet|
bhrāmayetkalaśaṁ paścādbrūyāllokeśvarānidam||8.105||

भो भोः शक्र त्वया स्वस्यां दिशि विघ्नप्रशान्तये।

सावधानेन कर्मान्तं भवितव्यं शिवाज्ञया॥८.१०६॥

bho bhoḥ śakra tvayā svasyāṁ diśi vighnapraśāntaye|
sāvadhānena karmāntaṁ bhavitavyaṁ śivājñayā||8.106||

नीत्वा तत्रासने पूर्वं मूर्तिभूतं घटं न्यसेत्।

तस्य दक्षिणदिग्भागे वार्धानीं विनिवेशयेत्॥८.१०७॥

nītvā tatrāsane pūrvaṁ mūrtibhūtaṁ ghaṭaṁ nyaset|
tasya dakṣiṇadigbhāge vārdhānīṁ viniveśayet||8.107||

आत्ममूर्त्यादिपूज्यान्तं कुम्भे विन्यस्य मन्त्रवित्।
गन्धपुष्पादिभिः पूज्य वार्धान्यां पूजयेदिमम्॥८.१०८॥

ātmamūrtyādipūjyāntaṁ kumbhe vinyasya mantravit|
gandhapuṣpādibhiḥ pūjya vārdhānyāṁ pūjayedimam||8.108||

गन्धैर्मण्डलकं कृत्वा ब्रह्मस्थाने विचक्षणः।
तत्र सम्पूजयेत्षट्कं त्रिकं वाप्येकमेव वा॥८.१०९॥

gandhairmaṇḍalakaṁ kṛtvā brahmasthāne vicakṣaṇaḥ|
tatra sampūjayetṣaṭkaṁ trikaṁ vāpyekameva vā||8.109||

कुण्डस्योल्लेखनं लेखः कुट्टनं चोपलेपनम्।
चतुष्पथाक्षवाटं च वज्रसंस्थापनं तथा॥८.११०॥

kuṇḍasyollekhanaṁ lekhaḥ kuṭṭanaṁ copalepanam|
catuṣpathākṣavāṭaṁ ca vajrasaṁsthāpanaṁ tathā||8.110||

कुशास्तरणपरिधिविष्टराणां च कल्पनम्।
सर्वमस्त्रेण कुर्वीत विद्यार्मोहीमिति न्यसेत्॥८.१११॥

kuśāstaraṇaparidhiviṣṭarāṇāṁ ca kalpanam|
sarvamastreṇa kurvīta vidyārmohīmiti nyaset||8.111||

शिवमोमिति विन्यस्य सम्पूज्य द्वितयं पुनः।
ताम्रपात्रे शरावे वा आनयेज्जातवेदसम्॥८.११२॥

śivamomiti vinyasya sampūjya dvitayaṁ punaḥ|
tāmrapātre śarāve vā ānayejjātavedasam||8.112||

शिवशुक्रमिति ध्यात्वा विद्यायोनौ विनिक्षिपेत्।
ततस्त्वाहुतयः पञ्च विद्याङ्गैरेव होमयेत्॥८.११३॥

śivaśukramiti dhyātvā vidyāyonau vinikṣipet|

tatastvāhutayaḥ pañca vidyāṅgaireva homayet||8.113||

जननादि ततः कर्म सर्वमेवं कृते कृतम्।

परापरामनुस्मृत्य दद्यात्पूर्णाहुतिं पुनः॥८.११४॥

jananādi tataḥ karma sarvamevaṁ kṛte kṛtam|
parāparāmanusmṛtya dadyātpūrṇāhutiṁ punaḥ||8.114||

सम्पूज्य मातरं वह्नेः पितरं च विसर्जयेत्।

चर्वादिसाधनायाग्निं समुद्धृत्य ततः पुनः॥८.११५॥

sampūjya mātaraṁ vahneḥ pitaraṁ ca visarjayet|
carvādisādhanāyāgniṁ samuddhṛtya tataḥ punaḥ||8.115||

ज्वलितस्याथवा वह्नेश्चितिं वामेन वायुना।

आकृष्य हृदि सङ्कुम्भ्य दक्षिणेन पुनः क्षिपेत्॥८.११६॥

jvalitasyāthavā vahneścitiṁ vāmena vāyunā|
ākṛṣya hṛdi saṅkumbhya dakṣiṇena punaḥ kṣipet||8.116||

पूर्णां च पूर्ववद्दद्याच्छिवाग्नेरपरो विधिः।

शिवरूपं तमालोक्य तस्यात्मान्तः कृतिः क्रमात्॥८.११७॥

pūrṇāṁ ca pūrvavaddadyācchivāgneraparo vidhiḥ|
śivarūpaṁ tamālokya tasyātmāntaḥ kṛtiḥ kramāt||8.117||

कुर्यादन्तः कृतिं मन्त्री ततो होमं समारभेत्।

मूलं शतेन सन्तर्प्य तदङ्गानि षडङ्गतः॥८.११८॥

kuryādantaḥ kṛtiṁ mantrī tato homaṁ samārabhet|
mūlaṁ śatena santarpya tadaṅgāni ṣaḍaṅgataḥ||8.118||

शेषाणां मन्त्रजातीनां दशांशेनैव तर्पणम्।

ततः प्रवेसयेच्छिष्याञ्शुचीन्स्नातानुपोषितान्॥८.११९॥

śeṣāṇāṁ mantrajātīnāṁ daśāṁśenaiva tarpaṇam|
tataḥ pravesayecchiṣyāñśucīnsnātānupoṣitān||8.119||

प्रणम्य देवदेवेशं चतुष्टयगतं क्रमात्।

पञ्चगव्यं चरुं दद्याद्दन्तधावनमेव च॥८.१२०॥

praṇamya devadeveśaṁ catuṣṭayagataṁ kramāt|
pañcagavyaṁ caruṁ dadyāddantadhāvanameva ca||8.120||

हृदयेन चरोः सिद्धिर्याज्ञिकैः क्षीरतण्डुलैः।

सम्पातं सप्तभिर्मन्त्रैस्ततः षड्भागभाजितम्॥८.१२१॥

hṛdayena caroḥ siddhiryājñikaiḥ kṣīrataṇḍulaiḥ|
sampātaṁ saptabhirmantraistataḥ ṣaḍbhāgabhājitam||8.121||

शिवाग्निगुरुशिष्याणां वार्धानीकुम्भयोः समम्।

दन्तकाष्ठं ततो दद्यात्क्षीरवृक्षसमुद्भवम्॥८.१२२॥

śivāgniguruśiṣyāṇāṁ vārdhānīkumbhayoḥ samam|
dantakāṣṭhaṁ tato dadyātkṣīravṛkṣasamudbhavam||8.122||

तस्य पातः शुभः प्राचीसौम्यैशाप्योर्ध्वदिग्गतः।

अशुभोऽन्यत्र तत्रापि होमोऽष्टशतिको भवेत्॥८.१२३॥

tasya pātaḥ śubhaḥ prācīsaumyaiśāpyordhvadiggataḥ|
aśubho'nyatra tatrāpi homo'ṣṭaśatiko bhavet||8.123||

बहिःकर्म ततः कुर्याद्दिक्षु सर्वासु दैशिकः।

ॐ क्षः क्षः सर्वभूतेभ्यः स्वाहेति मनुनामुना॥८.१२४॥

bahiḥkarma tataḥ kuryāddikṣu sarvāsu daiśikaḥ|
oṁ kṣaḥ kṣaḥ sarvabhūtebhyaḥ svāheti manunāmunā||8.124||

समाचम्य कृतन्यासः समभ्यर्च्य च शङ्करम्।

[लचुन]गृहे शुचिः॥८.१२५॥

samācamya kṛtanyāsaḥ samabhyarcya ca śaṅkaram|
[lucana]gṛhe śuciḥ||8.125||

न्यासं कृत्वा तु शिष्याणामात्मनश्च विशेषतः।

प्रभाते नित्यकर्मादि कृत्वा स्वप्नं विचारयेत्॥८.१२६॥

nyāsaṁ kṛtvā tu śiṣyāṇāmātmanaśca viśeṣataḥ|
prabhāte nityakarmādi kṛtvā svapnaṁ vicārayet||8.126||

शुभं प्रकाशयेत्तेषामशुभे होममाचरेत्।

ततः पुष्पफलादीनां सुवेशाभरणाः स्त्रियः॥८.१२७॥

śubhaṁ prakāśayetteṣāmaśubhe homamācaret|
tataḥ puṣpaphalādīnāṁ suveśābharaṇāḥ striyaḥ||8.127||

आपदुत्तरणं चैव शुभदेशावरोहणम्।

मद्यपानं शिरश्छेदमाममांसस्य भक्षणम्॥८.१२८॥

āpaduttaraṇaṁ caiva śubhadeśāvarohaṇam|
madyapānaṁ śiraśchedamāmamāṁsasya bhakṣaṇam||8.128||

देवतादर्शनं साक्षात्तथा विष्ठानुलेपनम्।

एवं विधं शुभं दृष्ट्वा सिद्धिं प्राप्नोत्यभीप्सिताम्॥८.१२९॥

devatādarśanaṁ sākṣāttathā viṣṭhānulepanam|
evaṁ vidhaṁ śubhaṁ dṛṣṭvā siddhiṁ prāpnotyabhīpsitām||8.129||

एतदेवान्यथाभूतं दुःस्वप्न इति कीर्त्यते।

पक्वमांसाशनाभ्यङ्गगर्तादिपतनादिकम्॥८.१३०॥

etadevānyathābhūtaṁ duḥsvapna iti kīrtyate|
pakvamāṁsāśanābhyaṅgagartādipatanādikam||8.130||

तन्त्रोक्तां निष्कृतिं कृत्वा द्विजत्वापादनं ततः।

देवाग्निगुरुदेवीनां पूजां कृत्वा सदा बुधः॥८.१३१॥

tantroktāṁ niṣkṛtiṁ kṛtvā dvijatvāpādanaṁ tataḥ|
devāgnigurudevīnāṁ pūjāṁ kṛtvā sadā budhaḥ||8.131||

एतेषामनिवेद्यैव न किञ्चिदपि भक्षयेत्।

देवद्रव्यं गुरुद्रव्यं चण्डीद्रव्यं च वर्जयेत्॥८.१३२॥

eteṣāmanivedyaiva na kiñcidapi bhakṣayet|

devadravyaṁ gurudravyaṁ caṇḍīdravyaṁ ca varjayet||8.132||

निष्फलं नैव चेष्टेत मुहूर्तमपि मन्त्रवित्।
योगाभ्यासरतो भूयान्मन्त्राभ्यासरतोऽपि वा॥८.१३३॥
niṣphalaṁ naiva ceṣṭeta muhūrtamapi mantravit|
yogābhyāsarato bhūyānmantrābhyāsarato'pi vā||8.133||

इत्येवमादिसमयाञ्श्रावयित्वा विसर्जयेत्।
देवदेवं ततः स्नानं शिष्याणामात्मनोऽपि वा॥८.१३४॥
ityevamādisamayāñśrāvayitvā visarjayet|
devadevaṁ tataḥ snānaṁ śiṣyāṇāmātmano'pi vā||8.134||

कारयेच्छिवकुम्भेन सर्वदुष्कृतहारिणा।
इत्येतत्सामयं कर्म समासात्परिकीर्तितम्॥८.१३५॥
kārayecchivakumbhena sarvaduṣkṛtahāriṇā|
ityetatsāmayaṁ karma samāsātparikīrtitam||8.135||

इति श्रीमालिनीविजयोत्तरे तन्त्रे समयाधिकारोऽष्टमः॥८॥
iti śrīmālinīvijayottare tantre samayādhikāro'ṣṭamaḥ||8||

## क्रियादिक्षाधिकारो नवमः ९ ॥

अथ नवमोऽधिकारः।

atha navamō:'dhikāraḥ|

अथैषां समयस्थानां कुर्याद्दीक्षां यदा गुरुः।

तदाधिवासनं कृत्वा[ल्चुन]॥९.१॥

athaiṣāṁ samayasthānāṁ kuryāddīkṣāṁ yadā guruḥ|
tadādhivāsanaṁ kṛtvā[lucana] ||9.1||

स च पूर्वां दिशं सम्यक् सूत्रमास्फालयेत्ततः।

तन्मध्यात्पूर्ववारुण्यावङ्कयेत् समान्तरम्॥९.२॥

sa ca pūrvāṁ diśaṁ samyak sūtramāsphālayettataḥ|
tanmadhyātpūrvavāruṇyāvaṅkayet samāntaram||9.2||

पूर्वापरसमासेन सूत्रेणोत्तरदक्षिणम्।

अङ्कयेदपरादङ्कात्पूर्वादपि तथैव ते॥९.३॥

pūrvāparasamāsena sūtreṇottaradakṣiṇam|
aṅkayedaparādaṅkātpūrvādapi tathaiva te||9.3||

मत्स्यमध्ये क्षिपेत्सूत्रमायतं दक्षिणोत्तरे।

मतक्षेत्रार्धमानेन मध्याद्दिक्ष्वङ्कयेत्समम्॥९.४॥

matsyamadhye kṣipetsūtramāyataṁ dakṣiṇottare|
matakṣetrārdhamānena madhyāddikṣvaṅkayetsamam||9.4||

तद्वद्दिक्स्थाच्च कोणेषु अनुलोमविलोमतः।

पातयेत्तेषु सूत्राणि चतुरश्रप्रसिद्धये॥९.५॥

tadvaddiksthācca koṇeṣu anulomavilomataḥ|
pātayetteṣu sūtrāṇi caturaśraprasiddhaye||9.5||

वेदाश्रिते हि हस्ते प्राक् पूर्वमर्धं विभाजयेत्।
हस्तार्धं सर्वतस्त्यक्त्वा पूर्वोदग्यामदिग्गतम्॥९.६॥
vedāśrite hi haste prāk pūrvamardhaṁ vibhājayet|
hastārdhaṁ sarvatastyaktvā pūrvodagyāmadiggatam||9.6||

गुणाङ्गुलसमैर्भागैः शेषमस्य विभाजयेत्।
त्र्यङ्गुलैः कोष्ठकैरूर्ध्वैस्तिर्यक् चाष्टद्विधात्मकैः॥९.७॥
guṇāṅgulasamairbhāgaiḥ śeṣamasya vibhājayet|
tryaṅgulaiḥ koṣṭhakairūrdhvaistiryak cāṣṭadvidhātmakaiḥ||9.7||

द्वौ द्वौ भागौ परित्यज्य पुनर्दक्षिणसौम्यगौ।
ब्रह्मणः पार्श्वयोर्जीवाच्चतुर्थात्पूर्वतस्तथा॥९.८॥
dvau dvau bhāgau parityajya punardakṣiṇasaumyagau|
brahmaṇaḥ pārśvayorjīvāccaturthātpūrvatastathā||9.8||

भागार्धभागमानं तु खण्डचन्द्रद्वयं द्वयम्।
तयोरन्तस्तृतीये तु दक्षिणोत्तरपार्श्वयोः॥९.९॥
bhāgārdhabhāgamānaṁ tu khaṇḍacandradvayaṁ dvayam|
tayorantastṛtīye tu dakṣiṇottarapārśvayoḥ||9.9||

जीवे खण्डेन्दुयुगलं कुर्यादन्तर्भ्रमाद्बुधः।
तयोरपरमर्मस्थं खण्डेन्दुद्वयकोटिगम्॥९.१०॥
jīve khaṇḍenduyugalaṁ kuryādantarbhramādbudhaḥ|
tayoraparamarmasthaṁ khaṇḍendudvayakoṭigam||9.10||

बहिर्मुखभ्रमं कुर्यात् खण्डचन्द्रद्वयं द्वयम्।
तद्वद्ब्रह्मणि कुर्वीत भागभागार्धसंमितम्॥९.११॥
bahirmukhabhramaṁ kuryāt khaṇḍacandradvayaṁ dvayam|
tadvadbrahmaṇi kurvīta bhāgabhāgārdhasaṁmitam||9.11||

ततो द्वितीयभागान्ते ब्रह्मणः पार्श्वयोर्द्वयोः।

द्वे रेखे पूर्वगे नेये भागत्र्यंशशमे बुधैः॥९.१२॥

tato dvitīyabhāgānte brahmaṇaḥ pārśvayordvayoḥ|
dve rekhe pūrvage neye bhāgatryaṁśaśame budhaiḥ||9.12||

एकार्धेन्दूर्ध्वकोटिस्थं ब्रह्मसूत्राग्रसङ्गतम्।

सूत्रद्वयं प्रकुर्वीत मध्यश्रृङ्गप्रसिद्धये॥९.१३॥

ekārdhendūrdhvakoṭisthaṁ brahmasūtrāgrasaṅgatam|
sūtradvayaṁ prakurvīta madhyaśṛṅgaprasiddhaye||9.13||

तदग्रपार्श्वयोर्जीवात्सूत्रमेकान्तरे श्रितम्।

आदिद्वितीयखण्डेन्दुकोणात्कोणान्तमाश्रयेत्॥९.१४॥

tadagrapārśvayorjīvātsūtramekāntare śritam|
ādidvitīyakhaṇḍendukoṇātkoṇāntamāśrayet||9.14||

तयोरेवापराज्जीवात्प्रथमार्धेन्दुकोणतः।

तद्वदेव नयेत्सूत्रं श्रृङ्गद्वितयसिद्धये॥९.१५॥

tayorevāparājjīvātprathamārdhendukoṇataḥ|
tadvadeva nayetsūtraṁ śṛṅgadvitayasiddhaye||9.15||

क्षेत्रार्धे चापरे दण्डो द्विकरच्छन्नपञ्चकः।

द्विकरं पञ्च तद्भागाः पञ्चपीठतिरोहिताः॥९.१६॥

kṣetrārdhe cāpare daṇḍo dvikaracchannapañcakaḥ|
dvikaraṁ pañca tadbhāgāḥ pañcapīṭhatirohitāḥ||9.16||

षेषमन्यद्भवेद्दृश्यं पृथुत्वाद्भागसंमितम्।

षड्विस्तृतं चतुर्दीर्घं तदधोऽमलसारकम्॥९.१७॥

ṣeṣamanyadbhaveddṛśyaṁ pṛthutvādbhāgasaṁmitam|
ṣaḍvistṛtaṁ caturdīrghaṁ tadadho'malasārakam||9.17||

वेदाङ्गुलं च तदधो मूलं तीक्ष्णाग्रमिष्यते।

आदिक्षेत्रस्य कुर्वीत दिक्षु द्वरचतुष्टयम्॥९.१८॥

vedāṅgulaṁ ca tadadho mūlaṁ tīkṣṇāgramiṣyate|

ādikṣetrasya kurvīta dikṣu dvaracatuṣṭayam||9.18||

हस्तायामं तदर्धं तु विस्तारादपि तत्समम्।
द्विगुणं बाह्यतः कुर्यात्ततः पद्मं यथा शृणु॥९.१९॥
hastāyāmaṁ tadardhaṁ tu vistārādapi tatsamam|
dviguṇaṁ bāhyataḥ kuryāttataḥ padmaṁ yathā śṛṇu||9.19||

एकैकभागमानानि कुर्याद्वृत्तानि वेदवत्।
दिक्ष्वष्टौ पुनरप्यष्टौ जीवसूत्राणि षोडश॥९.२०॥
ekaikabhāgamānāni kuryādvṛttāni vedavat|
dikṣvaṣṭau punarapyaṣṭau jīvasūtrāṇi ṣoḍaśa||9.20||

द्वयोर्द्वयोः पुनर्मध्ये तत्सङ्ख्यातानि पातयेत्।
एषां तृतीयवृत्तस्थं पार्श्वजीवसमं भ्रमम्॥९.२१॥
dvayordvayoḥ punarmadhye tatsaṅkhyātāni pātayet|
eṣāṁ tṛtīyavṛttasthaṁ pārśvajīvasamaṁ bhramam||9.21||

एतदन्तं प्रकुर्वीत ततो जीवाग्रमानयेत्।
यत्रैव कुत्रचित्सङ्गस्तत्सम्बन्धे स्थिरीकृते॥९.२२॥
etadantaṁ prakurvīta tato jīvāgramānayet|
yatraiva kutracitsaṅgastatsambandhe sthirīkṛte||9.22||

तत्र कृत्वा नयेन्मन्त्री पत्राग्राणां प्रसिद्धये।
एकैकस्मिन्दले कुर्यात्केसराणां त्रयं त्रयम्॥९.२३॥
tatra kṛtvā nayenmantrī patrāgrāṇāṁ prasiddhaye|
ekaikasmindale kuryātkesarāṇāṁ trayaṁ trayam||9.23||

द्विगुणाष्टाङ्गुलं कार्यं तद्वच्छृङ्गकजत्रयम्।
ततः प्रपूजयेन्मन्त्री रजोभिः सितपूरकैः॥९.२४॥
dviguṇāṣṭāṅgulaṁ kāryaṁ tadvacchṛṅgakajatrayam|
tataḥ prapūjayenmantrī rajobhiḥ sitapūrakaiḥ||9.24||

रक्तैः कृष्णैस्तथा पीतैर्हरितैश्च विशेषतः।

कर्णिका पीतवरेणेन मूलमध्याग्रदेशतः॥९.२५॥

raktaiḥ kṛṣṇaistathā pītairharitaiśca viśeṣataḥ|
karṇikā pītavareṇena mūlamadhyāgradeśataḥ||9.25||

सितं रक्तं तथा पीतं कार्यं केसरजालकम्।

दलानि शुक्लवर्णानि प्रतिवारणया सह॥९.२६॥

sitaṁ raktaṁ tathā pītaṁ kāryaṁ kesarajālakam|
dalāni śuklavarṇāni prativāraṇayā saha||9.26||

पीतं तद्वच्चतुष्कोणं कर्णिकार्धसमं बहिः।

सितरक्तपीतकृष्णैस्तत्पादान्वह्नितः क्रमात्॥९.२७॥

pītaṁ tadvaccatuṣkoṇaṁ karṇikārdhasamaṁ bahiḥ|
sitaraktapītakṛṣṇaistatpādānvahnitaḥ kramāt||9.27||

चतुर्भिरपि शृङ्गाणि त्रिभिर्मण्डलमिष्यते।

दण्डः स्यान्नीलरक्तेन पीतमामलसारकम्॥९.२८॥

caturbhirapi śṛṅgāṇi tribhirmaṇḍalamiṣyate|
daṇḍaḥ syānnīlaraktena pītamāmalasārakam||9.28||

रक्तं शूलं प्रकूर्वीत यत्तत्पूर्वं प्रकल्पितम्।

पश्चाद्द्वारस्य पूर्वेण त्यक्त्वाङ्गुलचतुष्टयम्॥९.२९॥

raktaṁ śūlaṁ prakūrvīta yattatpūrvaṁ prakalpitam|
paścāddvārasya pūrveṇa tyaktvāṅgulacatuṣṭayam||9.29||

द्वारं वेदाश्रि वृत्तं वा सङ्कीर्णं वा विचित्रितम्।

एकद्वित्रिपुरं तुल्यं सामुद्रमथ वोभयम्॥९.३०॥

dvāraṁ vedāśri vṛttaṁ vā saṅkīrṇaṁ vā vicitritam|
ekadvitripuraṁ tulyaṁ sāmudramatha vobhayam||9.30||

कपोलकण्ठशोभोपशोभादिबहुचित्रितम्।

विचित्राकारसंस्थानं वल्लीसूक्ष्मगृहान्वितम्॥९.३१॥

kapolakaṇṭhaśobhopaśobhādibahucitritam|
vicitrākārasaṁsthānaṁ vallīsūkṣmagṛhānvitam||9.31||

एवमत्र सुनिष्पन्ने गन्धवस्त्रेण मार्जनम्।

कृत्वा स्नानं प्रकुर्वीत पूर्वोक्तेनैव कर्मणा॥९.३२॥

evamatra suniṣpanne gandhavastreṇa mārjanam|
kṛtvā snānaṁ prakurvīta pūrvoktenaiva karmaṇā||9.32||

प्रविश्य पूर्ववन्मन्त्री उपविश्य यथा पुरा।

न्यस्य पूर्वोदितं सर्वं पञ्चधा भैरवात्मकम्॥९.३३॥

praviśya pūrvavanmantrī upaviśya yathā purā|
nyasya pūrvoditaṁ sarvaṁ pañcadhā bhairavātmakam||9.33||

उत्तरे विन्यसेच्छृङ्गे देवदेवं नवात्मकम्।

मध्ये भैरवसद्भावं दक्षिणे रतिशेखरम्॥९.३४॥

uttare vinyasecchṛṅge devadevaṁ navātmakam|
madhye bhairavasadbhāvaṁ dakṣiṇe ratiśekharam||9.34||

रक्तत्वङ्मांसमूत्रैस्तु वामकर्णविभूषितम्।

बिन्दुयुक्तं प्रमेयोतं रतिशेखरमादिशेत्॥९.३५॥

raktatvaṅmāṁsamūtraistu vāmakarṇavibhūṣitam|
binduyuktaṁ prameyotaṁ ratiśekharamādiśet||9.35||

शाक्तं च पूर्ववत्कृत्वा तर्पयेत्पूर्ववद्बुधः।

पुनरभ्यर्च्य देवेशं भक्त्या विज्ञापयेदिदम्॥९.३६॥

śāktaṁ ca pūrvavatkṛtvā tarpayetpūrvavadbudhaḥ|
punarabhyarcya deveśaṁ bhaktyā vijñāpayedidam||9.36||

गुरुत्वेन त्वयैवाहमाज्ञातः परमेश्वर।

अनुग्राह्यास्त्वया शिष्याः शिवशक्तिप्रचोदिताः॥९.३७॥

gurutvena tvayaivāhamājñātaḥ parameśvara|

anugrāhyāstvayā śiṣyāḥ śivaśaktipracoditāḥ||9.37||

तदेते तद्विधाः प्राप्तास्त्वमेषां कुर्वनुग्रहम्।

मदीयां तनुमाविश्य येनाहं त्वत्समो भवन्॥९.३८॥

tadete tadvidhāḥ prāptāstvameṣāṁ kurvanugraham|
madīyāṁ tanumāviśya yenāhaṁ tvatsamo bhavan||9.38||

करोम्येवमिति प्रोक्तो हर्षादुत्फुल्ललोचनः।

ततः षड्विधमध्वानमनेनाधिष्ठितं स्मरेत्॥९.३९॥

karomyevamiti prokto harṣādutphullalocanaḥ|
tataḥ ṣaḍvidhamadhvānamanenādhiṣṭhitaṁ smaret||9.39||

सृष्ट्यादिपञ्चकर्माणि निष्पाद्यान्यस्य चिन्तयेत्।

शक्तिभिर्जीवमूर्तिः स्याद्विधैवास्य परापरा॥९.४०॥

sṛṣṭyādipañcakarmāṇi niṣpādyānyasya cintayet|
śaktibhirjīvamūrtiḥ syāddvidhaivāsya parāparā||9.40||

मूर्तामूर्तत्वभेदेन मामप्येषानुतिष्ठति।

करणत्वं प्रयान्त्यस्य मन्त्रा ये हृदयादयः॥९.४१॥

mūrtāmūrtatvabhedena māmapyeṣānutiṣṭhati|
karaṇatvaṁ prayāntyasya mantrā ye hṛdayādayaḥ||9.41||

एवम्भूतं शिवं ध्यात्वा तद्गतेनान्तरात्मना।

भाव्यं तन्मयमात्मानं दशधावर्तयेच्छिवम्॥९.४२॥

evambhūtaṁ śivaṁ dhyātvā tadgatenāntarātmanā|
bhāvyaṁ tanmayamātmānaṁ daśadhāvartayecchivam||9.42||

त्रिःकृत्वा सर्वमन्त्रांश्च गर्भावरणसंस्थितान्।

सितोष्णीषं ततो बद्धा सप्तजप्तं नवात्मना॥९.४३॥

triḥkṛtvā sarvamantrāṁśca garbhāvaraṇasaṁsthitān|
sitoṣṇīṣaṁ tato baddhvā saptajaptaṁ navātmanā||9.43||

शिवहस्तं ततः कुर्यात्पाशविश्लेषकारकम्।

प्रक्षाल्य गन्धतोयेन हस्तं हस्तेन केनचित्॥९.४४॥

śivahastaṁ tataḥ kuryātpāśaviśleṣakārakam|
prakṣālya gandhatoyena hastaṁ hastena kenacit||9.44||

गन्धदिग्धो यजेद्देवं साङ्गमासनवर्जितम्।

आत्मन्यालम्भनं कुर्याद्ग्रहणं योजनं तथा॥९.४५॥

gandhadigdho yajeddevaṁ sāṅgamāsanavarjitam|
ātmanyālambhanaṁ kuryādgrahaṇaṁ yojanaṁ tathā||9.45||

वियोगं च तहोद्धारं पाशच्छेदादिकं च यत्।

एवं पतित्वमासाद्य प्रपञ्चव्याप्तितः शिवम्॥९.४६॥

viyogaṁ ca tahoddhāraṁ pāśacchedādikaṁ ca yat|
evaṁ patitvamāsādya prapañcavyāptitaḥ śivam||9.46||

भावयेत्पृथगात्मानं तत्समानगुणं ततः।

मण्डलस्थोऽहमेवायं साक्षीवाखिलकर्मसु॥९.४७॥

bhāvayetpṛthagātmānaṁ tatsamānaguṇaṁ tataḥ|
maṇḍalastho'hamevāyaṁ sākṣīvākhilakarmasu||9.47||

होमाधिकरणत्वेन वह्नावहमवस्थितः।

आयागान्तमहं कुम्भे संस्थितो विघ्नशान्तये॥९.४८॥

homādhikaraṇatvena vahnāvahamavasthitaḥ|
āyāgāntamahaṁ kumbhe saṁsthito vighnaśāntaye||9.48||

शिष्यदेहे च तत्पाशविश्लेषत्वप्रसिद्धये।

साक्षात्स्वदेहसंस्थोऽहं कर्तानुग्रहकर्मणः॥९.४९॥

śiṣyadehe ca tatpāśaviśleṣatvaprasiddhaye|
sākṣātsvadehasaṁstho'haṁ kartānugrahakarmaṇaḥ||9.49||

इत्येतत् सर्वमालोच्य शोध्याध्वानं विचिन्तयेत्।

दीक्षां येनाध्वना मन्त्री शिष्याणां कर्तुमिच्छति॥९.५०॥

ityetat sarvamālocya śodhyādhvānaṁ vicintayet|
dīkṣāṁ yenādhvanā mantrī śiṣyāṇāṁ kartumicchati||9.50||

तत्रैवालोचयेत्सर्वं यायात्पदमनामयम्।

तत्र तेनापृथग्भूत्वा पुनः सञ्चिन्तयेदिदम्॥९.५१॥

tatraivālocayetsarvaṁ yāyātpadamanāmayam|
tatra tenāpṛthagbhūtvā punaḥ sañcintayedidam||9.51||

अहमेव परं तत्त्वं मयि सर्वमिदं जगत्।

अधिष्ठाता च कर्ता च सर्वस्याहमवस्थितः॥९.५२॥

ahameva paraṁ tattvaṁ mayi sarvamidaṁ jagat|
adhiṣṭhātā ca kartā ca sarvasyāhamavasthitaḥ||9.52||

तत्समत्वं गतो जन्तुर्मुक्त इत्यभिधीयते।

एवं सञ्चिन्त्य भूयोऽपि शोध्यमाद्यं समाश्रयेत्॥९.५३॥

tatsamatvaṁ gato janturmukta ityabhidhīyate|
evaṁ sañcintya bhūyo'pi śodhyamādyaṁ samāśrayet||9.53||

शिष्यमण्डलवह्नीनां तत्रैकं भावयेत्स्थितम्।

शोध्याध्वानं तु शिष्याणां न्यस्य देहे पुरोक्तवत्॥९.५४॥

śiṣyamaṇḍalavahnīnāṁ tatraikaṁ bhāvayetsthitam|
śodhyādhvānaṁ tu śiṣyāṇāṁ nyasya dehe puroktavat||9.54||

स्वेन स्वेनैव मन्त्रेण स्वव्याप्तिध्यानमाश्रयेत्।

आगन्तु सहजं शाक्तं बद्ध्वादौ पाशपञ्जरम्॥९.५५॥

svena svenaiva mantreṇa svavyāptidhyānamāśrayet|
āgantu sahajaṁ śāktaṁ baddhvādau pāśapañjaram||9.55||

बाहुकण्ठशिखाग्रेषु त्रिषु त्रिगुणतन्तुना।

स्वमन्त्रेण ततस्तत्त्वमावाह्येष्ट्वा प्रतर्प्य च॥९.५६॥

bāhukaṇṭhaśikhāgreṣu triṣu triguṇatantunā|

svamantreṇa tatastattvamāvāhyeṣṭvā pratarpya ca||56||

ततस्तच्छोध्ययोनीनां व्यापिनीं योनिमानयेत्।
मायान्तेऽध्वनि तामेव शुद्धे विद्यां विचक्षणः॥९.५७॥
tatastacchodhyayonīnāṁ vyāpinīṁ yonimānayet|
māyānte'dhvani tāmeva śuddhe vidyāṁ vicakṣaṇaḥ||9.57||

तस्यां सन्तर्पणं कृत्वा शिष्यमस्त्रेण ताडयेत्।
आलभ्य हृदये विद्वाञ्छिवहस्तेन तं पुनः॥९.५८॥
tasyāṁ santarpaṇaṁ kṛtvā śiṣyamastreṇa tāḍayet|
ālabhya hṛdaye vidvāñchivahastena taṁ punaḥ||9.58||

ग्रहणं तस्य कुर्वीत रश्मिमात्रावियोगतः।
नाडीमार्गेण गत्वा तु हंहृन्मन्त्रपुटीकृतम्॥९.५९॥
grahaṇaṁ tasya kurvīta raśmimātrāviyogataḥ|
nāḍīmārgeṇa gatvā tu haṁhṛnmantraputīkṛtam||9.59||

कृत्वात्मस्थं ततो योनौ गर्भाधानं विचिन्तयेत्।
त्र्यर्णार्धाक्षरया मन्त्री सर्वगर्भक्रियान्वितम्॥९.६०॥
kṛtvātmasthaṁ tato yonau garbhādhānaṁ vicintayet|
tryarṇārdhākṣarayā mantrī sarvagarbhakriyānvitam||9.60||

भोग्यभोक्तृत्वसामर्थ्यनिष्पत्त्या जननं बुधः।
दक्षश्रृङ्गस्थया मन्त्री प्रकुर्वीत सुलोचने॥९.६१॥
bhogyabhoktṛtvasāmarthyaniṣpattyā jananaṁ budhaḥ|
dakṣaśṛṅgasthayā mantrī prakurvīta sulocane||9.61||

पिबनीपूर्विकाभिश्च अस्त्राद्यैः परयापि च।
सम्यगाहुतयो दद्याद्दश पञ्च विचक्षणः॥९.६२॥
pibanīpūrvikābhiśca astrādyaiḥ parayāpi ca|
samyagāhutayo dadyāddaśa pañca vicakṣaṇaḥ||9.62||

ततोऽस्यापरया कार्यं पाशविच्छेदनं बुधैः।

भुवनेशमथामन्त्र्य तत्त्वेश्वरमथापि वा॥ ९.६३॥

tato'syāparayā kāryaṁ pāśavicchedanaṁ budhaiḥ|
bhuvaneśamathāmantrya tattveśvaramathāpi vā||9.63||

भोगभागा[lacuna] पश्चात्तमिदमादिशेत्।

भुवनेश त्वया नास्य साधकस्य शिवाज्ञया॥ ९.६४॥

bhogabhāgā[lacuna] paścāt tam idam ādiśet|
bhuvaneśa tvayā nāsya sādhakasya śivājñayā ||9.64||

प्रतिबन्धः प्रकर्तव्यो यातुः पदमनामयम्।

उत्क्षेपणं ततः कुर्यात्तयैवाध्युष्टवर्णया॥ ९.६५॥

pratibandhaḥ prakartavyo yātuḥ padamanāmayam|
utkṣepaṇaṁ tataḥ kuryāttayaivādhyuṣṭavarṇayā||9.65||

अव्याप्तिमन्त्रसंयोगात्पृथङ् मार्गविशुद्धये।

दद्यादेकैकशो ध्यात्वा आहुतीनां त्रयं त्रयम्॥ ९.६६॥

avyāptimantrasaṁyogātpṛthaṅ mārgaviśuddhaye|
dadyādekaikaśo dhyātvā āhutīnāṁ trayaṁ trayam||9.66||

ततः पूर्णाहुतिं दद्यात्परया वौषडन्तया।

शिशुमुत्क्षिप्य चात्मस्थं तद्देहस्थं च कारयेत्॥ ९.६७॥

tataḥ pūrṇāhutiṁ dadyātparayā vauṣaḍantayā|
śiśumutkṣipya cātmasthaṁ taddehasthaṁ ca kārayet||9.67||

आहुतीनां त्रयं दद्याद्दत्त्वा पूर्णाहुतिं बुधः।

महापाशुपतास्त्रेण विलोमादिविशुद्धये॥ ९.६८॥

āhutīnāṁ trayaṁ dadyāddattvā pūrṇāhutiṁ budhaḥ|
mahāpāśupatāstreṇa vilomādiviśuddhaye||9.68||

विसर्जयित्वा वागीशीं तत्त्वं तु तदनन्तरम्।

विलीनं भावयेच्छुद्धमशुद्धे परमेश्वरि॥९.६९॥

visarjayitvā vāgīśīṁ tattvaṁ tu tadanantaram|
vilīnaṁ bhāvayecchuddhamaśuddhe parameśvari||9.69||

कालान्तव्याप्तिसंशुद्धौ कृतायामेवमादरात्।
बाहुपाशं तु तं छित्त्वा होमयेदाज्यसंयुतम्॥९.७०॥

kālāntavyāptisaṁśuddhau kṛtāyāmevamādarāt|
bāhupāśaṁ tu taṁ chittvā homayedājyasaṁyutam||9.70||

मायातत्त्वे विशुद्धे तु कण्ठपाशे तथा बुधः।
मायान्तमार्गसंशुद्धौ दीक्षाकर्मणि सर्वतः॥९.७१॥

māyātattve viśuddhe tu kaṇṭhapāśe tathā budhaḥ|
māyāntamārgasaṁśuddhau dīkṣākarmaṇi sarvataḥ||9.71||

क्रियास्वनुक्तमन्त्रासु योजयेदपरां बुधः।
विद्यादिसकलान्ते च तद्वदेव परान्पराम्॥९.७२॥

kriyāsvanuktamantrāsu yojayedaparāṁ budhaḥ|
vidyādisakalānte ca tadvadeva parānparām||9.72||

योजयेन्नैश्वरादूर्ध्वं पिबन्यादिकमष्टकम्।
न चापि सकलादूर्ध्वमङ्गषट्कं विचक्षणः॥९.७३॥

yojayennaiśvarādūrdhvaṁ pibanyādikamaṣṭakam|
na cāpi sakalādūrdhvamaṅgaṣaṭkaṁ vicakṣaṇaḥ||9.73||

निष्कले परया कार्यं यत्किञ्चिद्विधिचोदितम्।
विशुद्धे सकलान्ते तु शिखां छित्त्वा विचक्षणः॥९.७४॥

niṣkale parayā kāryaṁ yatkiñcidvidhicoditam|
viśuddhe sakalānte tu śikhāṁ chittvā vicakṣaṇaḥ||9.74||

हुत्वा चाज्यं ततः शिष्यं स्नापयेदनुपूर्वतः।
आचम्याभ्यर्च्य देवेशं स्रुवमापूर्य सर्पिषा॥९.७५॥

hutvā cājyaṁ tataḥ śiṣyaṁ snāpayedanupūrvataḥ|

ācamyābhyarcya deveśaṁ sruvamāpūrya sarpiṣā||9.75||

कृत्वा शिष्यं तथात्मस्थं मूलमन्त्रमनुस्मरेत्।

शिवशक्तिं तथात्मानं शिष्यं सर्पिस्तथानलम्॥ ९.७६ ॥

kṛtvā śiṣyaṁ tathātmasthaṁ mūlamantramanusmaret|
śivaśaktiṁ tathātmānaṁ śiṣyaṁ sarpistathānalam||9.76||

एकीकुर्वञ्छनैर्गच्छेद्द्वादशान्तमनन्यधीः।

तत्र कुम्भकमास्थाय ध्यायन्सकलनिष्कलम्॥ ९.७७ ॥

ekīkurvañchanairgaccheddvādaśāntamananyadhīḥ|
tatra kumbhakamāsthāya dhyāyansakalaniṣkalam||9.77||

तिष्ठेत्तावदनुद्विग्नो यावदाज्यक्षयो भवेत्।

एवं युक्तः परे तत्त्वे गुरुणा शिवमूर्तिना॥ ९.७८ ॥

tiṣṭhettāvadanudvigno yāvadājyakṣayo bhavet|
evaṁ yuktaḥ pare tattve guruṇā śivamūrtinā||9.78||

न भूयः पशुतामेति दग्धमायानिबन्धनः।

विधिरेष समाख्यातो दीक्षाकर्मणि भौवने॥ ९.७९ ॥

na bhūyaḥ paśutāmeti dagdhamāyānibandhanaḥ|
vidhireṣa samākhyāto dīkṣākarmaṇi bhauvane||9.79||

इतराध्वविधिं मुक्त्वा शिवयोगविधिं तथा।

विलोमकर्म सन्त्यज्य द्विगुणस्तत्त्ववर्त्मनि॥ ९.८० ॥

itarādhvavidhiṁ muktvā śivayogavidhiṁ tathā|
vilomakarma santyajya dviguṇastattvavartmani||9.80||

तद्वच्च वर्णमार्गेऽपि चतुर्धा पदवर्त्मनि।

अष्टधा मन्त्रमार्गेऽपि कलाख्येऽपि च तद्विधा॥ ९.८१ ॥

tadvacca varṇamārge'pi caturdhā padavartmani|
aṣṭadhā mantramārge'pi kalākhye'pi ca taddvidhā||9.81||

त्रिखण्डे विंशतिगुणः स एव परिकीर्तितः।
इति सर्वाध्वसंशुद्धिः समासात्परिकीर्तिता॥९.८२॥
trikhaṇḍe viṁśatiguṇaḥ sa eva parikīrtitaḥ|
iti sarvādhvasaṁśuddhiḥ samāsātparikīrtitā||9.82||

साधकाचार्ययोः कर्म कथ्यमानमतः शृणु।
sādhakācāryayoḥ karma kathyamānamataḥ śṛṇu|

इति श्रीमालिनीविजयोत्तरे तन्त्रे क्रियादीक्षाधिकारो नवमोऽधिकारः॥९॥
iti śrīmālinīvijayottare tantre kriyādīkṣādhikāro navamo'dhikāraḥ||9||

अभिषेकाधिकारो दशमः १० ॥

अथ दशमोऽधिकारः।

atha daśamō:'dhikāraḥ|

अथ लक्षणसम्पन्नं सिद्धिसाधनतत्परम्।

शास्त्रज्ञं संयतं धीरमलुब्धमशठं दृढम्॥ १०.१ ॥

atha lakṣaṇasampannaṁ siddhisādhanatatparam|

śāstrajñaṁ saṁyataṁ dhīramalubdhamaśaṭhaṁ dṛḍham||10.1||

अपरीक्ष्य गुरुस्तद्वत्साधकत्वे नियोजयेत्।

समभ्यर्च्य विधानेन पूर्ववत्परमेश्वरम्॥ १०.२ ॥

aparīkṣya gurustadvatsādhakatve niyojayet|

samabhyarcya vidhānena pūrvavatparameśvaram||10.2||

द्वितीये पूर्ववत्कुम्भं हेमादिमयमव्रणम्।

सर्वत्र मध्यपद्मस्य दक्षिणं दलमाश्रितम्॥ १०.३ ॥

dvitīye pūrvavatkumbhaṁ hemādimayamavraṇam|

sarvatra madhyapadmasya dakṣiṇaṁ dalamāśritam||10.3||

नायकानां पृथङ्मन्त्रान्पूजयेत्कुसुमादिभिः।

तं सन्तर्प्य सहस्रेण प्रकुर्यादभिषेचनम्॥ १०.४ ॥

nāyakānāṁ pṛthaṅmantrānpūjayetkusumādibhiḥ|

taṁ santarpya sahasreṇa prakuryādabhiṣecanam||10.4||

भद्रपीठे शुभे स्थाप्य श्रीपर्णे दारुनीर्मिते।

पूर्वामुखमुदग्वक्त्रं स्नातं पुष्पाद्यलङ्कृतम्॥ १०.५ ॥

bhadrapīṭhe śubhe sthāpya śrīparṇe dārunīrmite|

pūrvāmukhamudagvaktraṁ snātaṁ puṣpādyalaṅkṛtam||10.5||

कृतमन्त्रतनुः सम्यक् सम्यक् कृतमङ्गलः।

शङ्खभेर्यादिनिर्घोषैर्वेदमङ्गलनिस्वनैः॥ १०.६॥

kṛtamantratanuḥ samyak samyak kṛtamaṅgalaḥ|
śaṅkhabheryādinirghorṣairvedamaṅgalanisvanaiḥ||10.6||

सर्वराजोपचारेण कृत्वा तस्याभिषेचनम्।

सदाशिवसमं ध्यात्वा ततस्तमपि भूषयेत्॥ १०.७॥

sarvarājopacāreṇa kṛtvā tasyābhiṣecanam|
sadāśivasamaṁ dhyātvā tatastamapi bhūṣayet||10.7||

पुनः सम्पूज्य देवेशं मन्त्रमस्मै ददेद्बुधः।

पुष्पाक्षततिलोपेतः सजल[लचुन]श्वरं न्यसेत्॥ १०.८॥

punaḥ sampūjya deveśaṃ mantram asmai daded budhaḥ|
puṣpākṣatatilopetaḥ sajala[lacuna]śvaraṃ nyaset||10.8||

सोऽपि मूर्धनि तं तद्वन्मूर्तिमाश्रित्य दक्षिणाम्।

अभिषिच्य ततोऽस्त्रेण रुद्रशक्तिं प्रकाशयेत्॥ १०.९॥

so'pi mūrdhani taṁ tadvanmūrtimāśritya dakṣiṇām|
abhiṣicya tato'streṇa rudraśaktiṁ prakāśayet||10.9||

स तयालिङ्ग्य तन्मन्त्रं सहस्रेण प्रतर्पयेत्।

तदा प्रभृति तन्निष्ठस्तत्समानगुणो भवेत्॥ १०.१०॥

sa tayāliṅgya tanmantraṁ sahasreṇa pratarpayet|
tadā prabhṛti tanniṣṭhastatsamānaguṇo bhavet||10.10||

आचार्यस्याभिषेकोऽयं स[लचुन] मन्त्रविधिं विना।

किं तु तस्य [लचुन] अधिवासपदान्वितम्॥ १०.११॥

ācāryasyābhiṣeko'yaṁ sa[lacuna] mantravidhiṃ vinā|
kiṃ tu tasya [lacuna] adhivāsapadānvitam||10.11||

एवमेतत्पदं प्राप्यं दुष्प्राप्यमकृतात्मनाम्।

साधको मन्त्रसिद्ध्यर्थं मन्त्रव्रतमुपाचरेत्॥ १०.१२॥

evametatpadaṁ prāpyaṁ duṣprāpyamakṛtātmanām|
sādhako mantrasiddhyarthaṁ mantravratamupācaret||10.12||

एवं कृत्वाभिषेकोक्तं स्नात्वा विद्याधिपं जपेत्।

लक्षमेकं दशांशेन तस्य तर्पणमाचरेत्॥ १०.१३॥

evaṁ kṛtvābhiṣekoktaṁ snātvā vidyādhipaṁ japet|
lakṣamekaṁ daśāṁśena tasya tarpaṇamācaret||10.13||

पूर्ववच्चाभिषेकं च कृत्वा ब्रह्मशिरो जपेत्।

तल्लक्ष्यस्तन्मयो भूत्वा लक्षद्वयमतन्द्रितः॥ १०.१४॥

pūrvavaccābhiṣekaṁ ca kṛtvā brahmaśiro japet|
tallakṣyastanmayo bhūtvā lakṣadvayamatandritaḥ||10.14||

लक्षद्वयं च रुद्राणीं चतुष्कं तु पुरुष्टुतम्।

लक्षाणां पञ्चकं देवि महापाशुपतं जपेत्॥ १०.१५॥

lakṣadvayaṁ ca rudrāṇīṁ catuṣkaṁ tu puruṣṭutam|
lakṣāṇāṁ pañcakaṁ devi mahāpāśupataṁ japet||10.15||

सितरक्तपीतकृष्णविचित्राम्बरभूषणः।

ततः संरक्षितो मन्त्रैरेभिरप्रतिमो भवेत्॥ १०.१६॥

sitaraktapītakṛṣṇavicitrāmbarabhūṣaṇaḥ|
tataḥ saṁrakṣito mantrairebhirapratimo bhavet||10.16||

अबाध्यः सर्वदुष्टानां मन्त्रतेजोपबृंहितः।

एवं चीर्णव्रतो भूत्वा यं साधयितुमिच्छति॥ १०.१७॥

abādhyaḥ sarvaduṣṭānāṁ mantratejopabṛṁhitaḥ|
evaṁ cīrṇavrato bhūtvā yaṁ sādhayitumicchati||10.17||

दत्त्वार्घं तस्य लक्षाणां जपेन्नवकमादरात्।

उत्तमद्रव्यहोमाच्च तद्दशांशेन तर्पणम्॥ १०.१८॥

dattvārghaṁ tasya lakṣāṇāṁ japennavakamādarāt|

uttamadravyahomācca taddaśāṁśena tarpaṇam||10.18||

महाक्ष्मापपलान्याहुरुत्तमादीनि तद्विदः।

मध्यमे द्विगुणं कृत्वा त्रिगुणं कन्यसेऽपि च॥ १०.१९॥

mahākṣmāpapalānyāhuruttamādīni tadvidaḥ|
madhyame dviguṇaṁ kṛtvā triguṇaṁ kanyase'pi ca||10.19||

आज्यगुग्गुलनृस्नेहा महामांससमाः मताः।

दधिबिल्वपयः पद्माः क्ष्मासमाः परिकीर्तिताः॥ १०.२०॥

ājyaguggulanṛsnehā mahāmāṁsasamāḥ matāḥ|
dadhibilvapayaḥ padmāḥ kṣmāsamāḥ parikīrtitāḥ||10.20||

धात्रीदूर्वामृतामीनाः सम्यगाज्यसमा मताः।

तिलाद्यैरथ कुर्वीत नवषड्त्रिगुणं क्रमात्॥ १०.२१॥

dhātrīdūrvāmṛtāmīnāḥ samyagājyasamā matāḥ|
tilādyairatha kurvīta navaṣaṭtriguṇaṁ kramāt||10.21||

पूर्वमेवमिमं कृत्वा सिद्धेरर्घं ददेद्बुधः।

दत्त्वार्घं तु जपेत्तावद्यावत्सिद्धिरभीप्सिता॥ १०.२२॥

pūrvamevamimaṁ kṛtvā siddherarghaṁ dadedbudhaḥ|
dattvārghaṁ tu japettāvadyāvatsiddhirabhīpsitā||10.22||

लक्षेणैकेन पृथ्वीशः सभृत्यबलवाहनः।

वशमानीयते देवि द्वाभ्यां राज्यमवाप्नुयात्॥ १०.२३॥

lakṣeṇaikena pṛthvīśaḥ sabhṛtyabalavāhanaḥ|
vaśamānīyate devi dvābhyāṁ rājyamavāpnuyāt||10.23||

त्रिभिर्निधानसंसिद्धिश्चतुर्भिर्बलसिद्धयः।

पञ्चभिर्मेदिनी सर्वा षड्भिरप्सरसां गणः॥ १०.२४॥

tribhirnidhānasaṁsiddhiścaturbhirbalasiddhayaḥ|
pañcabhirmedinī sarvā ṣaḍbhirapsarasāṁ gaṇaḥ||10.24||

सप्तभिः सप्तलोकाश्च दशभिस्तत्समो भवेत्।

पञ्चाशद्भिस्ततो गच्छेदव्यक्तान्तं महेश्वरि॥ १०.२५॥

saptabhiḥ saptalokāśca daśabhistatsamo bhavet|
pañcāśadbhistato gacchedavyaktāntaṁ maheśvari||10.25||

मायान्तं षष्टिभिर्लक्षैरीश्वरान्तमशीतिभिः।

सकलावनिपर्यन्तं कोटिजप्तस्य सिद्ध्यति॥ १०.२६॥

māyāntaṁ ṣaṣṭibhirlakṣairīśvarāntamaśītibhiḥ|
sakalāvaniparyantaṁ koṭijaptasya siddhyati||10.26||

अथवा वीरचित्तः स्यात्कृत्वा सेवां यथोदिताम्।

कृष्णभूतदिने रात्रौ विधिमेनं समाचरेत्॥ १०.२७॥

athavā vīracittaḥ syātkṛtvā sevāṁ yathoditām|
kṛṣṇabhūtadine rātrau vidhimenaṁ samācaret||10.27||

कृत्वा पूर्वोदितं यागं हुत्वा द्रव्यमथोत्तरम्।

ऊर्ध्वकायो जपेन्मन्त्री सुनिष्कम्पोत्तरामुखः॥ १०.२८॥

kṛtvā pūrvoditaṁ yāgaṁ hutvā dravyamathottaram|
ūrdhvakāyo japenmantrī suniṣkampottarāmukhaḥ||10.28||

तावद्यावत्समायाता योगेश्वर्यः समन्ततः।

कृत्वा कलकलारावमतिघोरं सुदारुणम्॥ १०.२९॥

tāvadyāvatsamāyātā yogeśvaryaḥ samantataḥ|
kṛtvā kalakalārāvamatighoraṁ sudāruṇam||10.29||

भूमौ निपत्य तिष्ठन्ति वेष्ट्यान्तः साधकेश्वरम्।

तासां कृत्वा नमस्कारं भित्त्वा वामाङ्गमात्मनः॥ १०.३०॥

bhūmau nipatya tiṣṭhanti veṣṭyāntaḥ sādhakeśvaram|
tāsāṁ kṛtvā namaskāraṁ bhittvā vāmāṅgamātmanaḥ||10.30||

तदुत्थेन ततस्तासां दत्त्वार्घं तत्समो भवेत्।

आचार्योऽपि च षण्मासं मौनी प्रतिदिनं चरेत्॥ १०.३१॥

tadutthena tatastāsāṁ dattvārghaṁ tatsamo bhavet|
ācāryo'pi ca ṣaṇmāsaṁ maunī pratidinaṁ caret||10.31||

दश पञ्च च ये मन्त्राः पूर्वमुक्ता मया तव।

पूर्वन्यासेन सन्नद्धस्त्रिकालं वह्निकार्यकृत्॥ १०.३२॥

daśa pañca ca ye mantrāḥ pūrvamuktā mayā tava|
pūrvanyāsena sannaddhastrikālaṁ vahnikāryakṛt||10.32||

ध्यायेत्पूर्वोदितं शूलं ब्रह्मचर्यं समाश्रितः।

कृत्वा पूर्वोदितं यागं त्रिशक्तिपरिमण्डलम्॥ १०.३३॥

dhyāyetpūrvoditaṁ śūlaṁ brahmacaryaṁ samāśritaḥ|
kṛtvā pūrvoditaṁ yāgaṁ triśaktiparimaṇḍalam||10.33||

अभिषिञ्चेत्तदात्मानमादावन्ते च दैशिकः।

एवं चीर्णव्रतो भूत्वा मन्त्री मन्त्रविदुत्तमः॥ १०.३४॥

abhiṣiñcettadātmānamādāvante ca daiśikaḥ|
evaṁ cīrṇavrato bhūtvā mantrī mantraviduttamaḥ||10.34||

निग्रहानुग्रहं कर्म कुर्वन्न प्रतिहन्यते।

शुद्धयोर्विन्यसेन्मूलमध्यादित्रितये त्रयम्॥ १०.३५॥

nigrahānugrahaṁ karma kurvanna pratihanyate|
śuddhayorvinyasenmūlamadhyāditritaye trayam||10.35||

वामाङ्गुष्ठे तले नेत्रं तर्जन्यामस्त्रमेव च।

अक्षह्रीमिति खण्डेन शब्दराशिं निवेशयेत्॥ १०.३६॥

vāmāṅguṣṭhe tale netraṁ tarjanyāmastrameva ca|
akṣahrīmiti khaṇḍena śabdarāśiṁ niveśayet||10.36||

नफह्रीमित्यनेनापि शक्तिमूर्तिं विचक्षणः।

विपरीतमहामुद्राप्रयोगान्[लचुन]मूलमेव च॥ १०.३७॥

naphahrīmityanenāpi śaktimūrtiṁ vicakṣaṇaḥ|

viparītamahāmudrāprayogān[lacuna]mūlameva ca||10.37||

स्वस्थानेषु तथाङ्गानि न्यासः सामान्य इत्ययम्।
svasthāneṣu tathāṅgāni nyāsaḥ sāmānya ityayam|

इति श्रीमालिनीविजयोत्तरे तन्त्रेऽभिषेकाधिकारो दशमः॥१०॥
iti śrīmālinīvijayottare tantre'bhiṣekādhikāro daśamaḥ||10||

## दीक्षाधिकार एकादशः ११ ॥

अथ एकादशोऽधिकारः।
atha ēkādaśō:'dhikāraḥ|

अथातः सम्प्रवक्ष्यामि दीक्षां परमदुर्लभाम्।
भुक्तिमुक्तिकरीं सम्यक्सद्यः प्रत्ययकारिकाम्॥ ११.१॥
athātaḥ sampravakṣyāmi dīkṣāṁ paramadurlabhām|
bhuktimuktikarīṁ samyaksadyaḥ pratyayakārikām||11.1||

नास्यां मण्डलकुण्डादि किञ्चिदप्युपयुज्यते।
न च न्यासादिकं पूर्वं स्नानादि च यथेच्छया॥ ११.२॥
nāsyāṁ maṇḍalakuṇḍādi kiñcidapyupayujyate|
na ca nyāsādikaṁ pūrvaṁ snānādi ca yathecchayā||11.2||

प्रविश्य यागसदनं सूपलिप्तं सुचर्च्चितम्।
प्राङ्मुखोदङ्मुखो वापि सुपुष्पाम्बरभूषितः॥ ११.३॥
praviśya yāgasadanaṁ sūpaliptaṁ sucarcitam|
prāṅmukhodaṅmukho vāpi supuṣpāmbarabhūṣitaḥ||11.3||

दीप्तां शक्तिमनुस्मृत्य पादाग्रान्मस्तकावधि।
महामुद्राप्रयोगेन निर्दग्धां चिन्तयेत्तनुम्॥ ११.४॥
dīptāṁ śaktimanusmṛtya pādāgrānmastakāvadhi|
mahāmudrāprayogena nirdagdhāṁ cintayettanum||11.4||

अनुलोमप्रयोगाच्च मालिनीममृतप्रभाम्।
चिन्तयेत्तनुनिष्पत्त्यै तद्ध्यानगतमानसः॥ ११.५॥
anulomaprayogācca mālinīmamṛtaprabhām|
cintayettanuniṣpattyai taddhyānagatamānasaḥ||11.5||

शोध्याध्वानं ततो देहे पूर्वोक्तमनुचिन्तयेत्।
ततः संशोध्य वस्तूनि शक्त्यैवामृततां नयेत्॥ ११.६॥
śodhyādhvānaṁ tato dehe pūrvoktamanucintayet|
tataḥ saṁśodhya vastūni śaktyaivāmṛtatāṁ nayet||11.6||

परासम्पुटमध्यस्थां मालिनीं सर्वकर्मसु।
योजयेत विधानज्ञः परां वा केवलाम्प्रिये॥ ११.७॥
parāsampuṭamadhyasthāṁ mālinīṁ sarvakarmasu|
yojayeta vidhānajñaḥ parāṁ vā kevalāmpriye||11.7||

गणेशं पूजयित्वा तु पुरा विघ्नप्रशान्तये।
ततः स्वगुरुमारभ्य पूजयेद्गुरुपद्धतिम्॥ ११.८॥
gaṇeśaṁ pūjayitvā tu purā vighnapraśāntaye|
tataḥ svagurumārabhya pūjayedgurupaddhatim||11.8||

गणेशाधस्ततः सर्वं यजेन्मन्त्रकदम्बकम्।
तत्पतीनां ततोऽर्धं च तत्रैव परिपूजयेत्॥ ११.९॥
gaṇeśādhastataḥ sarvaṁ yajenmantrakadambakam|
tatpatīnāṁ tato'rdhaṁ ca tatraiva paripūjayet||11.9||

अन्त्याधः पूजयेद्विद्यां तद्वद्विद्यां महेश्वरीम्।
मन्त्रविद्यागणस्यान्तः कुलशक्तिं निवेशयेत्॥ ११.१०॥
antyādhaḥ pūjayedvidyāṁ tadvadvidyāṁ maheśvarīm|
mantravidyāgaṇasyāntaḥ kulaśaktiṁ niveśayet||11.10||

पूर्वयाम्यापरोदक्षु माहेश्यादिचतुष्टयम्।
इन्द्राणीपूर्वकं तद्वदैशादिदल अन्तगम्॥ ११.११॥
pūrvayāmyāparodakṣu māheśyādicatuṣṭayam|
indrāṇīpūrvakaṁ tadvadaiśādidala antagam||11.11||

तत्रोपरि न्यसेद्देवं कूटरूपाणुनामुना।

जीवं दण्डसमाक्रान्तं शूलस्योपरि संस्थितम्॥११.१२॥

tatropari nyaseddevaṁ kūṭarūpāṇunāmunā|
jīvaṁ daṇḍasamākrāntaṁ śūlasyopari saṁsthitam||11.12||

दक्षाङ्गुलि ततोऽधस्तात्ततो वामपयोधरम्।
नाभिकण्ठौ ततोऽधस्ताद्वामस्कन्धविभूषणौ॥११.१३॥

dakṣāṅguli tato'dhastāttato vāmapayodharam|
nābhikaṇṭhau tato'dhastādvāmaskandhavibhūṣaṇau||11.13||

शिवजिह्वान्वितः पश्चात्तदूर्ध्वोष्ठेन चोपरि।
सर्वयोगिनीचक्राणामधिपोऽयमुदाहृतः॥११.१४॥

śivajihvānvitaḥ paścāttadūrdhvoṣṭhena copari|
sarvayoginīcakrāṇāmadhipo'yamudāhṛtaḥ||11.14||

अस्याप्युच्चारणादेव संवित्तिः स्यात्परोदिता।
ततो वीराष्टकं पश्चाच्छक्त्युक्तविधिना यजेत्॥११.१५॥

asyāpyuccāraṇādeva saṁvittiḥ syātparoditā|
tato vīrāṣṭakaṁ paścācchaktyuktavidhinā yajet||11.15||

प्रभूतैर्विविधैरिष्ट्वा गन्धधूपैः स्रगादिभिः।
श्रीकारपूर्वकं नाम पादान्तं परिकल्पयेत्॥११.१६॥

prabhūtairvividhairiṣṭvā gandhadhūpaiḥ sragādibhiḥ|
śrīkārapūrvakaṁ nāma pādāntaṁ parikalpayet||11.16||

ततः शिष्यं समाहूय बहुधा सुपरीक्षितम्।
रुद्रशक्त्या तु सम्प्रोक्ष्य देवाग्रे विनिवेशयेत्॥११.१७॥

tataḥ śiṣyaṁ samāhūya bahudhā suparīkṣitam|
rudraśaktyā tu samprokṣya devāgre viniveśayet||11.17||

भूजौ तस्य समालोक्य रुद्रशक्त्या प्रदीपयेत्।
तथैवाप्यर्पयेत्पुष्पं करयोर्गन्धदिग्धयोः॥११.१८॥

bhūjau tasya samālokya rudraśaktyā pradīpayet|

tathaivāpyarpayetpuṣpaṁ karayorgandhadigdhayoḥ||11.18||

निरालम्बौ तु तौ ध्यात्वा शक्त्याकृष्टौ विचिन्तयेत्।
शक्तिमन्त्रितनेत्रेण बद्ध्वा नेत्रे तु पूर्ववत्॥ ११.१९॥
nirālambau tu tau dhyātvā śaktyākṛṣṭau vicintayet|
śaktimantritanetreṇa baddhvā netre tu pūrvavat||11.19||

ततः प्रक्षेपयेत्पुष्पं सा शक्तिस्तत्करस्थिता।
यत्र तत्पतते पुष्पं तत्कुलं तस्य लक्षयेत्॥ ११.२०॥
tataḥ prakṣepayetpuṣpaṁ sā śaktistatkarasthitā|
yatra tatpatate puṣpaṁ tatkulaṁ tasya lakṣayet||11.20||

मुखमुद्घाट्य तं पश्चात्पादयोः प्रतिपातयेत्।
ततोऽस्य मस्तके चक्रं हस्तयोश्चार्च्य योगवित्॥ ११.२१॥
mukhamudghāṭya taṁ paścātpādayoḥ pratipātayet|
tato'sya mastake cakraṁ hastayoścārcya yogavit||11.21||

तद्धस्तौ प्रेरयेच्छक्त्या यावन्मूर्धान्तमागतौ।
शिवहस्तविधिः प्रोक्तः सद्यः प्रत्ययकारकः॥ ११.२२॥
taddhastau prerayecchaktyā yāvanmūrdhāntamāgatau|
śivahastavidhiḥ proktaḥ sadyaḥ pratyayakārakaḥ||11.22||

चरुकं दापयेत्पश्चात् खर्जूरादिफलोद्भवम्।
शक्त्यालम्बां तनुं कृत्वा स्थापयेदग्रतः शिशोः॥ ११.२३॥
carukaṁ dāpayetpaścāt kharjūrādiphalodbhavam|
śaktyālambāṁ tanuṁ kṛtvā sthāpayedagrataḥ śiśoḥ||11.23||

पुष्पक्षेपप्रयोगेन हस्तमाकृस्य दक्षिणम्।
चरुकं ग्राहयेन्मन्त्री तद्ध्यानगतमानसः॥ ११.२४॥
puṣpakṣepaprayogena hastamākṛsya dakṣiṇam|
carukaṁ grāhayenmantrī taddhyānagatamānasaḥ||11.24||

शिवहस्तप्रयोगेन समारोप्य मुखं नयेत्।

अनेनैव विधानेन क्षीरवृक्षसमुद्भवम्॥ ११.२५॥

śivahastaprayogena samāropya mukhaṁ nayet|
anenaiva vidhānena kṣīravṛkṣasamudbhavam||11.25||

दन्तकाष्ठं ददेद्देवि षोडशाङ्गुलमायतम्।

एतेषां चालनान्मन्त्री शक्तिपातं परीक्षयेत्॥ ११.२६॥

dantakāṣṭhaṁ dadeddevi ṣoḍaśāṅgulamāyatam|
eteṣāṁ cālanānmantrī śaktipātaṁ parīkṣayet||11.26||

मन्दतीव्रादिभेदेन मन्दतीव्रादिकाद्बुधः।

इत्ययं समयी प्रोक्तः संस्थितोक्तेन वर्त्मना॥ ११.२७॥

mandatīvrādibhedena mandatīvrādikādbudhaḥ|
ityayaṁ samayī proktaḥ saṁsthitoktena vartmanā||11.27||

चिकीर्षुश्च यदा दीक्षामस्यैवार्पितमानसः।

तदिष्ट्वा पूर्ववद्योगी कुलेशं तमनुक्रमात्॥ ११.२८॥

cikīrṣuśca yadā dīkṣāmasyaivārpitamānasaḥ|
tadiṣṭvā pūrvavadyogī kuleśaṁ tamanukramāt||11.28||

सम्पूज्य पूर्ववच्छिष्यमृजुदेहे विलोकयेत्।

शक्तिं सञ्चिन्त्य पादाग्रान्मस्तकान्तं विचक्षणः॥ ११.२९॥

sampūjya pūrvavacchiṣyamṛjudehe vilokayet|
śaktiṁ sañcintya pādāgrānmastakāntaṁ vicakṣaṇaḥ||11.29||

शोध्याध्वानं ततो न्यस्य सर्वाध्वव्याप्तिभावताम्।

शक्तितत्त्वादिभेदेन पूर्वोक्तेन च वर्त्मना॥ ११.३०॥

śodhyādhvānaṁ tato nyasya sarvādhvavyāptibhāvatām|
śaktitattvādibhedena pūrvoktena ca vartmanā||11.30||

उपविश्य ततस्तस्य विधानमिदमाचरेत्।

मूलशोध्यात्समारभ्य शक्तिं दीप्तानलप्रभाम्॥११.३१॥
upaviśya tatastasya vidhānamidamācaret|
mūlaśodhyātsamārabhya śaktiṁ dīptānalaprabhām||11.31||

योजयेच्छोध्यसंशुद्धिभावनागतमानसः।
एवं सर्वाणि शोध्यानि निर्दहन्तीमनामयाम्॥११.३२॥
yojayecchodhyasaṁśuddhibhāvanāgatamānasaḥ|
evaṁ sarvāṇi śodhyāni nirdahantīmanāmayām||11.32||

शिवे सञ्चिन्तयेल्लीनां निष्कले सकलेऽपि वा।
योगिना योजिता मार्गे स्वजातीयस्य पोषणम्॥११.३३॥
śive sañcintayellīnāṁ niṣkale sakale'pi vā|
yoginā yojitā mārge svajātīyasya poṣaṇam||11.33||

कुरुते निर्दहत्यन्यद्भिन्नजातिकदम्बकम्।
अनया शोध्यमानस्य शिष्यस्यास्य महामतिः॥११.३४॥
kurute nirdahatyanyadbhinnajātikadambakam|
anayā śodhyamānasya śiṣyasyāsya mahāmatiḥ||11.34||

लक्षयेच्चिह्नसङ्घातमानन्दादिकमादरात्।
आनन्द उद्भवः कम्पो निद्रा घूर्णिश्च पञ्चमी॥११.३५॥
lakṣayeccihnasaṅghātamānandādikamādarāt|
ānanda udbhavaḥ kampo nidrā ghūrṇiśca pañcamī||11.35||

एवमाविष्ट्या शक्त्या मन्दतीव्रादिभेदतः।
पाशस्तोभपशुग्राहौ प्रकुर्वीत यथेच्छया॥११.३६॥
evamāviṣṭyā śaktyā mandatīvrādibhedataḥ|
pāśastobhapaśugrāhau prakurvīta yathecchayā||11.36||

गृहीतस्य पुनः कुर्यान्नियोगं शेषभुक्तये।
अथवा कस्यचिन्नायमावेशः सम्प्रजायते॥११.३७॥
gṛhītasya punaḥ kuryānniyogaṁ śeṣabhuktaye|

athavā kasyacinnāyamāveśaḥ samprajāyate||11.37||

तदेनं युगपच्छक्त्या सबाह्याभ्यन्तरे दहेत्।

तया सन्दह्यमानोऽसौ च्छिन्नमूल इव द्रुमः॥ ११.३८॥

tadenaṁ yugapacchaktyā sabāhyābhyantare dahet|

tayā sandahyamāno'sau cchinnamūla iva drumaḥ||11.38||

पतते काश्यपीपृष्ठे आक्षेपं वा करोत्यसौ।

यस्य त्वेवमपि स्यान्न तं चैवोपलवत्त्यजेत्॥ ११.३९॥

patate kāśyapīpṛṣṭhe ākṣepaṁ vā karotyasau|

yasya tvevamapi syānna taṁ caivopalavattyajet||11.39||

पृथक्तत्त्वविधौ दीक्षां योग्यतावश्यवर्तिनः।

तत्त्वाभ्यासविधानेन वक्ष्यमाणेन कारयेत्॥ ११.४०॥

pṛthaktattvavidhau dīkṣāṁ yogyatāvaśyavartinaḥ|

tattvābhyāsavidhānena vakṣyamāṇena kārayet||11.40||

इति सन्दीक्षितस्यास्य मुमुक्षोः शेषवर्तनम्।

कुलक्रमेष्टिरादेश्या पञ्चावस्थासमन्विता॥ ११.४१॥

iti sandīkṣitasyāsya mumukṣoḥ śeṣavartanam|

kulakrameṣṭirādeśyā pañcāvasthāsamanvitā||11.41||

बुहुक्षोस्तु प्रकुर्वीत सम्यग्योगाभिषेचनम्।

तत्रेष्ट्वा पूर्ववद्देहं विस्तीर्णैर्विबुधैर्बुधैः॥ ११.४२॥

buhukṣostu prakurvīta samyagyogābhiṣecanam|

tatreṣṭvā pūrvavaddehaṁ vistīrṇairvibudhairbudhaiḥ||11.42||

हेमादिदीपकानष्टौ घृतेनारुणवर्तिकान्।

कुलाष्टकेन सम्बोध्य शिवं शङ्खे प्रपूजयेत्॥ ११.४३॥

hemādidīpakānaṣṭau ghṛtenāruṇavartikān|

kulāṣṭakena sambodhya śivaṁ śaṅkhe prapūjayet||11.43||

सर्वरत्नौषधीगर्भे गन्धाम्बुपरिपूरिते।

तेनाभिषेचयेत्तं तु शिवहस्तोक्तवर्त्मना॥ ११.४४॥

sarvaratnauṣadhīgarbhe gandhāmbuparipūrite|
tenābhiṣecayettaṁ tu śivahastoktavartmanā||11.44||

आचार्यस्याभिषेकोऽयमधिकारपदान्वितः।

कुर्यात्पिण्डादिभिस्तद्वच्चतुःषष्टिं प्रदीपकान्॥ ११.४५॥

ācāryasyābhiṣeko'yamadhikārapadānvitaḥ|
kuryātpiṇḍādibhistadvaccatuḥṣaṣṭiṁ pradīpakān||11.45||

अभिषिक्तविधावेव सर्वयोगिगणेन तु।

विदितौ भवतस्तत्र गुरुर्मोक्षप्रदो भवेत्॥ ११.४६ ॥

abhiṣiktavidhāveva sarvayogigaṇena tu|
viditau bhavatastatra gururmokṣaprado bhavet||11.46||

अनयोः कथयेज्ज्ञानं त्रिविधं सर्वमप्यलम्।

स्वकीयाज्ञां ददेद्योगी स्वक्रियाकरणं प्रति॥ ११.४७॥

anayoḥ kathayejjñānaṁ trividhaṁ sarvamapyalam|
svakīyājñāṁ dadedyogī svakriyākaraṇaṁ prati||11.47||

इति श्रीमालिनीविजयोत्तरे तन्त्रे दीक्षाधिकार एकादशः॥ ११ ॥

iti śrīmālinīvijayottare tantre dīkṣādhikāra ekādaśaḥ||11||

## धारणाधिकारो द्वादशः १२ ॥

अथ द्वादशोऽधिकारः।
atha dvādaśo'dhikāraḥ|

अथैतां देवदेअस्य श्रुत्वा वाचमतिस्फुटाम्।
प्रहर्षोत्फुल्लनयना जगदानन्दकारिणी॥ १२.१ ॥
athaitāṁ devadeasya śrutvā vācamatisphuṭām|
praharṣotphullanayanā jagadānandakāriṇī||12.1||

सन्तोषामृतसन्तृप्ता देवी देवगणार्चिता।
प्रणम्यान्धकहन्तारं पुनराहेति भारतीम्॥ १२.२ ॥
santoṣāmṛtasantṛptā devī devagaṇārcitā|
praṇamyāndhakahantāraṁ punarāheti bhāratīm||12.2||

पूर्वमेव त्वया प्रोक्तं योगी योगं समभ्यसेत्।
तस्याभ्यासः कथं कार्यः कथ्यतां त्रिपुरान्तक॥ १२.३ ॥
pūrvameva tvayā proktaṁ yogī yogaṁ samabhyaset|
tasyābhyāsaḥ kathaṁ kāryaḥ kathyatāṁ tripurāntaka||12.3||

एवमुक्तो जगद्धात्र्या भैरवो भयनाशनः।
प्राह प्रसन्नगम्भीरां गिरमेतामुदारधीः॥ १२.४ ॥
evamukto jagaddhātryā bhairavo bhayanāśanaḥ|
prāha prasannagambhīrāṁ girametāmudāradhīḥ||12.4||

योगाभ्यासविधिं देवि कथ्यमानं मया श्रृणु।
स्थिरीभूतेन येनेह योगी सिद्धिमवाप्स्यति॥ १२.५ ॥
yogābhyāsavidhiṁ devi kathyamānaṁ mayā śṛṇu|
sthirībhūtena yeneha yogī siddhimavāpsyati||12.5||

गुहायां भूगृहे वापि निःशब्दे सुमनोरमे।
सर्वाबाधाविनिर्मुक्ते योगी योगं समभ्यसेत्॥ १२.६॥
guhāyāṁ bhūgṛhe vāpi niḥśabde sumanorame|
sarvābādhāvinirmukte yogī yogaṁ samabhyaset||12.6||

जितासनो जितमना जितप्राणो जितेन्द्रियः।
जितमिद्रो जितक्रोधो जितोद्वेगो गतव्यथः॥ १२.७॥
jitāsano jitamanā jitaprāṇo jitendriyaḥ|
jitamidro jitakrodho jitodvego gatavyathaḥ||12.7||

लक्ष्यभेदेन वा सर्वमथवा चित्तभेदतः।
धरादिशक्तिपर्यन्तं योगीशस्तु प्रसाधयेत्॥ १२.८॥
lakṣyabhedena vā sarvamathavā cittabhedataḥ|
dharādiśaktiparyantaṁ yogīśastu prasādhayet||12.8||

व्योमविग्रहविन्द्वर्णभुवनध्वनिभेदतः।
लक्ष्यभेदः स्मृतः षोढा यथावदुपदिश्यते॥ १२.९॥
vyomavigrahavindvarṇabhuvanadhvanibhedataḥ|
lakṣyabhedaḥ smṛtaḥ ṣoḍhā yathāvadupadiśyate||12.9||

बाह्याभ्यन्तरभेदेन समुच्चयकृतेन च।
त्रिविधं कीर्तितं व्योम दशधा विन्दुरिष्यते॥ १२.१०॥
bāhyābhyantarabhedena samuccayakṛtena ca|
trividhaṁ kīrtitaṁ vyoma daśadhā vinduriṣyate||12.10||

कदम्बगोलकाकारः स्फुरत्तारकसन्निभः।
शुक्लादिभेदभेदेन एकोऽपि दशधा मतः॥ १२.११॥
kadambagolakākāraḥ sphurattārakasannibhaḥ|
śuklādibhedabhedena eko'pi daśadhā mataḥ||12.11||

चिञ्चिनीचीरवाकादिप्रभेदाद्दशधा ध्वनिः।

विग्रहः स्वाणुभेदाच्च द्विधा भिन्नोप्यनेकधा॥ १२.१२॥

ciñcinīcīravākādiprabhedāddaśadhā dhvaniḥ|
vigrahaḥ svāṇubhedācca dvidhā bhinnopyanekadhā||12.12||

भुवनानां न सङ्ख्यास्ति वर्णानां सा शतार्धिका।
एकस्मिन्नपि साध्ये वै लक्षेदत्रानुषङ्गतः॥ १२.१३॥

bhuvanānāṁ na saṅkhyāsti varṇānāṁ sā śatārdhikā|
ekasminnapi sādhye vai lakṣedatrānuṣaṅgataḥ||12.13||

अन्यान्यपि फलानि स्युर्लक्ष्यभेदः स उच्यते।
एकमेव फलं यत्र चित्तभेदस्त्वसौ मतः॥ १२.१४॥

anyānyapi phalāni syurlakṣyabhedaḥ sa ucyate|
ekameva phalaṁ yatra cittabhedastvasau mataḥ||12.14||

होमदीक्षाविशुद्धात्मा समावेशोपदेशवान्।
यं सिषाधयिषुर्योगमादावेव समाचरेत्॥ १२.१५॥

homadīkṣāviśuddhātmā samāveśopadeśavān|
yaṁ siṣādhayiṣuryogamādāveva samācaret||12.15||

हस्तयोस्तु पराबीजं न्यस्य शक्तिमनुस्मरेत्।
महामुद्राप्रयोगेन विपरीतविधौ बुधः॥ १२.१६॥

hastayostu parābījaṁ nyasya śaktimanusmaret|
mahāmudrāprayogena viparītavidhau budhaḥ||12.16||

ज्वलद्वह्निप्रतीकाशं पादाग्रान्मस्तकान्तिकम्।
नमस्कारं ततः पश्चाद्बद्धा हृदि धृतानिलः॥ १२.१७॥

jvaladvahnipratīkāśaṁ pādāgrānmastakāntikam|
namaskāraṁ tataḥ paścādbaddhā hṛdi dhṛtānilaḥ||12.17||

स्वरूपेण पराबीजमतिदीप्तमनुस्मरेत्।
तस्य मात्रात्रयं ध्यायेत्करवत्रयविनिर्गतम्॥ १२.१८॥

svarūpeṇa parābījamatidīptamanusmaret|

tasya mātrātrayaṁ dhyāyetkakhatrayavinirgatam||12.18||

ततस्तालशताद्योगी समावेशमवाप्नुयात्।

ब्रह्मघ्नोऽपि हि सप्ताहात्प्रतिवासरमभ्यसेत्॥ १२.१९॥

tatastālaśatādyogī samāveśamavāpnuyāt|
brahmaghno'pi hi saptāhātprativāsaramabhyaset||12.19||

एवमाविष्टदेहस्तु यथोक्तं विधिमाचरेत्।

यः पुनर्गुरुणैवादौ कृतावेशविधिक्रमः॥ १२.२०॥

evamāviṣṭadehastu yathoktaṁ vidhimācaret|
yaḥ punarguruṇaivādau kṛtāveśavidhikramaḥ||12.20||

स वासनानुभावेन भूमिकाजयमारभेत्।

गणनाथं नमस्कृत्य संस्मृत्य त्रिगुरुक्रमम्॥ १२.२१॥

sa vāsanānubhāvena bhūmikājayamārabhet|
gaṇanāthaṁ namaskṛtya saṁsmṛtya trigurukramam||12.21||

सम्यगाविष्टदेहः स्यादिति ध्यायेदनन्यधीः।

स्वदेहं हेमसङ्काशं तुर्याश्रं वज्रलाञ्छितम्॥ १२.२२॥

samyagāviṣṭadehaḥ syāditi dhyāyedananyadhīḥ|
svadehaṁ hemasaṅkāśaṁ turyāśraṁ vajralāñchitam||12.22||

ततो गुरुत्वमायाति सप्तविंशतिभिर्दिनैः।

दिवसात्सप्तमादूर्ध्वं जडता चास्य जायते॥ १२.२३॥

tato gurutvamāyāti saptaviṁśatibhirdinaiḥ|
divasātsaptamādūrdhvaṁ jaḍatā cāsya jāyate||12.23||

षड्भिर्मासैर्जितव्याधिर्द्रुतहेमनिभो भवेत्।

वज्रदेहस्त्रिभिश्चाब्दैर्नवनागपराक्रमः॥ १२.२४॥

ṣaḍbhirmāsairjitavyādhirdrutahemanibho bhavet|
vajradehastribhiścābdairnavanāgaparākramaḥ||12.24||

एषा ते पार्थिवी शुद्धा धारणा परिकीर्तिता।

आद्या पूर्वोदिते देवि भेदे पञ्चदशात्मके॥ १२.२५॥

eṣā te pārthivī śuddhā dhāraṇā parikīrtitā|
ādyā pūrvodite devi bhede pañcadaśātmake||12.25||

सव्यापारं स्मरेद्देहं दुर्तहेमसमप्रभम्।

उपविष्टं च तुर्याश्रे मण्डले वज्रभूषिते॥ १२.२६॥

savyāpāraṁ smareddehaṁ durtahemasamaprabham|
upaviṣṭaṁ ca turyāśre maṇḍale vajrabhūṣite||12.26||

सप्ताहाद्गुरुतामेति मासाद्व्याधिविवर्जितः।

षड्भिर्मासैर्धरान्तःस्थं सर्वं जानाति तत्त्वतः॥ १२.२७॥

saptāhādgurutāmeti māsādvyādhivivarjitaḥ|
ṣaḍbhirmāsairdharāntaḥsthaṁ sarvaṁ jānāti tattvataḥ||12.27||

त्रिभिरब्दैर्महीं भुङ्क्ते सप्ताम्भोनिधिमेखलाम्।

द्वितीयः कथितो भेदस्तृतीयमधुना श्रृणु॥ १२.२८॥

tribhirabdairmahīṁ bhuṅkte saptāmbhonidhimekhalām|
dvitīyaḥ kathito bhedastṛtīyamadhunā śṛṇu||12.28||

तद्वदेव स्मरेद्देहं किन्तु व्यापारवर्जितम्।

पूर्वोक्तं फलमाप्नोति तद्वत्पातालसंयुतम्॥ १२.२९॥

tadvadeva smareddehaṁ kintu vyāpāravarjitam|
pūrvoktaṁ phalamāpnoti tadvatpātālasaṁyutam||12.29||

चतुर्थे हृद्गतं ध्यायेद्द्वादशाङ्गुलमायतम्।

पूर्ववर्णस्वरूपेण सव्याअपारमतन्द्रितः॥ १२.३०॥

caturthe hṛdgataṁ dhyāyeddvādaśāṅgulamāyatam|
pūrvavarṇasvarūpeṇa savyāapāramatandritaḥ||12.30||

प्राप्य पूर्वोदितं सर्वं पातालाधिपतिर्भवेत्।

तदेव स्थिरमाप्नोति निर्व्यापारे तु पञ्चमे॥ १२.३१॥

prāpya pūrvoditaṁ sarvaṁ pātālādhipatirbhavet|
tadeva sthiramāpnoti nirvyāpāre tu pañcame||12.31||

स्फुरत्सूर्यनिभं पीतं षष्ठे कृष्णं घनावृतम्।

निस्तरङ्गं स्मरेत्तद्वत्सप्तमेऽपि विचक्षणः॥ १२.३२॥

sphuratsūryanibhaṁ pītaṁ ṣaṣṭhe kṛṣṇaṁ ghanāvṛtam|
nistaraṅgaṁ smarettadvatsaptame'pi vicakṣaṇaḥ||12.32||

द्वयेऽप्यत्र स्थिरीभूते भुर्भुवःस्वरिति त्रयम्।

वेत्ति भुङ्क्ते च लोकानां पुरोक्तैरेव वत्सरैः॥ १२.३३॥

dvaye'pyatra sthirībhūte bhurbhuvaḥsvariti trayam|
vetti bhuṅkte ca lokānāṁ puroktaireva vatsaraiḥ||12.33||

सकलं हृदयान्तस्थमात्मानं कनकप्रभम्।

स्वप्रभाद्योतिताशेषदेहान्तमनुचिन्तयेत्॥ १२.३४॥

sakalaṁ hṛdayāntasthamātmānaṁ kanakaprabham|
svaprabhādyotitāśeṣadehāntamanucintayet||12.34||

सव्यापारादिभेदेन सप्तलोकीं तु पूर्ववत्।

वेत्ति भुङ्क्ते स्थिरीभूते भेदेऽस्मिन्नवमे बुधः॥ १२.३५॥

savyāpārādibhedena saptalokīṁ tu pūrvavat|
vetti bhuṅkte sthirībhūte bhede'sminnavame budhaḥ||12.35||

रविबिम्बनिभं पीतं पूर्ववद्द्वितयं स्मरेत्।

ब्रह्मलोकमवाप्नोति पूर्वोक्तेनैव वर्त्मना॥ १२.३६॥

ravibimbanibhaṁ pītaṁ pūrvavaddvitayaṁ smaret|
brahmalokamavāpnoti pūrvoktenaiva vartmanā||12.36||

अधः प्रकाशितं पीतं द्विरूपं पूर्ववन्महत्।

चिन्तयेन्मत्समो भूत्वा मल्लोकमनुगच्छति॥ १२.३७॥

adhaḥ prakāśitaṁ pītaṁ dvirūpaṁ pūrvavanmahat|

cintayenmatsamo bhūtvā mallokamanugacchati||12.37||

सबाह्याभ्यन्तरं पीतं तेजः सर्वप्रकाशकम्।

चिन्तयेच्छतरुद्राणामधिपत्वमवाप्नुयात्॥ १२.३८॥

sabāhyābhyantaraṁ pītaṁ tejaḥ sarvaprakāśakam|
cintayecchatarudrāṇāmadhipatvamavāpnuyāt||12.38||

इत्येवं पृथिवीतत्त्वमभ्यस्यं दशपञ्चधा।

योगिभिर्योगसिद्ध्यर्थं तत्फलानां बुभुक्षया॥ १२.३९॥

ityevaṁ pṛthivītattvamabhyasyaṁ daśapañcadhā|
yogibhiryogasiddhyarthaṁ tatphalānāṁ bubhukṣayā||12.39||

योग्यतावशसञ्जाता यस्य यत्रैव वासना।

स तत्रैव नियोक्तव्यो दीक्षाकाले विचक्षणैः॥ १२.४०॥

yogyatāvaśasañjātā yasya yatraiva vāsanā|
sa tatraiva niyoktatryo dīkṣākāle vicakṣaṇaiḥ||12.40||

यो यत्र योजितस्तत्त्वे स तस्मान्न निवर्तते।

तत्फलं सर्वमासाद्य शिवयुक्तोऽपवृज्यते॥ १२.४१॥

yo yatra yojitastattve sa tasmānna nivartate|
tatphalaṁ sarvamāsādya śivayukto'pavṛjyate||12.41||

अयुक्तोऽप्यूर्ध्वसंशुद्धिसम्प्राप्तभुवनेशतः।

शुद्धाच्छिवत्वमायाति दग्धसंसारबन्धनः॥ १२.४२॥

ayukto'pyūrdhvasaṁśuddhisamprāptabhuvaneśataḥ|
śuddhācchivatvamāyāti dagdhasaṁsārabandhanaḥ||12.42||

इति श्रीमालिनीविजयोत्तरे तन्त्रे प्रथमधारणाधिकारो द्वादशः॥ १२॥

iti śrīmālinīvijayottare tantre prathamadhāraṇādhikāro dvādaśaḥ||12||

## जलादिमहाभूतजयाधिकारः त्रयोदशः १३ ॥

अथ त्रयोदशोऽधिकारः।
atha trayodaśo'dhikāraḥ|

अथातः सम्प्रवक्ष्यामि धारणां वारुणीमिमाम्।
यया संसिद्धयोगेन जलान्ताधिपतिर्भवेत्॥ १३.१॥
athātaḥ sampravakṣyāmi dhāraṇāṁ vāruṇīmimām|
yayā saṁsiddhayogena jalāntādhipatirbhavet||13.1||

जलान्तःस्थं स्मरेद्देहं सितं शीतं सुवर्तुलम्।
सबाह्याभ्यन्तरं योगी नान्यदस्तीति चिन्तयेत्॥ १३.२॥
jalāntaḥsthaṁ smareddehaṁ sitaṁ śītaṁ suvartulam|
sabāhyābhyantaraṁ yogī nānyadastīti cintayet||13.2||

एवमभ्यस्यतस्तस्य सप्ताहात्क्लिन्नता भवेत्।
पित्तव्याधिपरित्यक्तो मासेन भवति ध्रुवम्॥ १३.३॥
evamabhyasyatastasya saptāhātklinnatā bhavet|
pittavyādhiparityakto māsena bhavati dhruvam||13.3||

स्निग्धाङ्गः स्निग्धदृष्टिश्च नीलकुञ्चितमूर्धजः।
भवत्यब्देन योगीन्द्रस्त्रिभिर्वर्षति मेघवत्॥ १३.४॥
snigdhāṅgaḥ snigdhadṛṣṭiśca nīlakuñcitamūrdhajaḥ|
bhavatyabdena yogīndrastribhirvarṣati meghavat||13.4||

इत्येषा वारुणी प्रोक्ता प्रथमा शुद्धधारणा।
अधुना सम्प्रवक्ष्यामि भेदैर्भिन्नामिमां पुनः॥ १३.५॥
ityeṣā vāruṇī proktā prathamā śuddhadhāraṇā|
adhunā sampravakṣyāmi bhedairbhinnāmimāṁ punaḥ||13.5||

पूर्ववच्चिन्तयेद्देहं सव्यापारं सितं स्वकम्।
जलोपरि स्थितं देवि तद्गतेनान्तरात्मना॥ १३.६॥
pūrvavaccintayeddehaṁ savyāpāraṁ sitaṁ svakam|
jalopari sthitaṁ devi tadgatenāntarātmanā||13.6||

सप्ताहान्मुच्यते रोगैः सर्वैः पित्तसमुद्भवैः।
षण्मासाज्जायते स्थैर्यं यदि तन्मयतां गतः॥ १३.७॥
saptāhānmucyate rogaiḥ sarvaiḥ pittasamudbhavaiḥ|
ṣaṇmāsājjāyate sthairyaṁ yadi tanmayatāṁ gataḥ||13.7||

जलावरणविज्ञानमब्दैरस्य त्रिभिर्भवेत्।
निर्व्यापारप्रभेदेऽपि सर्वत्र वरुणोपमः॥ १३.८॥
jalāvaraṇavijñānamabdairasya tribhirbhavet|
nirvyāpāraprabhede'pi sarvatra varuṇopamaḥ||13.8||

स याति वारुणं तत्त्वं भूमिकां क्रमशोऽभ्यसेत्।
पूर्ववत्कण्ठमध्यस्थमात्मानं द्वादशाङ्गुलम्॥ १३.९॥
sa yāti vāruṇaṁ tattvaṁ bhūmikāṁ kramaśo'bhyaset|
pūrvavatkaṇṭhamadhyasthamātmānaṁ dvādaśāṅgulam||13.9||

संस्मरञ्जलतत्त्वेशं प्रपश्यत्यचिराद्ध्रुवम्।
तद्दृष्टिः स्थिरतामेति स्वरूपे पञ्चमे स्थिरे॥ १३.१०॥
saṁsmarañjalatattveśaṁ prapaśyatyacirāddhruvam|
taddṛṣṭiḥ sthiratāmeti svarūpe pañcame sthire||13.10||

द्विभेदेऽपि स्थरीभूते चन्द्रबिम्बे घनावृते।
तत्समानत्वमभ्येति ततः सकलरूपिणी॥ १३.११॥
dvibhede'pi stharībhūte candrabimbe ghanāvṛte|
tatsamānatvamabhyeti tataḥ sakalarūpiṇī||13.11||

चिन्त्यते देहमापूर्य सितवर्णेन तेजसा।

तदेव स्थिरतामेति तत्र सुस्थिरतां गते॥ १३.१२॥
cintyate dehamāpūrya sitavarṇena tejasā|
tadeva sthiratāmeti tatra susthiratāṁ gate||13.12||

घनमुक्तेन्दुबिम्बाभस्ततः समनुचिन्त्येत्।
तत्पतित्वं समभ्येति द्वितीयं स्थिरतां व्रजेत्॥ १३.१३॥
ghanamuktendubimbābhastataḥ samanucintyet|
tatpatitvaṁ samabhyeti dvitīyaṁ sthiratāṁ vrajet||13.13||

अतः प्रकाशकं शुक्लं ततस्तेजो विचिन्तयेत्।
विद्येश्वरत्वमाप्नोति जलावरणसम्भवम्॥ १३.१४॥
ataḥ prakāśakaṁ śuklaṁ tatastejo vicintayet|
vidyeśvaratvamāpnoti jalāvaraṇasambhavam||13.14||

स्वदेहव्यापिनि ध्याते तत्रस्थे शुक्लतेजसि।
सर्वाधिपत्यमाप्नोति सुस्थिरे तत्र सुस्थिरम्॥ १३.१५॥
svadehavyāpini dhyāte tatrasthe śuklatejasi|
sarvādhipatyamāpnoti susthire tatra susthiram||13.15||

ध्येयतत्त्वसमानत्वमवस्थात्रितये स्थिरे।
द्वितीये च तदीशानसंवित्तिरूपजायते॥ १३.१६॥
dhyeyatattvasamānatvamavasthātritaye sthire|
dvitīye ca tadīśānasaṁvittirūpajāyate||13.16||

द्वितीयेऽन्यत्र तत्तूल्यः स्थिरो भवति योगवित्।
षट्के सर्वेशतामेति द्वितीयेऽन्यत्र तु च्युतिः॥ १३.१७॥
dvitīye'nyatra tattūlyaḥ sthiro bhavati yogavit|
ṣaṭke sarveśatāmeti dvitīye'nyatra tu cyutiḥ||13.17||

इत्ययं सर्वतत्त्वेषु भेदे पञ्चदशात्मके।
ज्ञेयो विधिर्विधानज्ञैः फलपञ्चकसिद्धिदः॥ १३.१८॥
ityayaṁ sarvatattveṣu bhede pañcadaśātmake|

jñeyo vidhirvidhānajñaiḥ phalapañcakasiddhidaḥ||13.18||

तत्फलान्तरमेतस्मादुक्तं यच्चापि वक्ष्यते।

अनुषङ्गफलं ज्ञेयं तत्सर्वमविचारतः॥ १३.१९॥

tatphalāntarametasmāduktaṁ yaccāpi vakṣyate|
anuṣaṅgaphalaṁ jñeyaṁ tatsarvamavicārataḥ||13.19||

इत्येवं वारुणी प्रोक्ता प्रभेदैर्दशपञ्चभिः।

योगिनां योगसिद्ध्यर्थमाग्नेयीमधुना शृणु॥ १३.२०॥

ityevaṁ vāruṇī proktā prabhedairdaśapañcabhiḥ|
yogināṁ yogasiddhyarthamāgneyīmadhunā śṛṇu||13.20||

त्रिकोणं चिन्तयेद्देहं रक्तज्वालावलीधरम्।

सप्तभिर्दिवसैर्देवि तैक्ष्ण्यमस्योपजायते॥ १३.२१॥

trikoṇaṁ cintayeddehaṁ raktajvālāvalīdharam|
saptabhirdivasairdevi taikṣṇyamasyopajāyate||13.21||

वातश्लेष्मभवैः सर्वैर्मासान्मुच्यति साधकः।

निद्राहीनश्च बह्वाशी स्वल्पविण्मूत्रकृद्भवेत्॥ १३.२२॥

vātaśleṣmabhavaiḥ sarvairmāsānmucyati sādhakaḥ|
nidrāhīnaśca bahvāśī svalpaviṇmūtrakṛdbhavet||13.22||

इच्छया निर्दहत्यन्यत्स्पष्टवस्तु ऋतुक्षयात्।

त्र्यब्दादग्निसमो भूत्वा क्रीडत्यग्निर्यथेच्छया॥ १३.२३॥

icchayā nirdahatyanyatspaṣṭavastu ṛtukṣayāt|
tryabdādagnisamo bhūtvā krīḍatyagniryathecchayā||13.23||

सर्वं निर्दहति क्रुद्धं सशैलवनकाननम्।

त्रिकोणमण्डलारूढमात्मानमनुचिन्तयेत्॥ १३.२४॥

sarvaṁ nirdahati kruddhaṁ saśailavanakānanam|
trikoṇamaṇḍalārūḍhamātmānamanucintayet||13.24||

सव्यापारादिभेदेन सर्वत्रापि विचक्षणः।

सप्ताहाद्व्याधिभिर्हीनः षण्मावदग्निसाद्भवेत्॥ १३.२५॥

savyāpārādibhedena sarvatrāpi vicakṣaṇaḥ|
saptāhādvyādhibhirhīnaḥ ṣaṇmāvadagnisādbhavet||13.25||

त्रिभिरब्दैः स सम्पूर्णं तेजस्तत्त्वं प्रपश्यति।

यच्छक्तिभेदे यद्दृष्टं तत्तद्भेदे स्थिरीभवेत्॥ १३.२६॥

tribhirabdaiḥ sa sampūrṇaṁ tejastattvaṁ prapaśyati|
yacchaktibhede yaddṛṣṭaṁ tattadbhede sthirībhavet||13.26||

पूर्ववत्तालुमध्यस्थमात्मानं ज्वलनप्रभम्।

ध्यायन्प्रपश्यते तेजस्तत्त्वेशानखिलान्क्रमात्॥ १३.२७॥

pūrvavattālumadhyasthamātmānaṁ jvalanaprabham|
dhyāyanprapaśyate tejastattveśānakhilānkramāt||13.27||

धूमाक्रान्ताग्निसङ्काशं रविबिम्बसमाकृतिम्।

ध्यायंस्तन्मध्यतस्तेजस्तत्त्वेशसमतां व्रजेत्॥ १३.२८॥

dhūmākrāntāgnisaṅkāśaṁ ravibimbasamākṛtim|
dhyāyaṁstanmadhyatastejastattveśasamatāṁ vrajet||13.28||

प्रभाहततमोजालं विधूमाग्निसमप्रभम्।

तत्रैव सकलं ध्यायेत्तत्पतित्वमवाप्नुयात्॥ १३.२९॥

prabhāhatatamojālaṁ vidhūmāgnisamaprabham|
tatraiva sakalaṁ dhyāyettatpatitvamavāpnuyāt||13.29||

दिवसाग्निप्रभाकारं तत्र तेजो विचिन्तयेत्।

तन्मन्त्रेश्वरतामेति तत्र सुस्थिरतां गते॥ १३.३०॥

divasāgniprabhākāraṁ tatra tejo vicintayet|
tanmantreśvaratāmeti tatra susthiratāṁ gate||13.30||

मणिप्रदीपसङ्काशं तेजस्तत्र प्रकाशयेत्।

मन्त्रेशेशत्वमभ्येति योगी तन्मयतां गतः॥१३.३१॥

maṇipradīpasaṅkāśaṁ tejastatra prakāśayet|
mantreśeśatvamabhyeti yogī tanmayatāṁ gataḥ||13.31||

सबाह्याभ्यन्तरं तेजो ध्यायन्सर्वत्र तद्गतम्।

तस्मान्न च्यवते स्थानादासंहारमखण्डितः॥१३.३२॥

sabāhyābhyantaraṁ tejo dhyāyansarvatra tadgatam|
tasmānna cyavate sthānādāsaṁhāramakhaṇḍitaḥ||13.32||

संहारे तु परं शान्तं पदमभ्येति शाङ्करम्।

इत्येषा पञ्चदशधा कथिता वह्निधारणा॥१३.३३॥

saṁhāre tu paraṁ śāntaṁ padamabhyeti śāṅkaram|
ityeṣā pañcadaśadhā kathitā vahnidhāraṇā||13.33||

स्वदेहं चिन्तयेत्कृष्णं वृत्तं षट्बिन्दुलाञ्छितम्।

चलं सचूचूशब्दं च वायवीं धारणां श्रितः॥१३.३४॥

svadehaṁ cintayetkṛṣṇaṁ vṛttaṁ ṣaṭbindulāñchitam|
calaṁ sacūcūśabdaṁ ca vāyavīṁ dhāraṇāṁ śritaḥ||13.34||

चलत्वं कफजव्याधिविच्छेदाद्वायुवद्भवेत्।

षण्मासमभ्यसेद्योगी तद्गतेनान्तरात्मना॥१३.३५॥

calatvaṁ kaphajavyādhivicchedādvāyuvadbhavet|
ṣaṇmāsamabhyasedyogī tadgatenāntarātmanā||13.35||

योजनानां शतं गत्वा मुहूर्तादेत्यखेदतः।

वत्सरैस्तु त्रिभिः साक्षाद्वायुरूपधरो भवेत्॥१३.३६॥

yojanānāṁ śataṁ gatvā muhūrtādetyakhedataḥ|
vatsaraistu tribhiḥ sākṣādvāyurūpadharo bhavet||13.36||

चूर्णयत्यद्रिसङ्घातं वृक्षानुन्मुलयत्यपि।

क्रुद्धश्चानयते शक्रं सभृत्यबलवाहनम्॥१३.३७॥

cūrṇayatyadrisaṅghātaṁ vṛkṣānunmulayatyapi|

kruddhaścānayate śakraṁ sabhṛtyabalavāhanam||13.37||

नीलाञ्जननिभं देहमात्मीयमनुचिन्तयेत्।
पूर्वोक्तं सर्वमाप्नोति षण्मासान्नात्र संशयः॥ १३.३८॥
nīlāñjananibhaṁ dehamātmīyamanucintayet|
pūrvoktaṁ sarvamāpnoti ṣaṇmāsānnātra saṁśayaḥ||13.38||

त्र्यब्दात्प्रपश्यते वायुतत्त्वं तन्मयतां गतः।
भ्रूवोर्मध्ये स्मरेद्रूपमात्मनोऽञ्जनसन्निभम्॥ १३.३९॥
tryabdātprapaśyate vāyutattvaṁ tanmayatāṁ gataḥ|
bhrūvormadhye smaredrūpamātmano'ñjanasannibham||13.39||

पश्यते वायुतत्त्वेशानाशुगानखिलानपि।
घनावृतेन्द्रनीलाभो रविबिम्बसमाकृतिम्॥ १३.४०॥
paśyate vāyutattveśānāśugānakhilānapi|
ghanāvṛtendranīlābho ravibimbasamākṛtim||13.40||

ध्यायंस्तत्समतामेति तत्संलीनो यदा भवेत्।
भिन्नेन्द्रनीलसङ्काशं सकलं तत्र चिन्तयेत्॥ १३.४१॥
dhyāyaṁstatsamatāmeti tatsaṁlīno yadā bhavet|
bhinnendranīlasaṅkāśaṁ sakalaṁ tatra cintayet||13.41||

तन्मन्त्रेशत्वमाप्नोति ततस्तस्येशतामपि।
सर्वव्यापिनि तद्वर्णे ध्याते तेजस्यवाप्नुयात्॥ १३.४२॥
tanmantreśatvamāpnoti tatastasyeśatāmapi|
sarvavyāpini tadvarṇe dhyāte tejasyavāpnuyāt||13.42||

तदाप्रधृष्यतामेति तत्रोर्ध्वाधोविसर्पिणि।
इत्येवं कथिता दिव्या धारणा वायुसम्भवा॥ १३.४३॥
tadāpradhṛṣyatāmeti tatrordhvādhovisarpiṇi|
ityevaṁ kathitā divyā dhāraṇā vāyusambhavā||13.43||

स्वदेहं वायुवद्ध्यात्वा तदभावमनुस्मरन्।
दिवसैः सप्तभिर्योगी शून्यतां प्रतिपद्यते॥ १३.४४॥
svadehaṁ vāyuvaddhyātvā tadabhāvamanusmaran|
divasaiḥ saptabhiryogī śūnyatāṁ pratipadyate||13.44||

मासंमात्रेण भोगीन्द्रैरपि दष्टो न मुह्यति।
सर्वव्याधिपरित्यक्तो वलीपलितवर्जितः॥ १३.४५॥
māsaṁmātreṇa bhogīndrairapi daṣṭo na muhyati|
sarvavyādhiparityakto valīpalitavarjitaḥ||13.45||

षण्मासाद्गगनाकारः सूक्ष्मरन्ध्रैरपि व्रजेत्।
वत्सरत्रितयात्सार्धाद्व्योमवच्च भविष्यति॥ १३.४६॥
ṣaṇmāsādgaganākāraḥ sūkṣmarandhrairapi vrajet|
vatsaratritayātsārdhādvyomavacca bhaviṣyati||13.46||

इच्छयैव महाकायः सूक्ष्मदेहस्तथेच्छया।
अच्छेद्यश्चाप्यभेद्यश्च च्छिद्रां पश्यति मेदिनीम्॥ १३.४७॥
icchayaiva mahākāyaḥ sūkṣmadehastathecchayā|
acchedyaścāpyabhedyaśca cchidrāṁ paśyati medinīm||13.47||

शतपुष्परसोच्छिष्टमूषागर्भखवन्निजम्।
देहं चिन्तयतस्त्र्यब्दाद्व्योमज्ञानं प्रजायते॥ १३.४८॥
śatapuṣparasocchiṣṭamūṣāgarbhakhavannijam|
dehaṁ cintayatastryabdādvyomajñānaṁ prajāyate||13.48||

पूर्वोक्तं च फलं सर्वं सप्ताहादिकमाप्नुयात्।
ललाटे चिन्तयेत्तद्वद्द्वादशाङ्गुलमायतम्॥ १३.४९॥
pūrvoktaṁ ca phalaṁ sarvaṁ saptāhādikamāpnuyāt|
lalāṭe cintayettadvaddvādaśāṅgulamāyatam||13.49||

तत्तत्त्वेशान्क्रमात्सर्वान्प्रपश्यत्यग्रतः स्थितान्।

राहुग्रस्तेन्दुबिम्बाभं ध्यायंस्तत्समतां व्रजेत्॥ १३.५०॥

tattattveśānkramātsarvānprapaśyatyagrataḥ sthitān|
rāhugrastendubimbābhaṁ dhyāyaṁstatsamatāṁ vrajet||13.50||

सकलं चन्द्रबिम्बाभं तत्रस्थमनुचिन्तयेत्।

तन्मन्त्रेशत्वमाप्नोति ज्योत्स्नया चन्द्रतामपि॥ १३.५१॥

sakalaṁ candrabimbābhaṁ tatrasthamanucintayet|
tanmantreśatvamāpnoti jyotsnayā candratāmapi||13.51||

तयैवाधोविसर्पिण्या सबाह्याभ्यन्तरं बुधः।

मन्त्रेश्वरेशतामाप्य विज्ञानमतुलं लभेत्॥ १३.५२॥

tayaivādhovisarpiṇyā sabāhyābhyantaraṁ budhaḥ|
mantreśvareśatāmāpya vijñānamatulaṁ labhet||13.52||

तया चोर्ध्वविसर्पिण्या ज्योत्स्नयामृतरूपया।

स्वतन्त्रत्वमनुप्राप्य न क्वचित्प्रतिहन्यते॥ १३.५३॥

tayā cordhvavisarpiṇyā jyotsnayāmṛtarūpayā|
svatantratvamanuprāpya na kvacitpratihanyate||13.53||

इत्येवं पञ्चतत्त्वानां धारणा परिकीर्तिता।

शुद्धाध्वस्था तु संवित्तिर्भूतावेशोऽत्र पञ्चधा॥ १३.५४॥

ityevaṁ pañcatattvānāṁ dhāraṇā parikīrtitā|
śuddhādhvasthā tu saṁvittirbhūtāveśo'tra pañcadhā||13.54||

तास्वेव सन्दधच्चित्तं विषादिक्षयमात्मनः।

अन्यस्यामपि संवित्तौ यस्यामेव निजेच्छया॥ १३.५५॥

tāsveva sandadhaccittaṁ viṣādikṣayamātmanaḥ|
anyasyāmapi saṁvittau yasyāmeva nijecchayā||13.55||

चेतः सम्यक्स्थिरीकुर्यात्तया तत्फलमश्नुते।

एकापि भाव्यमानेयमवान्तरविभेदतः॥ १३.५६॥

cetaḥ samyaksthirīkuryāttayā tatphalamaśnute|
ekāpi bhāvyamāneyamavāntaravibhedataḥ||13.56||

अन्तरायत्वमभ्येति तत्र कुर्यान्न संस्थितिम्।
संस्थितिं तत्र कुर्वन्तो न प्राप्स्यन्त्युत्तमं फलम्॥ १३.५७॥
antarāyatvamabhyeti tatra kuryānna saṁsthitim|
saṁsthitiṁ tatra kurvanto na prāpsyantyuttamaṁ phalam||13.57||

धारणापञ्चके सिद्धे पिशाचानां गुणाष्टकम्।
ऐन्द्रान्ताः पञ्च सिद्ध्यन्ति योगिनां भेदतोऽपिवा॥ १३.५८॥
dhāraṇāpañcake siddhe piśācānāṁ guṇāṣṭakam|
aindrāntāḥ pañca siddhyanti yogināṁ bhedato'pivā||13.58||

इष्टाः पञ्चदशावस्थाः क्रमेणैव समभ्यसन्।
त्र्यब्दादाद्यां प्रसाध्यान्यां द्वाभ्यामेकेन चापराम्॥ १३.५९॥
iṣṭāḥ pañcadaśāvasthāḥ krameṇaiva samabhyasan|
tryabdādādyāṁ prasādhyānyāṁ dvābhyāmekena cāparām||13.59||

षण्मासात्पञ्चभिश्चान्यां चतुर्भिस्त्रिभिरेव च।
द्वाभ्यामेकेन पक्षेण दशभिः पञ्चभिर्दिनैः॥ १३.६०॥
ṣaṇmāsātpañcabhiścānyāṁ caturbhistribhireva ca|
dvābhyāmekena pakṣeṇa daśabhiḥ pañcabhirdinaiḥ||13.60||

त्रिभिर्द्वाभ्यामथैकेन व्यस्तेच्छोः पूर्ववत्क्रमः।
शाश्वतं पदमाप्नोति भुक्त्वा सिद्धिं यथेप्सिताम्॥ १३.६१॥
tribhirdvābhyāmathaikena vyastecchoḥ pūrvavatkramaḥ|
śāśvataṁ padamāpnoti bhuktvā siddhiṁ yathepsitām||13.61||

इति श्रीमालिनीविजयोत्तरे तन्त्रे भूतजयाधिकारस्त्रयोदशः॥ १३॥
iti śrīmālinīvijayottare tantre bhūtajayādhikārastrayodaśaḥ||13||

## तन्मात्रधारणाधिकारः चतुर्दशः १४॥

अथ चतुर्दशोऽधिकारः।
atha caturdaśo'dhikāraḥ|

अथ गन्धादिपूर्वाणां तन्मात्राणामनुक्रमात्।
धारणाः सम्प्रवक्ष्यामि तत्फलानां प्रसिद्धये॥ १४.१॥
atha gandhādipūrvāṇāṁ tanmātrāṇāmanukramāt|
dhāraṇāḥ sampravakṣyāmi tatphalānāṁ prasiddhaye||14.1||

पीतकं गन्धतन्मात्रं तुर्याश्रं पर्वसंमितम्।
नासारन्ध्राग्रगं ध्यायेद्वज्रलाञ्छनलाञ्छितम्॥ १४.२॥
pītakaṁ gandhatanmātraṁ turyāśraṁ parvasaṁmitam|
nāsārandhrāgragaṁ dhyāyedvajralāñchanalāñchitam||14.2||

दशमाद्दिवसादूर्ध्वं योगिनोऽनन्यचेतसः।
कोऽपि गन्धः समायाति द्विधाभूतोऽप्यनेकधा॥ १४.३॥
daśamāddivasādūrdhvaṁ yogino'nanyacetasaḥ|
ko'pi gandhaḥ samāyāti dvidhābhūto'pyanekadhā||14.3||

ततोऽस्य ऋतुमात्रेण शुधो गन्धः स्थिरीभवेत्।
षड्भिर्मासैः स्वयं गन्धमय एव भविष्यति॥ १४.४॥
tato'sya ṛtumātreṇa śudho gandhaḥ sthirībhavet|
ṣaḍbhirmāsaiḥ svayaṁ gandhamaya eva bhaviṣyati||14.4||

यो यत्र रोचते गन्धस्तं तत्र कुरुते भृशम्।
त्र्यब्दात्सिद्धिमवाप्नोति प्रेरितां पाञ्चभौतिकीम्॥ १४.५॥
yo yatra rocate gandhastaṁ tatra kurute bhṛśam|
tryabdātsiddhimavāpnoti preritāṁ pāñcabhautikīm||14.5||

तदूर्ध्वमात्मनो रूपं तत्र सञ्चिन्तयेद्धृदि।
गन्धावरणविज्ञानं त्रिभिरब्दैरवाप्नुयात्॥ १४.६॥
tadūrdhvamātmano rūpaṁ tatra sañcintayeddhṛdi|
gandhāvaraṇavijñānaṁ tribhirabdairavāpnuyāt||14.6||

ईषद्दीप्तियुतं तत्र तन्मण्डलविवर्जितम्।
ध्यायन्प्रपश्यते सर्वान्गन्धावरणवासिनः॥ १४.७॥
īṣaddīptiyutaṁ tatra tanmaṇḍalavivarjitam|
dhyāyanprapaśyate sarvāngandhāvaraṇavāsinaḥ||14.7||

धरातत्त्वोक्तबिम्बाभं तत्रैवमनुचिन्तयन्।
तत्समानत्वमभ्येति पूर्ववद्द्वितये स्थिरे॥ १४.८॥
dharātattvoktabimbābhaṁ tatraivamanucintayan|
tatsamānatvamabhyeti pūrvavaddvitaye sthire||14.8||

स्वरूपं तत्र सञ्चिन्त्य भासयन्तमधः स्थितम्।
तदीशत्वमवाप्नोति पूर्वोक्तेनैव वर्त्मना॥ १४.९॥
svarūpaṁ tatra sañcintya bhāsayantamadhaḥ sthitam|
tadīśatvamavāpnoti pūrvoktenaiva vartmanā||14.9||

धरातत्त्वोक्तवत्सर्वमत ऊर्ध्वमनुस्मरन्।
तद्रूपं फलमाप्नोति गन्धावरणसंस्थितम्॥ १४.१०॥
dharātattvoktavatsarvamata ūrdhvamanusmaran|
tadrūpaṁ phalamāpnoti gandhāvaraṇasaṁsthitam||14.10||

रसरूपामतो वक्ष्ये धारणां योगिसेविताम्।
यया सर्वरसावाप्तिर्योगिनः सम्प्रजायते॥ १४.११॥
rasarūpāmato vakṣye dhāraṇāṁ yogisevitām|
yayā sarvarasāvāptiryoginaḥ samprajāyate||14.11||

जलबुद्बुदसङ्काशं जिह्वायां चाग्रतः स्थितम्।

चिन्तयेद्रसतन्मात्रं जिह्वाग्राधारमात्मनः॥ १४.१२॥

jalabudbudasaṅkāśaṁ jihvāyāṁ cāgrataḥ sthitam|
cintayedrasatanmātraṁ jihvāgrādhāramātmanaḥ||14.12||

सुशीतं षड्रसं चिन्त्यं तद्गतेनान्तरात्मना।

ततोऽस्य मासमात्रेण रसास्वादः प्रवर्तते॥ १४.१३॥

suśītaṁ ṣaḍrasaṁ cintyaṁ tadgatenāntarātmanā|
tato'sya māsamātreṇa rasāsvādaḥ pravartate||14.13||

लवणादीन्परित्यज्य यदा मधुरतां गतः।

तदा तन्निगिरन्योगी षण्मासान्मृत्युजिद्भवेत्॥ १४.१४॥

lavaṇādīnparityajya yadā madhuratāṁ gataḥ|
tadā tannigiranyogī ṣaṇmāsānmṛtyujidbhavet||14.14||

जराव्याधिविनिर्मुक्तः कृष्णकेशोऽच्युतद्युतिः।

जीवेदाचन्द्रतारार्कमभ्यस्यंश्च क्वचित्क्वचित्॥ १४.१५॥

jarāvyādhivinirmuktaḥ kṛṣṇakeśo'cyutadyutiḥ|
jīvedācandratārārkamabhyasyaṁśca kvacitkvacit||14.15||

पूर्वोक्तबुद्बुदाकारं स्वरूपमनुचिन्तयन्।

नीरावरणविज्ञानमाप्नोतीति किमद्भुतम्॥ १४.१६॥

pūrvoktabudbudākāraṁ svarūpamanucintayan|
nīrāvaraṇavijñānamāpnotīti kimadbhutam||14.16||

तमेव द्युतिसंयुक्तं ध्यायन्नाधारवर्जितम्।

पद्येत वत्सरैः सर्वां रसावरणमाश्रिताम्॥ १४.१७॥

tameva dyutisaṁyuktaṁ dhyāyannnādhāravarjitam|
padyeta vatsaraiḥ sarvāṁ rasāvaraṇamāśritām||14.17||

जलतत्त्वोक्तबिम्बादि तदूर्ध्वमनुचिन्तयन्।

पूर्वोक्तं सर्वमाप्नोति रसावरणजं स्फुटम्॥ १४.१८॥

jalatattvoktabimbādi tadūrdhvamanucintayan|

pūrvoktaṁ sarvamāpnoti rasāvaraṇajaṁ sphuṭam||14.18||

अतो रूपवतीं वक्ष्ये दिव्यदृष्टिप्रदां शुभाम्।
धारणां सर्वसिद्ध्यर्थं रूपतन्मात्रमाश्रिताम्॥ १४.१९॥
ato rūpavatīṁ vakṣye divyadṛṣṭipradāṁ śubhām|
dhāraṇāṁ sarvasiddhyarthaṁ rūpatanmātramāśritām||14.19||

एकान्तस्थो यदा योगी विनिमीलितलोचनः।
शरत्सन्ध्याभ्रसङ्काशं यत्तु किञ्चित्प्रपश्यति॥ १४.२०॥
ekāntastho yadā yogī vinimīlitalocanaḥ|
śaratsandhyābhrasaṅkāśaṁ yattu kiñcitprapaśyati||14.20||

तत्र चेतः समाधाय यावदास्ते दशाहकम्।
तावत्प्रपश्यते तत्र बिन्दून्सूक्ष्मतमानपि॥ १४.२१॥
tatra cetaḥ samādhāya yāvadāste daśāhakam|
tāvatprapaśyate tatra bindūnsūkṣmatamānapi||14.21||

केचित्तत्र सिता रक्ताः पीता नीलास्तथा परे।
तान्दृष्ट्वा तत्र सन्दध्यान्मनोऽत्यन्तमनन्यधीः॥ १४.२२॥
kecittatra sitā raktāḥ pītā nīlāstathā pare|
tāndṛṣṭvā tatra sandadhyānmano'tyantamananyadhīḥ||14.22||

षण्मासात्पश्यते तेषु रूपाणि सुबहून्यपि।
त्र्यब्दात्तान्येव तेजोभिः प्रदीप्तानि स्थिराणि च॥ १४.२३॥
ṣaṇmāsātpaśyate teṣu rūpāṇi subahūnyapi|
tryabdāttānyeva tejobhiḥ pradīptāni sthirāṇi ca||14.23||

तान्यभ्यस्यंस्ततो द्व्यब्दाद्बिम्बाकाराणि पश्यति।
ततोऽब्दात्पश्यते तेजः षण्मासात्पुरुषाकृति॥ १४.२४॥
tānyabhyasyaṁstato dvyabdādbimbākārāṇi paśyati|
tato'bdātpaśyate tejaḥ ṣaṇmāsātpuruṣākṛti||14.24||

त्रिमासाद्व्यापकं तेजो मासात्सर्वं विसर्पितम्।

कालक्रमाच्च पूर्वोक्तं रूपावरणमाश्रितम्॥ १४.२५॥

trimāsādvyāpakaṁ tejo māsātsarvaṁ visarpitam|
kālakramācca pūrvoktaṁ rūpāvaraṇamāśritam||14.25||

तत्सर्वं फलमाप्नोति दिव्यदृष्टिश्च जायते।

इतीयं कल्पनाशून्या धारणा कृतकोदिता॥ १४.२६॥

tatsarvaṁ phalamāpnoti divyadṛṣṭiśca jāyate|
itīyaṁ kalpanāśūnyā dhāraṇā kṛtakoditā||14.26||

दशपञ्चविधो भेदः स्वयमेवात्र जायते।

यतोऽस्यां निश्चयं कुर्यात्किमन्यैः शास्त्रडम्बरैः॥ १४.२७॥

daśapañcavidho bhedaḥ svayamevātra jāyate|
yato'syāṁ niścayaṁ kuryātkimanyaiḥ śāstraḍambaraiḥ||14.27||

अत स्पर्शवतीमन्यां कथयामि तवाधुना।

धारणां तु यया योगी वज्रदेहः प्रजायते॥ १४.२८॥

ata sparśavatīmanyāṁ kathayāmi tavādhunā|
dhāraṇāṁ tu yayā yogī vajradehaḥ prajāyate||14.28||

षट्कोणमण्डलान्तः स्थमात्मानं परिभावयेत्।

रूक्षमञ्जनसङ्काशं प्रत्यंशं स्फुरिताकुलम्॥ १४.२९॥

ṣaṭkoṇamaṇḍalāntaḥ sthamātmānaṁ paribhāvayet|
rūkṣamañjanasaṅkāśaṁ pratyaṁśaṁ sphuritākulam||14.29||

ततोऽस्य दशभिर्देवि दिवसैस्त्वचि सर्वतः।

भवेत्पिपीलिकास्पर्शस्ततस्तमनुचिन्तयन्॥ १४.३०॥

tato'sya daśabhirdevi divasaistvaci sarvataḥ|
bhavetpipīlikāsparśastatastamanucintayan||14.30||

वज्रदेहत्वमासाद्य पूर्वोक्तं पूर्ववल्लभेत्।

पूर्वोक्तमण्डलाकारं पूर्वरूपं विचिन्तयन्॥ १४.३१॥

vajradehatvamāsādya pūrvoktaṁ pūrvavallabhet|
pūrvoktamaṇḍalākāraṁ pūrvarūpaṁ vicintayan||14.31||

स्पर्शतत्त्वावृतिज्ञानं लभन्केन निवार्यते।

हीनमण्डलमात्मानं ध्यायेत्तत्पतिसिद्धये॥ १४.३२॥

sparśatattvāvṛtijñānaṁ labhankena nivāryate|
hīnamaṇḍalamātmānaṁ dhyāyettatpatisiddhaye||14.32||

यया संसिद्धया सर्वस्पर्शवेदी भविष्यति।

कर्णौ पिधाय यत्नेन निमीलितविलोचनः॥ १४.३३॥

yayā saṁsiddhayā sarvasparśavedī bhaviṣyati|
karṇau pidhāya yatnena nimīlitavilocanaḥ||14.33||

यं शृणोति महाघोषं चेतस्तत्रानुसन्धयेत्।

दीप्यते जाठरो वह्निस्ततोऽस्य दशभिर्दिनैः॥ १४.३४॥

yaṁ śṛṇoti mahāghoṣaṁ cetastatrānusandhayet|
dīpyate jāṭharo vahnistato'sya daśabhirdinaiḥ||14.34||

दूराच्छ्रवणविज्ञानं षण्मासादुपजायते।

यस्तस्यान्ते ध्वनिर्मन्दः किञ्चित्किञ्चिद्विभाव्यते॥ १४.३५॥

dūrācchravaṇavijñānaṁ ṣaṇmāsādupajāyate|
yastasyānte dhvanirmandaḥ kiñcitkiñcidvibhāvyate||14.35||

सकलात्मा स विज्ञेयस्तदभ्यासादनन्यधीः।

शब्दावरणविज्ञानमाप्नोति स्थिरतां गतम्॥ १४.३६॥

sakalātmā sa vijñeyastadabhyāsādananyadhīḥ|
śabdāvaraṇavijñānamāpnoti sthiratāṁ gatam||14.36||

यः पुनः श्रूयते शब्दस्तदन्ते शङ्खनादवत्।

प्रलयाकलरूपं तदभ्यस्यं तत्फलेप्सुभिः॥ १४.३७॥

yaḥ punaḥ śrūyate śabdastadante śaṅkhanādavat|

pralayākalarūpaṁ tadabhyasyaṁ tatphalepsubhiḥ||14.37||

स एवातितरामन्यशब्दप्रच्छादको यदा।

विज्ञानाकल इत्युक्तस्तदासावपराजिते॥ १४.३८॥

sa evātitarāmanyaśabdapracchādako yadā|
vijñānākala ityuktastadāsāvaparājite||14.38||

मनोह्लादकरो योऽन्यस्तदन्ते संविभाव्यते।

स मन्त्र इति विज्ञेयो योगिभिर्योगकाङ्क्षिभिः॥ १४.३९॥

manohlādakaro yo'nyastadante saṁvibhāvyate|
sa mantra iti vijñeyo yogibhiryogakāṅkṣibhiḥ||14.39||

ततस्तु श्रूयते योऽन्यः शान्तघण्टानिनादवत्।

स मन्त्रेश इति प्रोक्तः सर्वसिद्धिफलप्रदः॥ १४.४०॥

tatastu śrūyate yo'nyaḥ śāntaghaṇṭāninādavat|
sa mantreśa iti proktaḥ sarvasiddhiphalapradaḥ||14.40||

घण्टानादविरामान्ते यः शब्दः सम्प्रजायते।

मन्त्रेशेशपदं तद्धि सिद्धीनां कारणं महत्॥ १४.४१॥

ghaṇṭānādavirāmānte yaḥ śabdaḥ samprajāyate|
mantreśeśapadaṁ taddhi siddhīnāṁ kāraṇaṁ mahat||14.41||

अनिलेनाहता वीणा यादृङ्नादं विमुञ्चति।

तादृशो यो ध्वनिस्तत्र तं विद्याच्छाम्भवं पदम्॥ १४.४२॥

anilenāhatā vīṇā yādṛṅnādaṁ vimuñcati|
tādṛśo yo dhvanistatra taṁ vidyācchāmbhavaṁ padam||14.42||

पृथग्वा क्रमशो वापि सर्वानेतान्समभ्यसेत्।

प्राप्नोति सर्ववित्सिद्धिः शब्दावरणमाश्रिताः॥ १४.४३॥

pṛthagvā kramaśo vāpi sarvānetānsamabhyaset|
prāpnoti sarvavitsiddhiḥ śabdāvaraṇamāśritāḥ||14.43||

इत्येताः कथिताः पञ्च तन्मात्राणां तु धारणाः।
ityetāḥ kathitāḥ pañca tanmātrāṇāṁ tu dhāraṇāḥ|

इति श्रीमालिनीविजयोत्तरे तन्त्रे तन्मात्रधारणाधिकारश्चतुर्दशः॥१४॥
iti śrīmālinīvijayottare tantre tanmātradhāraṇādhikāraścaturdaśaḥ||14||

## अक्षधारणाधिकारः पञ्चदशः १५ ॥

अथ पञ्चदशोऽधिकारः।

atha pañcadaśo'dhikāraḥ|

अथ वागिन्द्रियादीनां मनोन्तानामनुक्रमात्।

धारणाः सम्प्रवक्ष्यामि दशैकां च समासतः॥ १५.१॥

atha vāgindriyādīnāṁ manontānāmanukramāt|
dhāraṇāḥ sampravakṣyāmi daśaikāṁ ca samāsataḥ||15.1||

वदनान्तं नमः शब्दमात्मनश्चिन्तयेद्बुधः।

गृहीतवाक्त्वमभ्येति मौनेन मधुसूदनि॥ १५.२॥

vadanāntaṁ namaḥ śabdamātmanaścintayedbudhaḥ|
gṛhītavāktvamabhyeti maunena madhusūdani||15.2||

सर्वत्रास्खलिता वाणी षड्भिर्मासैः प्रवर्तते।

सर्वशास्त्रार्थवेत्तृत्वं वत्सरादुपजायते॥ १५.३॥

sarvatrāskhalitā vāṇī ṣaḍbhirmāsaiḥ pravartate|
sarvaśāstrārthavettṛtvaṁ vatsarādupajāyate||15.3||

वागेवास्य प्रवर्तेत काव्यालङ्कारभूषिता।

त्रिभिरब्दैः स्वयं कर्ता शास्त्राणां सम्प्रजायते॥ १५.४॥

vāgevāsya pravarteta kāvyālaṅkārabhūṣitā|
tribhirabdaiḥ svayaṁ kartā śāstrāṇāṁ samprajāyate||15.4||

तत्रैव चिन्तयेद्देहं स्वकीयमनुरूपतः।

भूयस्तमेव धवलमीषत्तेजोवभासितम्॥ १५.५॥

tatraiva cintayeddehaṁ svakīyamanurūpataḥ|
bhūyastameva dhavalamīṣattejovabhāsitam||15.5||

रसान्तः सोमबिम्बादितेजोन्तं तमनुस्मरेत्।

सर्वं फलमवाप्नोति वागावरणजं क्रमात्॥ १५.६॥

rasāntaḥ somabimbāditejontaṁ tamanusmaret|
sarvaṁ phalamavāpnoti vāgāvaraṇajaṁ kramāt||15.6||

पाणौ च तं समादाय षण्मासाद्दूरसंस्थितम्।

वस्तु गृह्णात्यसन्देहात्त्र्यब्दात्पारेऽपि वारिधेः॥ १५.७॥

pāṇau ca taṁ samādāya ṣaṇmāsāddūrasaṁsthitam|
vastu gṛhṇātyasandehāttryabdātpāre'pi vāridheḥ||15.7||

तत्रात्मदेहं पूर्वं तु पद्माभमनुचिन्तयन्।

सव्यापारादिभेदेन चतुर्दशकमादरात्॥ १५.८॥

tatrātmadehaṁ pūrvaṁ tu padmābhamanucintayan|
savyāpārādibhedena caturdaśakamādarāt||15.8||

पूर्वोक्तकालनियमात्पूर्वोक्तेनैव वर्त्मना।

सर्वं फलमवाप्नोति हस्तावृतिसमाश्रितम्॥ १५.९॥

pūrvoktakālaniyamātpūrvoktenaiva vartmanā|
sarvaṁ phalamavāpnoti hastāvṛtisamāśritam||15.9||

पादावेवंविधो ध्यायन्वत्सरत्रयमादरात्।

मुहूर्तेन समुद्रान्तामश्रान्तो भ्रमति क्षितिम्॥ १५.१०॥

pādāvevaṁvidho dhyāyanvatsaratrayamādarāt|
muhūrtena samudrāntāmaśrānto bhramati kṣitim||15.10||

चतुर्दश समभ्यर्च्य स्वदेहादिकमभ्यसन्।

प्राप्नोति पूर्ववत्सर्वं फलं पादावृतिस्थितम्॥ १५.११॥

caturdaśa samabhyarcya svadehādikamabhyasan|
prāpnoti pūrvavatsarvaṁ phalaṁ pādāvṛtisthitam||15.11||

पायावपि मनस्तत्त्वं स्थिरीकुर्वन्नवाप्स्यति।

मासेन तद्भवव्याधिविमुक्तिमविलम्बतः॥१५.१२॥

pāyāvapi manastattvaṁ sthirīkurvannavāpsyati|
māsena tadbhavavyādhivimuktimavilambataḥ||15.12||

पुण्यश्लोकत्वमाप्नोति त्रिभिरब्दैरनादरात्।

चतुर्दशविधं चात्र पूर्ववत्फलमाप्स्यति॥१५.१३॥

puṇyaślokatvamāpnoti tribhirabdairanādarāt|
caturdaśavidhaṁ cātra pūrvavatphalamāpsyati||15.13||

स्वरूपतः स्मरेल्लिङ्गं मासमात्राज्जितेन्द्रियः।

षड्भिर्मासैरनायासादिच्छाकामित्वमाप्नुयात्॥१५.१४॥

svarūpataḥ smarelliṅgaṁ māsamātrājjitendriyaḥ|
ṣaḍbhirmāsairanāyāsādicchākāmitvamāpnuyāt||15.14||

चतुर्दशविधे भेदे तत्राभ्यस्ते महामतिः।

लिङ्गावरणजं सर्वं पूर्ववल्लभते फलम्॥१५.१५॥

caturdaśavidhe bhede tatrābhyaste mahāmatiḥ|
liṅgāvaraṇajaṁ sarvaṁ pūrvavallabhate phalam||15.15||

स्वजिह्वामिन्दुवर्णाभां चिन्तयेद्दशभिर्दिनैः।

प्राप्नोत्यनुभवं योगी जिह्वाभवमिवात्मनः॥१५.१६॥

svajihvāminduvarṇābhāṁ cintayeddaśabhirdinaiḥ|
prāpnotyanubhavaṁ yogī jihvābhavamivātmanaḥ||15.16||

आस्वादयति दूरस्थं षण्मासादेकमानसः।

वत्सरैस्तु त्रिभिः साक्षाल्लेढ्यसौ परमामृतम्॥१५.१७॥

āsvādayati dūrasthaṁ ṣaṇmāsādekamānasaḥ|
vatsaraistu tribhiḥ sākṣālleḍhyasau paramāmṛtam||15.17||

येनासौ भवति योगी जरामरणवर्जितः।

अपेयादिप्रसक्तोऽपि न पापैः परिभूयते॥१५.१८॥

yenāsau bhavati yogī jarāmaraṇavarjitaḥ|

apeyādiprasakto'pi na pāpaiḥ paribhūyate||15.18||

पूर्ववत्सर्वमन्यच्च स्वदेहाद्यनुचिन्तयन्।
फलमाप्नोत्यसन्देहाद्रसनावृतिसम्भवम्॥ १५.१९॥
pūrvavatsarvamanyacca svadehādyanucintayan|
phalamāpnotyasandehādrasanāvṛtisambhavam||15.19||

कनकाभं स्वकं घ्राणमनुचिन्तयतः शनैः।
दिवसैर्दशभिर्घ्राणशून्यतानुभवो भवेत्॥ १५.२०॥
kanakābhaṁ svakaṁ ghrāṇamanucintayataḥ śanaiḥ|
divasairdaśabhirghrāṇaśūnyatānubhavo bhavet||15.20||

षण्मासाद्गन्धमाघ्राति दूरस्थस्यापि वस्तुनः।
घातयेद्गन्धमाघ्राय यस्य दुष्टो भविष्यति॥ १५.२१॥
ṣaṇmāsādgandhamāghrāti dūrasthasyāpi vastunaḥ|
ghātayedgandhamāghrāya yasya duṣṭo bhaviṣyati||15.21||

वत्सरैस्तु त्रिभिर्दिव्यं गन्धमासाद्य योगवित्।
जरामरणनैर्गुण्ययुक्तो दिव्यत्वमर्हति॥ १५.२२॥
vatsaraistu tribhirdivyaṁ gandhamāsādya yogavit|
jarāmaraṇanairguṇyayukto divyatvamarhati||15.22||

सर्वमन्यद्यथोद्दिष्टं तथैव च विचिन्तयेत्।
क्रमिकं फलमाप्नोति घ्राणावरणमास्थितम्॥ १५.२३॥
sarvamanyadyathoddiṣṭaṁ tathaiva ca vicintayet|
kramikaṁ phalamāpnoti ghrāṇāvaraṇamāsthitam||15.23||

उदयादित्यसङ्काशे चिन्तयंश्चक्षुषी निजे।
दशाहाच्चक्षुषो रक्तस्रावानुभवमाप्स्यति॥ १५.२४॥
udayādityasaṅkāśe cintayaṁścakṣuṣī nije|
daśāhāccakṣuṣo raktasrāvānubhavamāpsyati||15.24||

वेदना महती चास्य ललाटे सम्प्रजायते।

न भेतव्यं महादेवि न चाभ्यासं परित्यजेत्॥ १५.२५॥

vedanā mahatī cāsya lalāṭe samprajāyate|
na bhetavyaṁ mahādevi na cābhyāsaṁ parityajet||15.25||

सन्त्यजन्नन्धतामेति तेन यत्नाअत्समभ्यसेत्।

षड्भिर्मासैर्महायोगी दिव्यदृष्टिः प्रजायते॥ १५.२६॥

santyajannandhatāmeti tena yatnāatsamabhyaset|
ṣaḍbhirmāsairmahāyogī divyadṛṣṭiḥ prajāyate||15.26||

छिद्रां प्रपश्यते भूमिं कटाहान्तामतन्द्रितः।

आध्रुवान्तमथोर्ध्वं च करामलकवद्बुधः॥ १५.२७॥

chidrāṁ prapaśyate bhūmiṁ kaṭāhāntāmatandritaḥ|
ādhruvāntamathordhvaṁ ca karāmalakavadbudhaḥ||15.27||

वत्सरैस्तु त्रिभिर्योगी ब्रह्माण्डान्तं प्रपश्यति।

तदन्तर्योगिनीज्ञानं शरीरस्थं प्रजायते॥ १५.२८॥

vatsaraistu tribhiryogī brahmāṇḍāntaṁ prapaśyati|
tadantaryoginījñānaṁ śarīrasthaṁ prajāyate||15.28||

स्वदेहादिकमन्यच्च पूर्वोक्तं पूर्ववत्स्मरन्।

नयनावृतिजं सर्वमाप्नोतीति किमद्भुतम्॥ १५.२९॥

svadehādikamanyacca pūrvoktaṁ pūrvavatsmaran|
nayanāvṛtijaṁ sarvamāpnotīti kimadbhutam||15.29||

सर्वत्राञ्जनपत्राभां निस्तरङ्गां त्वचं स्मरन्।

शस्त्रैरपि न मासेन हन्तुं शक्यो भविष्यति॥ १५.३०॥

sarvatrāñjanapatrābhāṁ nistaraṅgāṁ tvacaṁ smaran|
śastrairapi na māsena hantuṁ śakyo bhaviṣyati||15.30||

षण्मासादतितीव्रेण नाग्निनाप्येष दह्यते।

वत्सरत्रितयाद्योगी वज्रोपलविषादिभिः॥ १५.३१॥

ṣaṇmāsādatitīvreṇa nāgnināpyeṣa dahyate|
vatsaratritayādyogī vajropalaviṣādibhiḥ||15.31||

पीड्यते न कदाचित्स्यादजरामरतां गतः।
स्पर्शादृतिपविज्ञानगीतवच्च चतुर्दश॥ १५.३२॥

pīḍyate na kadācitsyādajarāmaratāṁ gataḥ|
sparśādṛtipavijñānagītavacca caturdaśa||15.32||

भेदाः सह फलैर्ज्ञेयाः पूर्वकालानुसारतः।
किन्त्वत्र चिन्तयेद्देहं स्वदेहादिभिरावृतम्॥ १५.३३॥

bhedāḥ saha phalairjñeyāḥ pūrvakālānusārataḥ|
kintvatra cintayeddehaṁ svadehādibhirāvṛtam||15.33||

सन्दधानः स्वकं चेतः श्रोत्राकाशे विचक्षणः।
दूराच्छ्रवणविज्ञानं षण्मासादुपजायते॥ १५.३४॥

sandadhānaḥ svakaṁ cetaḥ śrotrākāśe vicakṣaṇaḥ|
dūrācchravaṇavijñānaṁ ṣaṇmāsādupajāyate||15.34||

त्रिभिः संवत्सरैर्देवि ब्रह्माण्डान्तरुदीरितम्।
शृणोति स स्फुटं सर्वं जरामरणवर्जितः॥ १५.३५॥

tribhiḥ saṁvatsarairdevi brahmāṇḍāntarudīritam|
śṛṇoti sa sphuṭaṁ sarvaṁ jarāmaraṇavarjitaḥ||15.35||

तत्राकाशोक्तवत्सर्वं स्वदेहाद्यनुचिन्तयेत्।
श्रोत्रावरणजं सर्वं फलमाप्नोति पूर्ववत्॥ १५.३६॥

tatrākāśoktavatsarvaṁ svadehādyanucintayet|
śrotrāvaraṇajaṁ sarvaṁ phalamāpnoti pūrvavat||15.36||

मनोवतीमतो वक्ष्ये धारणां सर्वसिद्धिदाम्।
यया संसिद्धया देवि सर्वसिद्धिफलं लभेत्॥ १५.३७॥

manovatīmato vakṣye dhāraṇāṁ sarvasiddhidām|

yayā saṁsiddhayā devi sarvasiddhiphalaṁ labhet||15.37||

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।

तस्मात्तदभ्यसेन्मन्त्री यदीच्छेन्मोक्षम्व्ययम्॥ १५.३८॥

mana eva manuṣyāṇāṁ kāraṇaṁ bandhamokṣayoḥ|
tasmāttadabhyasenmantrī yadīcchenmokṣamvyayam||15.38||

तदर्धचन्द्रसङ्काशमधोवक्त्रं हृदि स्थितम्।

चिन्तयन्मासमात्रेण प्रतिभां प्रतिपत्स्यते॥ १५.३९॥

tadardhacandrasaṅkāśamadhovaktraṁ hṛdi sthitam|
cintayanmāsamātreṇa pratibhāṁ pratipatsyate||15.39||

अकस्मात्पस्यते किञ्चिदकस्माच्छृणुते तथा।

सर्वेन्द्रियात्मकं ज्ञानमकस्माच्च क्वचित्क्वचित्॥ १५.४०॥

akasmātpasyate kiñcidakasmācchṛṇute tathā|
sarvendriyātmakaṁ jñānamakasmācca kvacitkvacit||15.40||

स्वस्वकेन्द्रियविज्ञानं सम्पश्येद्वत्सरत्रयात्।

भवते योगयुक्तस्य योगिनः सुपरिस्फुटम्॥ १५.४१॥

svasvakendriyavijñānaṁ sampaśyedvatsaratrayāt|
bhavate yogayuktasya yoginaḥ suparisphuṭam||15.41||

स्वदेहादिकमप्यत्र पूर्वोक्तवदनुस्मरन्।

चित्तावरणविज्ञानं प्राप्य सोमगुणं लभेत्॥ १५.४२॥

svadehādikamapyatra pūrvoktavadanusmaran|
cittāvaraṇavijñānaṁ prāpya somaguṇaṁ labhet||15.42||

इत्येकादश गीतानि समभ्यस्यानि ते तथा।

इन्द्रियाणि यतः सर्वं फलमेव प्रतिष्ठितम्॥ १५.४३॥

ityekādaśa gītāni samabhyasyāni te tathā|
indriyāṇi yataḥ sarvaṁ phalameva pratiṣṭhitam||15.43||

बन्धमोक्षाबुभावेताविन्द्रियाणां जगुर्बुधाः।
विगृहीतानि बन्धाय विमुक्तानि विमुक्तये॥ १५.४४॥
bandhamokṣābubhāvetāvindriyāṇāṁ jagurbudhāḥ|
vigṛhītāni bandhāya vimuktāni vimuktaye||15.44||

एतानि व्यापके भावे यदा स्युर्मनसा सह।
विमुक्तानीति विद्वद्भिर्ज्ञातव्यानि तदा प्रिये॥ १५.४५॥
etāni vyāpake bhāve yadā syurmanasā saha|
vimuktānīti vidvadbhirjñātavyāni tadā priye||15.45||

यदा तु विषये क्वापि प्रदेशान्तरवर्तिनि।
संस्थितानि तदा तानि बद्धानीति प्रचक्षते॥ १५.४६॥
yadā tu viṣaye kvāpi pradeśāntaravartini|
saṁsthitāni tadā tāni baddhānīti pracakṣate||15.46||

इत्ययं द्विविधो भावः शुद्धाशुद्धप्रभेदतः।
इन्द्रियाणां समाख्यातः सिद्धयोगीश्वरीमते॥ १५.४७॥
ityayaṁ dvividho bhāvaḥ śuddhāśuddhaprabhedataḥ|
indriyāṇāṁ samākhyātaḥ siddhayogīśvarīmate||15.47||

इति श्रीमालिनीविजयोत्तरेऽक्षधारणाधिकारः पञ्चदशः॥ १५॥
iti śrīmālinīvijayottare'kṣadhāraṇādhikāraḥ pañcadaśaḥ||15||

अथ षोडशोऽधिकारः।

atha ṣoḍaśo'dhikāraḥ|

अथ गर्वमयीं दिव्यां धारणां धारणोत्तमाम्।
महागर्वकरीं वक्ष्ये योगिनां योगवन्दिते॥ १६.१॥
atha garvamayīṁ divyāṁ dhāraṇāṁ dhāraṇottamām|
mahāgarvakarīṁ vakṣye yogināṁ yogavandite||16.1||

षोडशारं स्मरेच्चक्रमात्मदेहमनन्यधीः।
एषोऽहमिति सञ्चिन्त्य स्वकार्यपरिवारितम्॥ १६.२॥
ṣoḍaśāraṁ smareccakramātmadehamananyadhīḥ|
eṣo'hamiti sañcintya svakāryaparivāritam||16.2||

अप्रधृष्यो भवेद्योगी वत्सरत्रितयेन तु।
ममत्वमच्युतं तस्य भवेत्सर्वत्र कुत्रचित्॥ १६.३॥
apradhṛṣyo bhavedyogī vatsaratritayena tu|
mamatvamacyutaṁ tasya bhavetsarvatra kutracit||16.3||

तादृग्रूपस्य चक्रस्य नाभिं मूर्तिं स्वकां स्मरन्।
चिन्तयेत्सर्वमेवाहं मयि सर्वमवस्थितम्॥ १६.४॥
tādṛgrūpasya cakrasya nābhiṁ mūrtiṁ svakāṁ smaran|
cintayetsarvamevāhaṁ mayi sarvamavasthitam||16.4||

ततोऽहङ्कारविज्ञानं प्राप्नोतीति किमद्भुतम्।
हृच्चक्रे समनुध्यायन्मत्स्वरूपमतन्द्रितः॥ १६.५॥
tato'haṅkāravijñānaṁ prāpnotīti kimadbhutam|
hṛccakre samanudhyāyanmatsvarūpamatandritaḥ||16.5||

अर्कलोकमवाप्नोति गर्वावरणजं फलम्।

बिम्बादिकं क्रमात्सर्वं चिन्तयन्नीललोहितम्॥ १६.६॥

arkalokamavāpnoti garvāvaraṇajaṁ phalam|
bimbādikaṁ kramātsarvaṁ cintayannīlalohitam||16.6||

तद्भवं सर्वमाप्नोति दशावस्थाप्रचोदितम्।

इति गर्वमयी प्रोक्ता प्रजापतिगुणप्रदा॥ १६.७॥

tadbhavaṁ sarvamāpnoti daśāvasthāpracoditam|
iti garvamayī proktā prajāpatiguṇapradā||16.7||

उद्यदादित्यबिम्बाभं हृदि पद्ममनुस्मरन्।

धर्मादिभावसंयुक्तमष्टपत्रं सकर्णिकम्॥ १६.८॥

udyadādityabimbābhaṁ hṛdi padmamanusmaran|
dharmādibhāvasaṁyuktamaṣṭapatraṁ sakarṇikam||16.8||

मासेन स्थिरबुद्धिः स्यात्षड्भिः श्रुतिधरो भवेत्।

त्रिभिरब्दैः स्वयं कर्ता शास्त्राणां सम्प्रजायते॥ १६.९॥

māsena sthirabuddhiḥ syātṣaḍbhiḥ śrutidharo bhavet|
tribhirabdaiḥ svayaṁ kartā śāstrāṇāṁ samprajāyate||16.9||

स्वां तत्र चिन्तयेन्मूर्तिं बुद्धितत्त्वं प्रपश्यति।

तदीशज्ञानमाप्नोति ब्रह्माणमनुचिन्तयन्॥ १६.१०॥

svāṁ tatra cintayenmūrtiṁ buddhitattvaṁ prapaśyati|
tadīśajñānamāpnoti brahmāṇamanucintayan||16.10||

वेदानुद्गिरते सप्त समाधिस्थोऽथवा मुनिः।

सुस्थिरास्ते सदाभ्यासादनधीता अपि स्फुटम्॥ १६.११॥

vedānudgirate sapta samādhistho'thavā muniḥ|
susthirāste sadābhyāsādanadhītā api sphuṭam||16.11||

बिम्बादिकं क्रमात्सर्वं पूर्वोक्तमनुचिन्तयन्।

प्राप्नोति ब्राह्ममैश्वर्यं बुद्ध्यावरणमाश्रितम्॥ १६.१२॥

bimbādikaṁ kramātsarvaṁ pūrvoktamanucintayan|
prāpnoti brāhmamaiśvaryaṁ buddhyāvaraṇamāśritam||16.12||

हृदि बिम्बं रवेर्ध्यायंस्तदन्तः सोममण्डलम्।

एवमभ्यसतस्तस्य षण्मासादुपजायते॥ १६.१३॥

hṛdi bimbaṁ raverdhyāyaṁstadantaḥ somamaṇḍalam|
evamabhyasatastasya ṣaṇmāsādupajāyate||16.13||

दिव्यचक्षुरजायासात्सिद्धिः स्याद्वत्सरत्रयात्।

स्वदेहं चिन्तयंस्तत्र गुणज्ञानमवाप्स्यति॥ १४॥

divyacakṣurajāyāsātsiddhiḥ syādvatsaratrayāt|
svadehaṁ cintayaṁstatra guṇajñānamavāpsyati||16.14||

लिङ्गाकारं स्मरन्दीप्तं तदीशत्वमवाप्नुयात्।

बिम्बादि पूर्ववद्ध्यायन्दशकं दशकात्मकम्॥ १६.१५॥

liṅgākāraṁ smarandīptaṁ tadīśatvamavāpnuyāt|
bimbādi pūrvavaddhyāyandaśakaṁ daśakātmakam||16.15||

फलमाप्नोत्यसन्देहाद्गुणावरणसंस्थितम्।

चतुर्विंशत्यमी प्रोक्ताः प्रत्येकं दशपञ्चधा॥ १६.१६॥

phalamāpnotyasandehādguṇāvaraṇasaṁsthitam|
caturviṁśatyamī proktāḥ pratyekaṁ daśapañcadhā||16.16||

धारणाः क्ष्मादितत्त्वानां समासाद्योगिनां हिताः।

त्रयोदशात्मके भेदे षडन्याः संस्थिता यथा॥ १६.१७॥

dhāraṇāḥ kṣmāditattvānāṁ samāsādyogināṁ hitāḥ|
trayodaśātmake bhede ṣaḍanyāḥ saṁsthitā yathā||16.17||

योगिनामनुवर्ण्यन्ते तथा योगप्रसिद्धये।

देहं मुक्त्वा स्वरूपेण नान्यत् किञ्चिदिति स्मरेत्॥ १६.१८॥

yogināmanuvarṇyante tathā yogaprasiddhaye|

dehaṁ muktvā svarūpeṇa nānyat kiñciditi smaret||16.18||

सितपद्मासनासीनं मण्डलत्रितयोपरि।
एवमत्र स्थिरीभूते मासमात्रेण योगवित्॥ १६.१९॥
sitapadmāsanāsīnaṁ maṇḍalatritayopari|
evamatra sthirībhūte māsamātreṇa yogavit||16.19||

सर्वव्याधिविनिर्मुक्तो भवतीति किमद्भुतम्।
षण्मासादस्य विज्ञानं जायते पृथिवीतले॥ १६.२०॥
sarvavyādhivinirmukto bhavatīti kimadbhutam|
ṣaṇmāsādasya vijñānaṁ jāyate pṛthivītale||16.20||

अब्दाज्जरादिनिर्मुक्तस्त्रिभिः पुंस्तत्त्वदृग्भवेत्।
हृदधः पङ्कजेऽत्रैव द्वादशार्धाङ्गुलाः तनुम्॥ १६.२१॥
abdājjarādinirmuktastribhiḥ puṁstattvadṛgbhavet|
hṛdadhaḥ paṅkaje'traiva dvādaśārdhāṅgulāḥ tanum||16.21||

हृदन्ते भावयेत्स्वान्यां षण्मासान्मृत्युजिद्भवेत्।
त्रिभिरब्दैः समाप्नोति पुंस्तत्त्वेश्वरतुल्यताम्॥ १६.२२॥
hṛdante bhāvayetsvānyāṁ ṣaṇmāsānmṛtyujidbhavet|
tribhirabdaiḥ samāpnoti puṁstattveśvaratulyatām||16.22||

बिम्बादौ पूर्ववत्सर्वं तत्र सञ्चिन्तिते सति।
फलमाप्नोत्यसन्देहात्पुरुषावरणस्थितम्॥ १६.२३॥
bimbādau pūrvavatsarvaṁ tatra sañcintite sati|
phalamāpnotyasandehātpuruṣāvaraṇasthitam||16.23||

एतद्वेदान्तविज्ञानं समासादुपवर्णितम्।
कपिलस्य पुरा प्रोक्तमेतद्विस्तरशो मया॥ १६.२४॥
etadvedāntavijñānaṁ samāsādupavarṇitam|
kapilasya purā proktametadvistaraśo mayā||16.24||

शरत्सन्ध्याभ्रसङ्घाभं स्वदेहमनुचिन्तयन्।

वीतरागत्वमाप्नोति षड्भिर्मासैर्न संशयः॥ १६.२५॥

śaratsandhyābhrasaṅghābhaṁ svadehamanucintayan|
vītarāgatvamāpnoti ṣaḍbhirmāsairna saṁśayaḥ||16.25||

जरामरणनिर्मुक्तो वर्षेणैवोपजायते।

त्र्यब्दाज्ज्ञानमवाप्नोति रागावरणजं महत्॥ १६.२६॥

jarāmaraṇanirmukto varṣeṇaivopajāyate|
tryabdājjñānamavāpnoti rāgāvaraṇajaṁ mahat||16.26||

रक्तं सञ्चिन्तयेद्देहं सम्पूर्णाभ्रोपरिस्थितम्।

मासषट्कमनुद्विग्नो वीतरागत्वसिद्धये॥ १६.२७॥

raktaṁ sañcintayeddehaṁ sampūrṇābhroparisthitam|
māsaṣaṭkamanudvigno vītarāgatvasiddhaye||16.27||

स्मरन्संवत्सरे सम्यङ्मृत्युना न प्रपीड्यते।

त्रिभिरब्दैर्जितद्वन्द्वो रागे च समतां व्रजेत्॥ १६.२८॥

smaransaṁvatsare samyaṅmṛtyunā na prapīḍyate|
tribhirabdairjitadvandvo rāge ca samatāṁ vrajet||16.28||

रक्तपद्मस्थितं रक्तं पञ्चपर्वं हृदावधि।

ध्यायन्फलमवाप्नोति पूर्वोक्तमखिलं क्रमात्॥ १६.२९॥

raktapadmasthitaṁ raktaṁ pañcaparvaṁ hṛdāvadhi|
dhyāyanphalamavāpnoti pūrvoktamakhilaṁ kramāt||16.29||

बिम्बादि चात्र पूर्वोक्तमनुचिन्तयतो मुहुः।

फलं भवति निःशेषं रञ्जकावृतिसम्भवम्॥ १६.३०॥

bimbādi cātra pūrvoktamanucintayato muhuḥ|
phalaṁ bhavati niḥśeṣaṁ rañjakāvṛtisambhavam||16.30||

हृदि पद्मं सितं ध्यायेद्व्यष्टपत्रं सकेसरम्।

सर्वामृतमयं दिव्यं चन्द्रकल्पितकर्णिकम्॥ १६.३१॥

hṛdi padmaṁ sitaṁ dhyāyeddvyaṣṭapatraṁ sakesaram|
sarvāmṛtamayaṁ divyaṁ candrakalpitakarṇikam||16.31||

निश्चलं तत्र संयम्य चेतो निद्रान्तमात्मनः।

ततो यत्पश्यते स्वप्ने तथ्यं तत्तस्य जायते॥ १६.३२॥

niścalaṁ tatra saṁyamya ceto nidrāntamātmanaḥ|
tato yatpaśyate svapne tathyaṁ tattasya jāyate||16.32||

एवमभ्यसतस्तस्य तद्धि पद्मोदितं फलम्।

सर्वं प्रजायते तस्य तत्कालक्रमयोगतः॥ १६.३३॥

evamabhyasatastasya taddhi padmoditaṁ phalam|
sarvaṁ prajāyate tasya tatkālakramayogataḥ||16.33||

चतुरङ्गुलदेहादि सर्वत्रैवं विचिन्तयन्।

पूर्ववत्सर्वमाप्नोति विद्यातत्त्वसमुद्भवम्॥ १६.३४॥

caturaṅguladehādi sarvatraivaṁ vicintayan|
pūrvavatsarvamāpnoti vidyātattvasamudbhavam||16.34||

हृदयादेकमेकं तु व्यतिक्रम्यार्धमङ्गुलम्।

पृथक्चक्रत्रयं ध्यायेद्रक्तनीलसितं क्रमात्॥ १६.३५॥

hṛdayādekamekaṁ tu vyatikramyārdhamaṅgulam|
pṛthakcakratrayaṁ dhyāyedraktanīlasitaṁ kramāt||16.35||

तत्रत्यद्व्येकपर्वं तु पुरुषं तत्समद्युतिम्।

बिम्बादिकं च यत्प्रोक्तं तत्त्वत्रयमिदं महत्॥ १६.३६॥

tatratyadvyekaparvaṁ tu puruṣaṁ tatsamadyutim|
bimbādikaṁ ca yatproktaṁ tattvatrayamidaṁ mahat||16.36||

त्रयोदशात्मकं भेदमेतदन्तं विदुर्बुधाः।

एकादशप्रभेदेन तत्त्वद्वयमथोच्यते॥ १६.३७॥

trayodaśātmakaṁ bhedametadantaṁ vidurbudhāḥ|

ekādaśaprabhedena tattvadvayamathocyate||16.37||

कण्ठकूपावधौ चक्रे पञ्चारे नाभिसंस्थितम्।

ध्यायेत्स्वरूपमात्मीयं दीप्तनेत्रोपलब्धवत्॥ १६.३८॥

kaṇṭhakūpāvadhau cakre pañcāre nābhisaṁsthitam|
dhyāyetsvarūpamātmīyaṁ dīptanetropalabdhavat||16.38||

क्षित्यादिकालतत्त्वान्ते यद्वस्तु स्थितमध्वनि।

सर्वं प्रसाध्य योगीन्द्रो न कालेनाभिभूयते॥ १६.३९॥

kṣityādikālatattvānte yadvastu sthitamadhvani|
sarvaṁ prasādhya yogīndro na kālenābhibhūyate||16.39||

बिम्बादिकेऽपि तत्रस्थे योगिनामनुचिन्तिते।

भवतीति किमाश्चर्यमनायासेन तत्फलम्॥ १६.४०॥

bimbādike'pi tatrasthe yogināmanucintite|
bhavatīti kimāścaryamanāyāsena tatphalam||16.40||

कण्ठाकाशे स्थिरं चेतः कुर्वन्योगी दिने दिने।

मायोत्थं फलमाप्नोति बिम्बादावपि तत्रगे॥ १६.४१॥

kaṇṭhākāśe sthiraṁ cetaḥ kurvanyogī dine dine|
māyotthaṁ phalamāpnoti bimbādāvapi tatrage||16.41||

कण्ठकूपविधानाभं राहुग्रस्तेन्दुबिम्बवत्।

चिन्तयन्न पुनर्याति मायादेर्वशवर्तिताम्॥ १६.४२॥

kaṇṭhakūpavidhānābhaṁ rāhugrastendubimbavat|
cintayanna punaryāti māyādervaśavartitām||16.42||

तदेव तत्र स्वर्भानुमुक्तवत्परिचिन्तयन्।

तेजोदेहादिकं चापि प्राप्नोति परमेशताम्॥ १६.४३॥

tadeva tatra svarbhānumuktavatparicintayan|
tejodehādikaṁ cāpi prāpnoti parameśatām||16.43||

मध्यन्दिनकराकारं लम्बकस्थं विचिन्तयेत्।

समस्तमन्त्रचक्रस्य रूपं यत्सामुदायिकम्॥ १६.४४॥

madhyandinakarākāraṁ lambakasthaṁ vicintayet|
samastamantracakrasya rūpaṁ yatsāmudāyikam||16.44||

ततः कालक्रमाद्योगी मन्त्रत्वमधिगच्छति।

अनुषङ्गफलं चात्र पूर्वोक्तं सर्वमिष्यते॥ १६.४५॥

tataḥ kālakramādyogī mantratvamadhigacchati|
anuṣaṅgaphalaṁ cātra pūrvoktaṁ sarvamiṣyate||16.45||

मूर्तिं तत्रैव सञ्चिन्त्य मन्त्रेशत्वमवाप्नुयात्।

तदधो दीपकं तेजो ध्यात्वा तत्पतितां व्रजेत्॥ १६.४६॥

mūrti tatraiva sañcintya mantreśatvamavāpnuyāt|
tadadho dīpakaṁ tejo dhyātvā tatpatitāṁ vrajet||16.46||

सबाह्याभ्यन्तरं तस्मादधोर्ध्वं व्यापि च स्मरन्।

तेजो मन्त्रेश्वरेशानपदान्न च्यवते नरः॥ १६.४७॥

sabāhyābhyantaraṁ tasmādadhordhvaṁ vyāpi ca smaran|
tejo mantreśvareśānapadānna cyavate naraḥ||16.47||

बद्ध्वा पद्मासनं योगी पराबीजमनुस्मरन्।

भ्रुवोर्मध्ये न्यसेच्चित्तं तद्बहिः किञ्चिदग्रतः॥ १६.४८॥

baddhvā padmāsanaṁ yogī parābījamanusmaran|
bhruvormadhye nyaseccittaṁ tadbahiḥ kiñcidagrataḥ||16.48||

निमीलिताक्षो हृष्टात्मा शब्दालोकविवर्जिते।

पश्यते पुरुषं तत्र द्वादशाङ्गुलमायतम्॥ १६.४९॥

nimīlitākṣo hṛṣṭātmā śabdālokavivarjite|
paśyate puruṣaṁ tatra dvādaśāṅgulamāyatam||16.49||

तत्र चेतः स्थिरं कुर्यात्ततो मासत्रयोपरि।

सर्वावयवसम्पूर्णं तेजोरूपमचञ्चलम्॥ १६.५०॥

tatra cetaḥ sthiraṁ kuryāttato māsatrayopari|
sarvāvayavasampūrṇaṁ tejorūpamacañcalam||16.50||

प्रसन्नमिन्दुसङ्काशं पश्यति दिव्यचक्षुषा।

तं दृष्ट्वा पुरुषं दिव्यं कालज्ञानं प्रवर्तते॥ १६.५१॥

prasannamindusaṅkāśaṁ paśyati divyacakṣuṣā|
taṁ dṛṣṭvā puruṣaṁ divyaṁ kālajñānaṁ pravartate||16.51||

अंशिरस्के भवेन्मृत्युः षण्मासाभ्यन्तरेण तु।

वञ्चनं तत्र कुर्वीत यत्नात्कालस्य योगवित्॥ १६.५२॥

aṁśiraske bhavenmṛtyuḥ ṣaṇmāsābhyantareṇa tu|
vañcanaṁ tatra kurvīta yatnātkālasya yogavit||16.52||

ब्रह्मरन्ध्रोपरि ध्यायेच्चन्द्रबिम्बमकल्मषम्।

स्रवन्तममृतं दिव्यं स्वदेहापूरकं बहु॥ १६.५३॥

brahmarandhropari dhyāyeccandrabimbamakalmaṣam|
sravantamamṛtaṁ divyaṁ svadehāpūrakaṁ bahu||16.53||

तेनापूरितमात्मानं चेतोनालानुसर्पिणा।

सबाह्याभ्यन्तरं ध्यायन्दशाहान्मृत्युजिद्भवेत्॥ १६.५४॥

tenāpūritamātmānaṁ cetonālānusarpiṇā|
sabāhyābhyantaraṁ dhyāyandaśāhānmṛtyujidbhavet||16.54||

महाव्याधिविनाशेऽपि योगमेनं समभ्यसेत्।

प्रत्यङ्गव्याधिनाशाय प्रत्यङ्गाङ्गमनुस्मरन्॥ १६.५५॥

mahāvyādhivināśe'pi yogamenaṁ samabhyaset|
pratyaṅgavyādhināśāya pratyaṅgāṅgamanusmaran||16.55||

धूमवर्णं यदा पश्येन्महाव्याधिस्तदा भवेत्।

कृष्णे कुष्ठमवाप्नोति नीले शीतलिकाभयम्॥ १६.५६॥

dhūmavarṇaṁ yadā paśyenmahāvyādhistadā bhavet|

kṛṣṇe kuṣṭhamavāpnoti nīle śītalikābhayam||16.56||

हीनचक्षुषि तद्रोगं नासाहीने तदात्मकम्।

यद्यदङ्गं न पश्येत तत्र तद्व्याधिमादिशेत्॥ १६.५७॥

hīnacakṣuṣi tadrogaṁ nāsāhīne tadātmakam|
yadyadaṅgaṁ na paśyeta tatra tadvyādhimādiśet||16.57||

आत्मनो वा परेषां वा योगी योगपथे स्थितः।

वर्षैस्तु पञ्चभिः सर्वं विद्यातत्त्वान्तमीश्वरि॥ १६.५८॥

ātmano vā pareṣāṁ vā yogī yogapathe sthitaḥ|
varṣaistu pañcabhiḥ sarvaṁ vidyātattvāntamīśvari||16.58||

वेत्ति भुङ्क्ते च सततं न च तस्मात्प्रहीयते।

तत्रस्थे तेजसि ध्याते सर्वदेहविसर्पिणि॥ १६.५९॥

vetti bhuṅkte ca satataṁ na ca tasmātprahīyate|
tatrasthe tejasi dhyāte sarvadehavisarpiṇi||16.59||

पूर्वोक्तं सर्वमाप्नोति तत्कालक्रमयोगतः।

अथोर्ध्वव्यापिनि ध्याने तत्र तस्मादखण्डितः॥ १६.६०॥

pūrvoktaṁ sarvamāpnoti tatkālakramayogataḥ|
athordhvavyāpini dhyāne tatra tasmādakhaṇḍitaḥ||16.60||

सर्वं मन्त्रेश्वरेशत्वान्न भूयोऽपि निवर्तते।

एवं ललाटदेशेऽपि महादीप्तमनुस्मरन्॥ १६.६१॥

sarvaṁ mantreśvareśatvānna bhūyo'pi nivartate|
evaṁ lalāṭadeśe'pi mahādīptamanusmaran||16.61||

प्रपश्यत्यचिरादेव वर्णाष्टकयुतं क्रमात्।

इन्द्रनीलप्रतीकाशं शिखिकण्ठसमद्युति॥ १६.६२॥

prapaśyatyacirādeva varṇāṣṭakayutaṁ kramāt|
indranīlapratīkāśaṁ śikhikaṇṭhasamadyuti||16.62||

राजावर्तनिभं चान्यत्तथा वैदूर्यसन्निभम्।

पुष्परागनिभं चान्यत्प्रवालकसमद्युति॥ १६.६३॥

rājāvartanibhaṁ cānyattathā vaidūryasannibham|
puṣparāganibhaṁ cānyatpravālakasamadyuti||16.63||

पद्मरागप्रतीकाशमन्यच्चन्द्रसमद्युति।

तां दृष्ट्वा परमां ज्योत्स्नां दिव्यज्ञानं प्रवर्तते॥ १६.६४॥

padmarāgapratīkāśamanyaccandrasamadyuti|
tāṁ dṛṣṭvā paramāṁ jyotsnāṁ divyajñānaṁ pravartate||16.64||

विहारपादचारादि ततः सर्वं प्रवर्तते।

अधोर्ध्वं व्यापिनि ध्याते न तस्माच्च्यवते पदात्॥ १६.६५॥

vihārapādacārādi tataḥ sarvaṁ pravartate|
adhordhvaṁ vyāpini dhyāte na tasmāccyavate padāt||16.65||

इत्येतत्सर्वमाख्यातं लक्ष्यभेदव्यवस्थितम्।

अधुना चित्तभेदोऽपि समासादुपदिश्यते॥ १६.६६॥

ityetatsarvamākhyātaṁ lakṣyabhedavyavasthitam|
adhunā cittabhedo'pi samāsādupadiśyate||16.66||

पिशाचानन्तपर्यन्तगुणाष्टकसमीहया।

तत्तद्रूपगुणं कुर्यात्सम्यगीशे स्थिरं मनः॥ १६.६७॥

piśācānantaparyantaguṇāṣṭakasamīhayā|
tattadrūpaguṇaṁ kuryātsamyagīśe sthiraṁ manaḥ||16.67||

इतीश्वरपदान्तस्य मार्गस्यास्य पृथक् पृथक्।

यथोपासा तथाख्याता योगिनां योगसिद्धये॥ १६.६८॥

itīśvarapadāntasya mārgasyāsya pṛthak pṛthak|
yathopāsā tathākhyātā yogināṁ yogasiddhaye||16.68||

इति श्रीमालिनीविजयोत्तरे तन्त्रे धरणाधिकारः षोडशः॥ १६॥

iti śrīmālinīvijayottare tantre dharaṇādhikāraḥ ṣoḍaśaḥ||16||

अथ सप्तदशोऽधिकारः।

atha saptadaśo'dhikāraḥ|

अथैतत्सर्वमुद्दिष्टं यदि न स्फुटतां व्रजेत्।

स्फुटीकृतेऽस्थिरे तत्र न मनस्तिष्ठते स्फुटम्॥ १७.१॥

athaitatsarvamuddiṣṭaṁ yadi na sphuṭatāṁ vrajet|
sphuṭīkṛtē:'sthirē tatra na manastiṣṭhatē sphuṭam||17.1||

गतिभङ्गं ततस्तस्य प्राणायामेन कारयेत्।

स च पञ्चविधः प्रोक्तः पूरकादिप्रभेदतः॥ १७.२॥

gatibhaṅgaṁ tatastasya prāṇāyāmena kārayet|
sa ca pañcavidhaḥ proktaḥ pūrakādiprabhedataḥ||17.2||

पूरकः कुम्भकश्चैव रेचको ह्यपकर्षकः।

उत्कर्षः पञ्चमो ज्ञेयस्तदभ्यासाय योगिभिः॥ १७.३॥

pūrakaḥ kumbhakaścaiva recako hyapakarṣakaḥ|
utkarṣaḥ pañcamo jñeyastadabhyāsāya yogibhiḥ||17.3||

पूरकः पूरणाद्वायोर्द्वेधा षोढा च गीयते।

स्वभावपूरणादेको विरेच्यान्यः प्रपूरितः॥ १७.४॥

pūrakaḥ pūraṇādvāyordvedhā ṣoḍhā ca gīyate|
svabhāvapūraṇādeko virecyānyaḥ prapūritaḥ||17.4||

नासामुखोर्ध्वतालूनां रन्ध्रभेदाद्विभिद्यते।

भिन्नः षोढात्वमभ्येति पुनर्भेदैरनन्तताम्॥ १७.५॥

nāsāmukhordhvatālūnāṁ randhrabhedādvibhidyate|
bhinnaḥ ṣoḍhātvamabhyeti punarbhedairanantatām||17.5||

कुम्भः पञ्चविधो ज्ञेयस्तत्रैकः पूरितादनु।
विधृतो रेचकात्पश्चाद्द्वितीयः परिकीर्तितः॥ १७.६ ॥
kumbhaḥ pañcavidhō jñēyastatraikaḥ pūritādanu|
vidhṛto recakātpaścāddvitīyaḥ parikīrtitaḥ||17.6||

द्वयोरन्ते द्वयं चान्यत्स्वभावस्थश्च पञ्चमः।
स्थानान्तरप्रभेदेन गच्छत्येषोऽप्यनन्तताम्॥ १७.७॥
dvayorante dvayaṁ cānyatsvabhāvasthaśca pañcamaḥ|
sthānāntaraprabhedena gacchatyeṣo'pyanantatām||17.7||

रेचकः पूर्ववज्ज्ञेयो द्विधाभूतः षडात्मकः।
स्थानसंस्तम्भितो वायुस्तस्मादुत्कृष्य नीयते॥ १७.८॥
recakaḥ pūrvavajjñeyo dvidhābhūtaḥ ṣaḍātmakaḥ|
sthānasaṁstambhito vāyustasmādutkṛṣya nīyate||17.8||

योऽन्यप्रदेशसंप्राप्त्यै स उत्कर्षक इष्यते।
तस्मादपि पुनः स्थानं यतो नीतस्तदाहृतः॥ १७.९॥
yō:'nyapradēśasamprāptyai sa utkarṣaka iṣyatē|
tasmādapi punaḥ sthānaṁ yato nītastadāhṛtaḥ||17.9||

अपकर्षक इत्युक्तो द्वावप्येतावनेकधा।
एषामभ्यसनं कुर्यात्पद्मकाद्यासनस्थितः॥ १७.१०॥
apakarṣaka ityukto dvāvapyetāvanekadhā|
eṣāmabhyasanaṁ kuryātpadmakādyāsanasthitaḥ||17.10||

अधमः सकृदुद्घातो मध्यमो द्विगुणो मतः।
ज्येष्ठः स्याद्यस्त्रिरुद्घातः स च द्वादशमात्रकः॥ १७.११॥
adhamaḥ sakr̥dudghātō madhyamō dviguṇō mataḥ|
jyeṣṭhaḥ syādyastrirudghātaḥ sa ca dvādaśamātrakaḥ||17.11||

त्रिर्जानुवेष्टनान्मात्रा त्रिगुणाच्छोटिकात्रयात्।

अजितां नाक्रमेन्मात्रां वायुदोषनिवृत्तये॥ १७.१२॥

trirjānuveṣṭanānmātrā triguṇachoṭikātrayāt|
ajitāṁ nākramenmātrāṁ vāyudoṣanivṛttaye||17.12||

प्रत्यङ्गधारणाद्वायुं न च चक्षुषि धारयेत्।

नाभिहृत्तालुकान्तस्थे विधृते मरुति क्रमात् ॥ १७.१३॥

pratyaṅgadhāraṇādvāyuṁ na ca cakṣuṣi dhārayet|
nābhihṛttālukāntasthē vidhṛtē maruti kramāt ||17.13||

चतस्रो धारणा ज्ञेयाः शिख्यम्ब्वीशामृतात्मिकाः।

यद्यत्र चिन्तयेद्द्रव्यं तत्तत्सर्वगतं स्मरेत्॥ १७.१४॥

catasro dhāraṇā jñeyā śikhyamvvīśāmṛtātmikāḥ|
yadyatra cintayeddravyaṁ tattatsarvagataṁ smaret||17.14||

अमृतायां स्मरेदिन्दुं कालत्यागोक्तवर्त्मना।

अमृतायाः स्मरेदिन्दुं कालत्यागोक्तवर्त्मना॥ १७.१५॥

bindunādātmakaṁ rūpamīśānīṁ dhāraṇāṁ śritam|
amṛtāyāḥ smaredinduṁ kālatyāgoktavartmanā||17.15||

धारणाभिरिहैताभिर्योगी योगपथे स्थितः।

हेयं वस्तु परित्यज्य यायात्पदमनामयम्॥ १७.१६॥

dhāraṇābhirihaitābhiryogī yogapathe sthitaḥ|
hēyaṁ vastu parityajya yāyātpadamanāmayam||17.16||

त्रिवेदद्वीन्दुसङ्ख्यातसमुद्घातास्त्विमा मताः।

एताभिरप्यधोऽप्युक्तं फलं प्राप्नोत्यनुत्तमम्॥ १७.१७॥

trivedadbīndusaṅkhyātasamudghātāstvimā matāḥ|
etābhirapyadho'pyuktaṁ phalaṁ prāpnotyanuttamam||17.17||

योगाङ्गत्वे समानेऽपि तर्को योगाङ्गमुत्तमम्।

हेयाद्यालोचनात्तस्मात्तत्र यत्नः प्रशस्यते॥ १७.१८॥

yogāṅgatve samāne'pi tarko yogāṅgamuttamam|

heyādyālocanā tasmāttatra yatnaḥ praśasyate||17.18||

मार्गे चेतः स्थिरीभूतं हेयेऽपि विषयेच्छया।
प्रेर्यं तेनानयेत्तावद्यावत्पदमनामयम्॥ १७.१९॥
mārge cetaḥ sthirībhūte heye'pi viṣayecchayā|
preryaṁ tenānayettāvadyāvatpadamanāmayam||17.19||

तदर्थभावनायुक्तं मनो ध्यानमुदाहृतम्।
तदेव परमं ज्ञानं भावनामयमिष्यते॥ १७.२०॥
tadarthabhāvanāyuktaṁ manodhyānamudāhṛtam|
tadeva paramaṁ jñānaṁ bhāvanāmayamiṣyate||17.20||

मुहूर्तादेव तत्रस्थः समाधिं प्रतिपद्यते।
तत्रापि च सुनिष्पन्ने फलं प्राप्नोत्यभीप्सितम्॥ १७.२१॥
muhūrtādeva tatrasthaḥ samādhiṁ pratipadyate|
tatrāpi ca suniṣpanne phalaṁ prāpnotyabhīpsitam||17.21||

यत्किंचिच्चिन्तयेद्वस्तु नान्यत्वं प्रतिपद्यते।
तेन तन्मयतामाप्य भवेत्पश्चादभाववत्॥ १७.२२॥
yatkiñciccintayedvastu nānyatvaṁ pratipadyate|
tena tanmayatāmāpya bhavetpaścādabhāvavat||17.22||

पञ्चतामिव संप्राप्तस्तीव्रैरपि न चाल्यते।
ततः शब्दादिभिर्योगी योगिनीकुलनन्दनः॥ १७.२३॥
pañcatāmiva samprāptastīvrairapi na cālyatē|
tataḥ śabdādibhiryōgī yōginīkulanandanaḥ||17.23||

इत्यनेन विधानेन प्रत्याहृत्य मनो मुहुः।
प्राणायामादिकं सर्वं कुर्याद्योगप्रसिद्धये॥ १७.२४॥
ityanena vidhānena pratyāhṛtya mano muhuḥ|
prāṇāyāmādikaṁ sarvaṁ kuryādyogaprasiddhaye||17.24||

सर्वमप्यथवा भोगं मन्यमानो विरूपकम्।

स्वशरीरं परित्यज्य शाश्वतं पदमृच्छति॥ १७.२५॥

sarvamapyathavā bhogaṁ manyamāno virūpakam|
svaśarīraṁ parityajya śāśvataṁ padamṛcchati||17.25||

तदा पूर्वोदितं न्यासं कालानलसमप्रभम्।

विपरीतविधानेन कुर्यात्स्कृक्छिन्दियुग्गतम्॥ १७.२६ ॥

tadā pūrvoditaṁ nyāsaṁ kālānalasamaprabham|
viparītavidhānēna kuryātskr̥kchindiyuggatam||17.26||

आग्नेयीं धारणां कृत्वा सर्वमर्मप्रतापिनीम्।

पूरयेद्वायुना देहमङ्गुष्ठान्मस्तकान्तिकम्॥ १७.२७॥

āgneyīṁ dhāraṇāṁ kṛtvā sarvamarmapratāpinīm|
pūrayedvāyunā dehamaṅguṣṭhānmastakāntikam||17.27||

तमुत्कृष्य ततोऽङ्गुष्ठाद्ब्रह्मरन्ध्रान्तमानयेत्।

छेदयेत्सर्वमर्माणि मन्त्रेणानेन योगवित्॥ १७.२८॥

tamutkṛṣya tato'ṅguṣṭhādbrahmarandhrāntamānayet|
chēdayētsarvamarmāṇi mantrēṇānēna yōgavit ||17.28||

जीवमादिद्विजारूढं शिरोमालादिसंयुतम्।

कृत्वा तदग्रे कुर्वीत द्विजमाद्यमजीवकम्॥ १७.२९॥

jīvamādidvijārūḍhaṁ śiromālādisaṁyutam|
kṛtvā tadagre kurvīta dvijamādyamajīvakam||17.29||

इत्येषा कथिता काल रात्रिर्मर्मनिकृन्तनी।

नैनां समुच्चरेद्देवि य इच्छेद्दीर्घजीवितम्॥ १७.३०॥

ityēṣā kathitā kāla rātrirmarmanikr̥ntanī|
naināṁ samuccareddevi ya iccheddīrghajīvitam||17.30||

शतार्धोच्चारयोगेन जायते मूर्ध्नि वेदना।

एवं प्रत्ययमालोच्य मृत्युजिद्ध्यानमाश्रयेत्॥ १७.३१॥

śatārdhoccārayogena jāyate mūrdhni vedanā|
evaṁ pratyayamālocya mṛtyujiddhyānamāśrayet||17.31||

निपीड्य तं ततस्तत्र बिन्दुनादादिचिन्तकः।

वेगादुत्कृष्य तत्रस्थं कालरात्र्या विसर्जयेत्॥ १७.३२ ॥

nipīḍya taṁ tatastatra bindunādādicintakaḥ|
vegādutkṛṣya tatrasthaṁ kālarātryā visarjayet||17.32||

अनेन क्रमयोगेन अने योजितः परमे पदे।

समय्यपि महादेवि दीक्षोक्तं फलमश्नुते॥ १७.३३॥

anena kramayogena ane yojitaḥ parame pade|
samayyapi mahādevi dīkṣoktaṁ phalamaśnute||17.33||

[लचुन] सिद्धयोगेश्वरीमते।

तत्सकाशाद्भवेत्सिद्धिः सर्वमन्त्रोक्तलक्षणा॥ १७.३४॥

[*lacuna*] siddhayogeśvarī mate|
tatsākāśād bhavēt siddhiḥ sarvamantroktalakṣaṇā||17.34||

तदेव मन्त्ररूपेण मनुष्यैः समुपास्यते|

एष ते ज्ञेयसद्भावः कथितः सुरवन्दिते॥ १७.३५॥

tadeva mantrarūpeṇa manuṣyaiḥ samupāsyate|
eṣa tē jñēyasadbhāvaḥ kathitaḥ suravanditē||17.35||

अभक्तस्य गुहस्यापि नाख्येयो जातुचित्त्वया।

उदरं सर्वमापूर्य ब्रह्मरन्ध्रान्तमागतम्॥ १७.३६॥

abhaktya guhasyāpi nākhyēyo jātu cittvayā|
udaraṁ sarvamāpūrya brahmarandhrāntamāgatam||17.36||

वायुं भ्रमणयोगेन ततस्तं प्रेरयेत्तथा।

यावत्प्राणप्रदेशान्तं योगिनां मनसेप्सितम् ॥ १७.३७॥

vāyuṁ bhramaṇayōgēna tatastaṁ prērayēt tathā

yāvatprāṇapradeśāntaṁ yogināṁ manasēpsitam||17.37||

प्राप्यते पुनरावृत्य तथैव नाभिमण्डलम्।

एवं समभ्यसेत्तावद्यावद्वासरसप्तकम्॥ १७.३८॥

prāpyatē punarāvṛtya tathāiva nābhimaṇḍalam|
evaṁ samabhyasēttāvadyāvadvāsarasaptakam||17.38||

तदाप्रभृति संयुक्तः कर्षयेत्त्रिदशानपि।

अनेनाकृष्य विज्ञानं सर्वयोगिनिषेवितम्॥ १७.३९॥

tadāprabhṛti saṁyuktaḥ karṣayēt tridaśānapi|
anenākṛṣya vijñānaṁ sarvayoginiṣēvitam||17.39||

गृह्णीयाद्योगयुक्तात्मा किमन्यैः क्षुद्रशासनैः।

प्रथमं महती घूर्णिरभ्यासात्तस्य जायते॥ १७.४०॥

gṛhṇīyād yōgayuktātmā kimanyaiḥ kṣudraśāsanaiḥ|
prathamaṁ mahatī ghūrṇir abhyāsāt tasya jāyatē||17.40||

ततः प्रकम्पो देवेशि ज्वलतीव ततोऽप्यणुः।

tataḥ prakampaḥ dēvēśi jvalatīva tatō'pyaṇuḥ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे सप्तदशो योगाङ्गाधिकारः समाप्तः॥ १७॥

iti śrīmālinīvijayottarē tantrē saptadaśō yōgāṅgādhikāraḥ samāptaḥ||17||

# परमविद्याधिकारः अष्टादशः १८॥

अथ अष्टादशोऽधिकारः।
atha aṣṭādaśo'dhikāraḥ|

श्रृणु देवि परं गुह्यमप्राप्यमकृतात्मनाम्।
यन्न कस्यचिदाख्यातं तदद्य कथयामि ते॥ १८.१॥
śṛṇu devi paraṁ guhyamaprāpyamakṛtātmanām|
yanna kasyacidākhyātaṁ tadadya kathayāmi te||18.1||

सर्वमन्यत्परित्यज्य चित्तमत्र निवेशयेत्।
मृच्छैलधातुरत्नादिभवं लिङ्गं न पूजयेत्॥ १८.२॥
sarvamanyatparityajya cittamatra niveśayet|
mṛchailadhāturatnādibhavaṁ liṅgaṁ na pūjayet||18.2||

यजेदाध्यात्मिकं लिङ्गं यत्र लीनं चराचरम्।
बहिर्लिङ्गस्य लिङ्गत्वमनेनाधिष्ठितं यतः॥ १८.३॥
yajedādhyātmikaṁ liṅgaṁ yatra līnaṁ carācaram|
bahirliṅgasya liṅgatvamanenādhiṣṭhitaṁ yataḥ||18.3||

अतः प्रपूजयेदेतत्परमाद्वैतमाश्रितः।
अनुध्यानेन देवेशि परेण परमाणुना॥ १८.४॥
ataḥ prapūjayedetatparamādvaitamāśritaḥ|
anudhyānena deveśi pareṇa paramāṇunā||18.4||

योऽनुध्यातः स एवैतल्लिङ्गं पश्यति नापरः।
यदेतत्स्पन्दनं नाम हृदये समवस्थितम्॥ १८.५॥
yo'nudhyātaḥ sa evaitalliṅgaṁ paśyati nāparaḥ|
yadetatspandanaṁ nāma hṛdaye samavasthitam||18.5||

तत्र चित्तं समाधाय कम्प उद्भव एव च।

तत्र प्रशान्तिमापन्ने मासेनैकेन योगवित्॥ १८.६ ॥

tatra cittaṁ samādhāya kampa udbhava eva ca|
tatra praśāntimāpanne māsenaikena yogavit||18.6||

हृदयादुत्थितं लिङ्गं ब्रह्मरन्ध्रान्तमीश्वरि।

स्वप्रमोद्योतिताशेषदेहान्तममलद्युति॥ १८.७॥

hṛdayādutthitaṁ liṅgaṁ brahmarandhrāntamīśvari|
svapramoddyotitāśeṣadehāntamamaladyuti||18.7||

तत्रैव पश्यते सर्वं मन्त्रजालं महामतिः।

तन्मस्तकं समारुह्य मासमात्रमनन्यधीः॥ १८.८॥

tatraiva paśyate sarvaṁ mantrajālaṁ mahāmatiḥ|
tanmastakaṁ samāruhya māsamātramananyadhīḥ||18.8||

ततस्तत्र सुनिष्पन्ने षण्मासात्सर्वसिद्धयः।

एतल्लिङ्गमविज्ञाय यो लिङ्गी लिङ्गमाश्रयेत्॥ १८.९ ॥

tatastatra suniṣpanne ṣaṇmāsātsarvasiddhayaḥ|
etalliṅgamavijñāya yo liṅgī liṅgamāśrayet||18.9||

वृथा परिश्रमस्तस्य न लिङ्गफलमश्नुते।

शैवमेतन्महालिङ्गमात्मलिङ्गे [न] सिद्ध्यति॥ १८.१०॥

vṛthā pariśramastasya na liṅgaphalamaśnute|
śaivametanmahāliṅgamātmaliṅge [na] siddhyati||18.10||

सिद्धेऽत्र लिङ्गवल्लिङ्गी लिङ्गस्थो लिङ्गवर्जितः।

भवतीति किमाश्चर्यमेतस्माल्लिङ्गलिङ्गितः॥ १८.११ ॥

siddhe'tra liṅgavalliṅgī liṅgastho liṅgavarjitaḥ|
bhavatīti kimāścaryametasmālliṅgaliṅgitaḥ||18.11||

अनेन लिङ्गलिङ्गेन यदा योगी बहिर्व्रजेत्।

तदा लिङ्गीति विज्ञेयः पुरान्तं लिङ्गमिष्यते॥ १८.१२॥

anena liṅgaliṅgena yadā yogī bahirvrajet|
tadā liṅgīti vijñeyaḥ purāntaṁ liṅgamiṣyate||18.12||

एतस्माल्लिङ्गविज्ञानाद्योगिनो लिङ्गिताः स्मृताः।
अनेनाधिष्ठिताः मन्त्राः शान्तरौद्रादिभेदतः॥ १८.१३॥

etasmālliṅgavijñānādyogino liṅgitāḥ smṛtāḥ|
anenādhiṣṭhitāḥ mantrāḥ śāntaraudrādibhedataḥ||18.13||

भवन्तीति किमाश्चर्यं तद्भावगतचेतसः।
रौद्रं भावं समाश्रित्य यदि योगं समभ्यसेत्॥ १८.१४॥

bhavantīti kimāścaryaṁ tadbhāvagatacetasaḥ|
raudraṁ bhāvaṁ samāśritya yadi yogaṁ samabhyaset||18.14||

दुर्निरीक्ष्यो भवेत्सर्वैः सदेवासुरमानुषैः।
गमागमविनिर्मुक्तः सर्वदृष्टिरकातरः॥ १८.१५॥

durnirīkṣyo bhavetsarvaiḥ sadevāsuramānuṣaiḥ|
gamāgamavinirmuktaḥ sarvadṛṣṭirakātaraḥ||18.15||

मुहूर्तं तिष्ठते यावत्तावदेवेशमाप्नुयात्।
आविष्टः पश्यते सर्वं सूर्यकोटिसमद्युति॥ १८.१६॥

muhūrtaṁ tiṣṭhate yāvattāvadeveśamāpnuyāt|
āviṣṭaḥ paśyate sarvaṁ sūryakoṭisamadyuti||18.16||

यत्तदक्षरमव्यक्तं शैवं भैरवमित्यपि।
तं दृष्ट्वा वत्सरार्धेन योगी सर्वज्ञतामियात्॥ १८.१७॥

yattadakṣaramavyaktaṁ śaivaṁ bhairavamityapi|
taṁ dṛṣṭvā vatsarārdhena yogī sarvajñatāmiyāt||18.17||

य एवैनं समासाद्य यस्तृप्तिमधिगच्छति।
न च कृत्रिमयोगेषु स मुक्तः सर्वबन्धनैः॥ १८.१८॥

ya evainaṁ samāsādya yastṛptimadhigacchati|

na ca kṛttrimayogeṣu sa muktaḥ sarvabandhanaiḥ||18.18||

प्राणायामादिकैर्लिङ्गैर्योगाः स्युः कृत्रिमा मताः।
तेन तेऽकृतकस्यास्य कलां नार्हन्ति षोडशीम्॥ १८.१९॥
prāṇāyāmādikairliṅgairyogāḥ syuḥ kṛtrimā matāḥ|
tena te'kṛtakasyāsya kalāṁ nārhanti ṣoḍaśīm||18.19||

एतत्समभ्यसन्योगी दिव्यचिह्नानि पश्यति।
उपविष्ट ऋजुर्योगी न किञ्चिदपि चिन्तयेत्॥ १८.२०॥
etatsamabhyasanyogī divyacihnāni paśyati|
upaviṣṭa ṛjuryogī na kiñcidapi cintayet||18.20||

मुहूर्तान्निर्दहेत्सर्वं देहस्थमकृतं कृतम्।
दह्यमानस्य तस्येह प्रकम्पानुभवो भवेत्॥ १८.२१॥
muhūrtānnirdahetsarvaṁ dehasthamakṛtaṁ kṛtam|
dahyamānasya tasyeha prakampānubhavo bhavet||18.21||

ततस्तत्र स्थिरीभूते ज्योतिरन्तः प्रकाशते।
तां दृष्ट्वा परमां दीप्तिं दिव्यज्ञानं प्रवर्तते॥ १८.२२॥
tatastatra sthirībhūte jyotirantaḥ prakāśate|
tāṁ dṛṣṭvā paramāṁ dīptiṁ divyajñānaṁ pravartate||18.22||

स्वतन्त्रशिवतामेति भुञ्जानो विषयानपि।
अनिमीलितदिव्याक्षो यावदास्ते मुहूर्तकम्॥ १८.२३॥
svatantraśivatāmeti bhuñjāno viṣayānapi|
animīlitadivyākṣo yāvadāste muhūrtakam||18.23||

तस्मात्सर्वगतं भावमात्मनः प्रतिपद्यते।
तमेव भावयेद्यत्नात्सर्वसिद्धिफलेप्सया॥ १८.२४॥
tasmātsarvagataṁ bhāvamātmanaḥ pratipadyate|
tameva bhāvayedyatnātsarvasiddhiphalepsayā||18.24||

ततस्तं भावयेद्योगी कम्पमानोऽत्यनुल्वणम्।

ततः प्रपश्यते तेजो ललाटाग्रे समन्ततः॥ १८.२५॥

tatastaṁ bhāvayedyogī kampamāno'tyanulvaṇam|
tataḥ prapaśyate tejo lalāṭāgre samantataḥ||18.25||

दृष्ट्वा तत्परमं तेजो दिव्यज्ञानमवाप्नुयात्।

षड्भिर्मासैरनायासाद्वत्सरेण प्रसिध्यति॥ १८.२६॥

dṛṣṭvā tatparamaṁ tejo divyajñānamavāpnuyāt|
ṣaḍbhirmāsairanāyāsādvatsareṇa prasiddhyati||18.26||

शिवतुल्यबलो भूत्वा यत्रेष्टं तत्र गच्छति।

चेतः सर्वगतं कृत्वा मुहूर्तादेव योगवित्॥ १८.२७॥

śivatulyabalo bhūtvā yatreṣṭaṁ tatra gacchati|
cetaḥ sarvagataṁ kṛtvā muhūrtādeva yogavit||18.27||

शक्त्यावेशमवाप्नोति प्रकम्पानुभवात्मकम्।

ततस्तत्र स्थिरीभूते मासमात्रेण योगवित्॥ १८.२८॥

śaktyāveśamavāpnoti prakampānubhavātmakam|
tatastatra sthirībhūte māsamātreṇa yogavit||18.28||

शाक्तं प्रपश्यते तेजः सबाह्याभ्यन्तरे स्थिरम्।

तत्र सम्यक् सुनिष्पन्ने सर्वेन्द्रियजमादरात्॥ १८.२९॥

śāktaṁ prapaśyate tejaḥ sabāhyābhyantare sthiram|
tatra samyak suniṣpanne sarvendriyajamādarāt||18.29||

तत्र स्फुटमवाप्नोति विज्ञानमनिवारितम्।

सर्वगं चात्र विज्ञेयं यदक्षार्थेन सङ्गतम्॥ १८.३०॥

tatra sphuṭamavāpnoti vijñānamanivāritam|
sarvagaṁ cātra vijñeyaṁ yadakṣārthena saṅgatam||18.30||

एकमेवेदमाख्यातं तत्त्वं पर्यायभेदतः।

कर्मेन्द्रियाणि बुध्यन्तं परित्यज्य समस्तकम्॥ १८.३१॥

ekamevedamākhyātaṁ tattvaṁ paryāyabhedataḥ|
karmendriyāṇi buddhyantaṁ parityajya samastakam||18.31||

भावयेत्परमां शक्तिं सर्वत्रैव विचक्षणः।

निश्चलं तु मनः कृत्वा यावत्तन्मयतां गतः॥ १८.३२॥

bhāvayetparamāṁ śaktiṁ sarvatraiva vicakṣaṇaḥ|
niścalaṁ tu manaḥ kṛtvā yāvattanmayatāṁ gataḥ||18.32||

तावत्सर्वगतं भावं क्षणमात्रात्प्रपद्यते।

निर्दह्य पाशजालानि यथेष्टं फलमाप्नुयात्॥ १८.३३॥

tāvatsarvagataṁ bhāvaṁ kṣaṇamātrātprapadyate|
nirdahya pāśajālāni yatheṣṭaṁ phalamāpnuyāt||18.33||

तस्मात्समभ्यसेदेनं कृत्वा निश्चयमात्मनः।

यत्राधारविनिर्मुक्तो जीवो लयमवाप्स्यति॥ १८.३४॥

tasmātsamabhyasedenaṁ kṛtvā niścayamātmanaḥ|
yatrādhāravinirmukto jīvo layamavāpsyati||18.34||

तत्स्थानं सर्वमन्त्राणामुत्पत्तिक्षेत्रमिष्यते।

द्विविधं तत्परिज्ञेयं बाह्याभ्यन्तरभेदतः॥ १८.३५॥

tatsthānaṁ sarvamantrāṇāmutpattikṣetramiṣyate|
dvividhaṁ tatparijñeyaṁ bāhyābhyantarabhedataḥ||18.35||

प्रयातव्याधिका मात्रा सा ज्ञेया सर्वसिद्धिदा।

अथवा गच्छतस्तस्य स्वप्नवृत्त्या विचक्षणः॥ १८.३६॥

prayātavyādhikā mātrā sā jñeyā sarvasiddhidā|
athavā gacchatastasya svapnavṛttyā vicakṣaṇaḥ||18.36||

निरोधं मध्यमे स्थाने कुर्वीत क्षणमात्रकम्।

पश्यते तत्र चिच्छक्तिं तुटिमात्रामखण्डिताम्॥ १८.३७॥

nirodhaṁ madhyame sthāne kurvīta kṣaṇamātrakam|

paśyate tatra cicchaktiṁ tuṭimātrāmakhaṇḍitām||18.37||

तदेव परमं तत्त्वं तस्माज्जातमिदं जगत्।
स एव मन्त्रदेहस्तु सिद्धयोगीश्वरीमते॥ १८.३८॥
tadeva paramaṁ tattvaṁ tasmājjātamidaṁ jagat|
sa eva mantradehastu siddhayogīśvarīmate||18.38||

तेनैवालिङ्गिता मन्त्राः सर्वसिद्धिफलप्रदाः।
ईषद्व्यावृत्तवर्णस्तु हेयोपादेयवर्जितः॥ १८.३९॥
tenaivāliṅgitā mantrāḥ sarvasiddhiphalapradāḥ|
īṣadvyāvṛttavarṇastu heyopādeyavarjitaḥ||18.39||

यां संवित्तिमवाप्नोति शिवतत्त्वं तदुच्यते।
तत्र चित्तं स्थिरीकुर्वन्सर्वज्ञत्वमवाप्नुयात्॥ १८.४०॥
yāṁ saṁvittimavāpnoti śivatattvaṁ taducyate|
tatra cittaṁ sthirīkurvansarvajñatvamavāpnuyāt||18.40||

तत्रैव दिव्यचिह्नानि पश्यते च न संशयः।
यत्रैव कुत्रचिद्गात्रे विकार उपजायते॥ १८.४१॥
tatraiva divyacihnāni paśyate ca na saṁśayaḥ|
yatraiva kutracidgātre vikāra upajāyate||18.41||

सङ्कल्पपूर्वको देवि तत्तत्त्वं तत्त्वमुत्तमम्।
तदभ्यसेन्महायोगी सर्वज्ञत्वजिगीषया॥ १८.४२॥
saṅkalpapūrvako devi tattattvaṁ tattvamuttamam|
tadabhyasenmahāyogī sarvajñatvajigīṣayā||18.42||

प्राप्नोति परमं स्थानं भुक्त्वा सिद्धिं यथेप्सिताम्।
गन्धपुष्पादिभिर्योगी नित्यमात्मानमादरात्॥ १८.४३॥
prāpnoti paramaṁ sthānaṁ bhuktvā siddhiṁ yathepsitām|
gandhapuṣpādibhiryogī nityamātmānamādarāt||18.43||

ब्रह्मरन्ध्रप्रदेशे तु पूजयेद्भावतोऽपि वा।

द्रवद्द्रव्यसमायोगात्स्नपनं तस्य जायते॥ १८.४४॥

brahmarandhrapradeśe tu pūjayedbhāvato'pi vā|
dravaddravyasamāyogātsnapanaṁ tasya jāyate||18.44||

गन्धपुष्पादिगन्धस्य ग्रहणं यजनं मतम्।

षड्रसास्वादनं तस्य नैवेद्याय प्रकल्पते॥ १८.४५॥

gandhapuṣpādigandhasya grahaṇaṁ yajanaṁ matam|
ṣaḍrasāsvādanaṁ tasya naivedyāya prakalpate||18.45||

यमेवोच्चारयेद्वर्णं स जपः परिकीर्तितः।

तत्र चेतः समाधाय दह्यमानस्य वस्तुनः॥ १८.४६॥

yamevoccārayedvarṇaṁ sa japaḥ parikīrtitaḥ|
tatra cetaḥ samādhāya dahyamānasya vastunaḥ||18.46||

ज्वालान्तस्तिष्ठते यावत्तावद्धोमः कृतो भवेत्।

यदेव पश्यते रूपं तदेव ध्यानमिष्यते॥ १८.४७॥

jvālāntastiṣṭhate yāvattāvaddhomaḥ kṛto bhavet|
yadeva paśyate rūpaṁ tadeva dhyānamiṣyate||18.47||

प्रसङ्गादिदमुद्दिष्टमद्वैतयजनं महत्।

उदयार्कसमाभासमूर्द्धद्वारे मनः स्थिरम्॥ १८.४८॥

prasaṅgādidamuddiṣṭamadvaitayajanaṁ mahat|
udayārkasamābhāsamūrddhvadvāre manaḥ sthiram||18.48||

हृदि वा तत्तथा कुर्याद्द्वादशान्तेऽथ वाप्नुयात्।

ततो मासार्धमात्रेण तद्रूपमुपलभ्यते॥ १८.४९॥

hṛdi vā tattathā kuryāddvādaśānte'tha vāpnuyāt|
tato māsārdhamātreṇa tadrūpamupalabhyate||18.49||

उपलब्धं तदभ्यस्य सर्वज्ञत्वाय कल्पते।

वस्त्रेण मुखमाच्छाद्य योगी लक्ष्ये नियोजयेत्॥ १८.५०॥

upalabdhaṁ tadabhyasya sarvajñatvāya kalpate|
vastreṇa mukhamācchādya yogī lakṣye niyojayet||18.50||

नाभिकन्दादधस्तात्तु यावत्तत्त्वं शिखावधि।
सूक्ष्मतारकसङ्काशं रश्मिज्वालाकरालितम्॥ १८.५१॥

nābhikandādadhastāttu yāvattattvaṁ śikhāvadhi|
sūkṣmatārakasaṅkāśaṁ raśmijvālākarālitam||18.51||

प्राणशक्त्यवसाने तु पश्यते रूपमात्मनः।
तदेवाभ्यसतो देवि विकासमुपगच्छति॥ १८.५२॥

prāṇaśaktyavasāne tu paśyate rūpamātmanaḥ|
tadevābhyasato devi vikāsamupagacchati||18.52||

तन्मुखं सर्वमन्त्राणां सर्वतन्त्रेषु पठ्यते।
ततोऽस्य मासमात्रेण काचित्संवित्तिरिष्यते॥ १८.५३॥

tanmukhaṁ sarvamantrāṇāṁ sarvatantreṣu paṭhyate|
tato'sya māsamātreṇa kācitsaṁvittiriṣyate||18.53||

यतः सर्वं विजानाति हृदये संव्यवस्थितम्।
तां ज्ञात्वा कस्यचिद्योगी न सम्यक्प्रतिपादयेत्॥ १८.५४॥

yataḥ sarvaṁ vijānāti hṛdaye saṁvyavasthitam|
tāṁ jñātvā kasyacidyogī na samyakpratipādayet||18.54||

अध्यायात्कथनं कुर्यान्नाकाले मृत्युमाप्नुयात्।
मृतोऽपि श्वभ्रसङ्घाते क्रमेण परिपच्यते॥ १८.५५॥

adhyāyātkathanaṁ kuryānnākāle mṛtyumāpnuyāt|
mṛto'pi śvabhrasaṅghāte krameṇa paripacyate||18.55||

एवं ज्ञात्वा महादेवि स्वहितं समुपार्जयेत्।
शिष्योऽप्यन्यायतो गृह्णन्नरकं प्रतिपद्यते॥ १८.५६॥

evaṁ jñātvā mahādevi svahitaṁ samupārjayet|

śiṣyo'pyanyāyato gṛhṇannarakaṁ pratipadyate||18.56||

न च तत्कालमाप्नोति वचस्त्ववितथं मम।

न्यायेन ज्ञानमासाद्य पश्चान्न प्रतिपद्यते॥ १८.५७॥

na ca tatkālamāpnoti vacastvavitathaṁ mama|
nyāyena jñānamāsādya paścānna pratipadyate||18.57||

तदा तस्य प्रकुर्वीत विज्ञानापहृतिं बुधः।

ध्यात्वा तमग्रतः स्थाप्य स्वरूपेणैव योगवित्॥ १८.५८॥

tadā tasya prakurvīta vijñānāpahṛtiṁ budhaḥ|
dhyātvā tamagrataḥ sthāpya svarūpeṇaiva yogavit||18.58||

षड्विधं विन्यसेन्मार्गं तस्य देहे पुरोक्तवत्।

ततस्तं दीपमालोक्य तदङ्गुष्ठाग्रतः क्रमात्॥ १८.५९॥

ṣaḍvidhaṁ vinyasenmārgaṁ tasya dehe puroktavat|
tatastaṁ dīpamālokya tadaṅguṣṭhāgrataḥ kramāt||18.59||

नयेत्तेजः समाहृत्य द्वादशान्तमनन्यधीः।

ततस्तं तत्र सञ्चिन्त्य शिवेनैकत्वमागतम्॥ १८.६०॥

nayettejaḥ samāhṛtya dvādaśāntamananyadhīḥ|
tatastaṁ tatra sañcintya śivenaikatvamāgatam||18.60||

तत्र ध्यायेत्तमोरूपं तिरोभावनशीलनम्।

पतन्तीं तेन मार्गेण ह्यङ्गुष्ठाग्रान्तमागताम्॥ १८.६१॥

tatra dhyāyettamorūpaṁ tirobhāvanaśīlanam|
patantīṁ tena mārgeṇa hyaṅguṣṭhāgrāntamāgatām||18.61||

सबाह्याभ्यन्तरं ध्यायेन्निविडाञ्जन सप्रभाम्।

अनेन विधिना तस्य मूढबुद्धर्दुरात्मनः॥ १८.६२॥

sabāhyābhyantaraṁ dhyāyennividāñjana saprabhām|
anena vidhinā tasya mūḍhabuddhardurātmanaḥ||18.62||

विज्ञानमन्त्रविद्याद्या न कुर्वन्त्युपकारिताम्।

चित्ताभिसन्धिमात्रेण ह्यदृष्टस्यापि जायते॥ १८.६३॥

vijñānamantravidyādyā na kurvantyupakāritām|
cittābhisandhimātreṇa hyadṛṣṭasyāpi jāyate||18.63||

कथञ्चिदुपलब्धस्य नित्यमेवापकारिणः।

अथवा सूर्यबिम्बाभं ध्यात्वा विच्छेद्यमग्रतः॥ १८.६४॥

kathañcidupalabdhasya nityamevāpakāriṇaḥ|
athavā sūryabimbābhaṁ dhyātvā vicchedyamagrataḥ||18.64||

स्वर्भानुरूपया शक्त्या ग्रस्तं तमनुचिन्तयेत्।

अपराधसहस्रैस्तु कोपेन महतान्वितः॥ १८.६५॥

svarbhānurūpayā śaktyā grastaṁ tamanucintayet|
aparādhasahasraistu kopena mahatānvitaḥ||18.65||

विधिमेनं प्रकुर्वीत क्रीडार्थं न तु जातुचित्।

अनेन विधिना भ्रष्टो विज्ञानादपरेण च॥ १८.६६॥

vidhimenaṁ prakurvīta krīḍārthaṁ na tu jātucit|
anena vidhinā bhraṣṭo vijñānādapareṇa ca||18.66||

न शक्यो योजितुं भूयो यावत्तेनैव नोद्धृतः।

करुणाकृष्टचित्तस्तु तस्य कृत्वा विशोधनम्॥ १८.६७॥

na śakyo yojituṁ bhūyo yāvattenaiva noddhṛtaḥ|
karuṇākṛṣṭacittastu tasya kṛtvā viśodhanam||18.67||

प्राणायामादिभिस्तीथैः प्रायश्चित्तैर्विधिश्रुतैः।

ततस्तस्य प्रकुर्वीत दीक्षां पूर्वोक्तवर्त्मना॥ १८.६८॥

prāṇāyāmādibhistīthaiḥ prāyaścittairvidhiśrutaiḥ|
tatastasya prakurvīta dīkṣāṁ pūrvoktavartmanā||18.68||

ततः सर्वमवाप्नोति फलं तस्मादनन्यधीः।

एवं ज्ञात्वा प्रयत्नेन गरुमासादयेत्सुधीः॥ १८.६९॥

tataḥ sarvamavāpnoti phalaṁ tasmādananyadhīḥ|
evaṁ jñātvā prayatnena garumāsādayetsudhīḥ||18.69||

यतः सन्तोष उत्पन्नः शिवज्ञानामृतात्मकः।

न तस्यान्वेषयेद्वृत्तं शुभं वा यदि वाशुभम्॥ १८.७०॥

yataḥ santoṣa utpannaḥ śivajñānāmṛtātmakaḥ|
na tasyānveṣayedvṛttaṁ śubhaṁ vā yadi vāśubham||18.70||

स एव तद्विजानाति युक्तं वायुक्तमेव वा।

अकार्येषु यदा सक्तः प्राणद्रव्यापहारिषु॥ १८.७१॥

sa eva tadvijānāti yuktaṁ vāyuktameva vā|
akāryeṣu yadā saktaḥ prāṇadravyāpahāriṣu||18.71||

तदा निवारणीयोऽसौ प्रणतेन विपश्चिता।

तेनातिवार्यमाणोऽपि यद्यसौ न निवर्तते॥ १८.७२॥

tadā nivāraṇīyo'sau praṇatena vipaścitā|
tenātivāryamāṇo'pi yadyasau na nivartate||18.72||

तदान्यत्र क्वचिद्गत्वा शिवमेवानुचिन्तयेत्।

एष योगविधिः प्रोक्तः समासाद्योगिनां हितः॥ १८.७३॥

tadānyatra kvacidgatvā śivamevānucintayet|
eṣa yogavidhiḥ proktaḥ samāsādyoginām hitaḥ||18.73||

नात्र शुद्धिर्नचाशुद्धिर्न भक्ष्यादिविचारणम्।

न द्वैतं नापि चाद्वैतं लिङ्गपूजादिकं न च॥ १८.७४॥

nātra śuddhirnacāśuddhirna bhakṣyādivicāraṇam|
na dvaitaṁ nāpi cādvaitaṁ liṅgapūjādikaṁ na ca||18.74||

न चापि तत्परित्यागो निष्परिग्रहतापि वा।

सपरिग्रहता वापि जटाभस्मादिसङ्ग्रहः॥ १८.७५॥

na cāpi tatparityāgo niṣparigrahatāpi vā|

saparigrahatā vāpi jaṭābhasmādisaṅgrahaḥ||18.75||

तत्त्यागो न व्रतादीनां चरणाचरणं च यत्।

क्षेत्रादिसम्प्रवेशश्च समयादिप्रपालनम्॥ १८.७६ ॥

tattyāgo na vratādīnāṁ caraṇācaraṇaṁ ca yat|
kṣetrādisampraveśaśca samayādiprapālanam||18.76||

परस्वरूपलिङ्गादि नामगोत्रादिकं च यत्।

नास्मिन्विधीयते किञ्चिन्न चापि प्रतिषिध्यते॥ १८.७७॥

parasvarūpaliṅgādi nāmagotrādikaṁ ca yat|
nāsminvidhīyate kiñcinna cāpi pratiṣidhyate||18.77||

विहितं सर्वमेवात्र प्रतिषिद्धमथापि वा।

किन्त्वेतदत्र देवेशि नियमेन विधीयते॥ १८.७८॥

vihitaṁ sarvamevātra pratiṣiddhamathāpi vā|
kintvetadatra deveśi niyamena vidhīyate||18.78||

तत्त्वे चेतः स्थिरीकार्यं सुप्रयत्नेन योगिना।

तच्च यस्य यथैव स्यात्स तथैव समाचरेत्॥ १८.७९॥

tattve cetaḥ sthirīkāryaṁ suprayatnena yoginā|
tacca yasya yathaiva syātsa tathaiva samācaret||18.79||

तत्त्वे निश्चलचित्तस्तु भुञ्जानो विषयानपि।

न संस्पृश्येत दोषैः स पद्मपत्रमिवाम्भसा॥ १८.८०॥

tattve niścalacittastu bhuñjāno viṣayānapi|
na saṁspṛśyeta doṣaiḥ sa padmapatramivāmbhasā||18.80||

विषापहारिमन्त्रादिसन्नद्धो भक्षयन्नपि।

विषं न मुह्यते तेन तद्वद्योगी महामतिः॥ १८.८१॥

viṣāpahārimantrādisannaddho bhakṣayannapi|
viṣaṁ na muhyate tena tadvadyogī mahāmatiḥ||18.81||

इत्येतत्कथितं देवि किमन्यत्परिपृच्छसिं।
ityetatkathitaṁ devi kimanyatparipṛcchasiṁ|

इति श्रीमालिनीविजयोत्तरे तन्त्रे परमविद्याधिकारो नामाष्टादशोऽधिकारः॥१८॥
iti śrīmālinīvijayottare tantre paramavidyādhikāro nāmāṣṭādaśo'dhikāraḥ||18||

## कुलचक्राधिकारः एकोनविंशः १९ ॥

अथ एकोनविंशोऽधिकारः।
atha ekonaviṁśo'dhikāraḥ|

अथैनं परमं योगविधिमाकर्ण्य शाङ्करी।
पुनराह प्रसन्नास्या प्रणिपत्य जगद्गुरुम्॥ १९.१ ॥
athainaṁ paramaṁ yogavidhimākarṇya śāṅkarī|
punarāha prasannāsyā praṇipatya jagadgurum||19.1||

साध्यत्वेन श्रुता देव भिन्नयोनिस्तु मालिनी।
विद्यात्रयं सविद्याङ्गं विधिवच्चावधारितम्॥ १९.२ ॥
sādhyatvena śrutā deva bhinnayonistu mālinī|
vidyātrayaṁ savidyāṅgaṁ vidhivaccāvadhāritam||19.2||

अधुना श्रोतुमिच्छामि ह्यभिन्ना साध्यते कथम्।
हिताय साधकेन्द्राणां प्रसादाद्वक्तुमर्हसि॥ १९.३ ॥
adhunā śrotumicchāmi hyabhinnā sādhyate katham|
hitāya sādhakendrāṇāṁ prasādādvaktumarhasi||19.3||

एवमुक्तो महेशान्या जगतां पतिरादरात्।
विकसद्वदनाम्भोजः प्रत्युवाच वचोऽमृतम्॥ १९.४ ॥
evamukto maheśānyā jagatāṁ patirādarāt|
vikasadvadanāmbhojaḥ pratyuvāca vaco'mṛtam||19.4||

आरिराधयिषुः शम्भुं कुलोक्तविधिना बुधः।
कुलचक्रं यजेदादौ बुधो दीक्षोक्तवर्त्मना॥ १९.५ ॥
ārirādhayiṣuḥ śambhuṁ kuloktavidhinā budhaḥ|
kulacakraṁ yajedādau budho dīkṣoktavartmanā||19.5||

ततो जपेत्परां शक्तिं लक्षमेकमखण्डितम्।

पराबीजपुटान्तःस्थां न द्रुतां न विलम्बिताम्॥ १९.६॥

tato japetparāṁ śaktiṁ lakṣamekamakhaṇḍitam|
parābījapuṭāntaḥsthāṁ na drutāṁ na vilambitām||19.6||

तद्वत्खण्डाष्टकं चास्या लक्षं लक्षमखण्डितम्।

जपेत्कुलेश्वरस्यापि लक्षषट्कमनन्यधीः॥ १९.७॥

tadvatkhaṇḍāṣṭakaṁ cāsyā lakṣaṁ lakṣamakhaṇḍitam|
japetkuleśvarasyāpi lakṣaṣaṭkamananyadhīḥ||19.7||

होमयित्वा दशांशेन द्रव्यं पूर्वोदितं बुधः।

नित्यानुस्मृतिशीलस्य वाक्सिद्धिः सम्प्रजायते॥ १९.८॥

homayitvā daśāṁśena dravyaṁ pūrvoditaṁ budhaḥ|
nityānusmṛtiśīlasya vāksiddhiḥ samprajāyate||19.8||

स्वकूले जपयुक्तस्य अशक्तस्यापि साधने।

भवन्ति कन्यसा देवि संसारे भोगसम्पदः॥ १९.९॥

svakūle japayuktasya aśaktasyāpi sādhane|
bhavanti kanyasā devi saṁsāre bhogasampadaḥ||19.9||

शक्तस्तु साधयेत्सिद्धिं मध्यमामुत्तमामपि।

कृतसेवाविधिः पृथ्वीं भ्रमेदुद्भ्रान्तपत्त्रिवत्॥ १९.१०॥

śaktastu sādhayetsiddhiṁ madhyamāmuttamāmapi|
kṛtasevāvidhiḥ pṛthvīṁ bhramedudbhrāntapattrivat||19.10||

नगरे पञ्चरात्रं तु त्रिरात्रं पत्तने तु वै।

ग्रामेऽपि चैकरात्रं तु स्थित्वैनं विधिमाचरेत्॥ १९.११॥

nagare pañcarātraṁ tu trirātraṁ pattane tu vai|
grāme'pi caikarātraṁ tu sthitvainaṁ vidhimācaret||19.11||

यन्नामाद्यक्षरं यत्र वर्गे तत्तस्य वस्तुनः।

कुलमुक्तं विधानज्ञैर्नगरादेर्न संशयः ॥ १९.१२ ॥

yannāmādyakṣaraṁ yatra varge tattasya vastunaḥ|
kulamuktaṁ vidhānajñairnagarāderna saṁśayaḥ||19.12||

या यत्र देवता वर्गे वाच्यत्वे संव्यवस्थिता।

सैव तस्य पतित्वेन ध्येया पूज्या च साधकैः ॥ १९.१३ ॥

yā yatra devatā varge vācyatve saṁvyavasthitā|
saiva tasya patitvena dhyeyā pūjyā ca sādhakaiḥ||19.13||

तस्य किञ्चित्समासाद्य नगरादिकमादरात्।

स्वदिग्वर्गस्थितो भूत्वा चक्रं योज्य निजोदये॥ १९.१४॥

tasya kiñcitsamāsādya nagarādikamādarāt|
svadigvargasthito bhūtvā cakraṁ yojya nijodaye||19.14||

अवा … … … समेकैक उदिते … … …।

देवता माहेश्वर … … … … … … ॥ १९.१५॥

avā … … … samekaika udite … … …|
devatā māheśvara … … … … … …||19.15||

क्रमेणैव यथा रात्रौ … … … तथा दिवा।

स्वदिशि स्वोदये वर्गं तमेवानुस्मरेद्बुधः ॥ १९.१६ ॥

krameṇaiva yathā rātrau … … … tathā divā|
svadiśi svodaye vargaṁ tamevānusmaredbudhaḥ||19.16||

तिष्ठेदन्योदयं यावत्ततः स्वां दिशमाश्रयेत्।

स्वकुलं चिन्तयन्यायात्तद्देशकुलमेव वा॥ १९.१७॥

tiṣṭhedanyodayaṁ yāvattataḥ svāṁ diśamāśrayet|
svakulaṁ cintayanyāyāttaddeśakulameva vā||19.17||

यावदन्यां दिशं मन्त्री ततस्तदनुचिन्तयेत्।

एवं यावत्स्वकं स्थानं कुलचक्रोक्तवर्त्मना॥ १९.१८॥

yāvadanyāṁ diśaṁ mantrī tatastadanucintayet|

evaṁ yāvatsvakaṁ sthānaṁ kulacakroktavartmanā||19.18||

भ्रमित्वा पुनरायाति पूर्वकालक्रमेण च।

तावदागत्य देवेशि तद्देशकुलनायिका॥ १९.१९॥

bhramitvā punarāyāti pūrvakālakrameṇa ca|
tāvadāgatya deveśi taddeśakulanāyikā||19.19||

ददेद्भक्ष्यादिकं किञ्चिद्दापयेद्वाथ केनचित्।

अनेन विधिना युक्तो गुप्ताचारो दृढव्रतः। १९.२०॥

dadedbhakṣyādikaṁ kiñciddāpayedvātha kenacit|
anena vidhinā yukto guptācāro dṛḍhavrataḥ|19.20||

योगिनीमेलकं प्राप्य षण्मासेनैव सिद्ध्यति।

दुष्करोऽयं विधिर्देवि सत्त्वहीनैर्नराधमैः॥ १९.२१॥

yoginīmelakaṁ prāpya ṣaṇmāsenaiva siddhyati|
duṣkaro'yaṁ vidhirdevi sattvahīnairnarādhamaiḥ||19.21||

सर्वसिद्धिकरो मुख्यः कुलशास्त्रेषु सर्वतः।

अथैकस्मिन्नपि ग्रामे पत्तने नगरेऽपि वा॥ १९.२२॥

sarvasiddhikaro mukhyaḥ kulaśāstreṣu sarvataḥ|
athaikasminnapi grāme pattane nagare'pi vā||19.22||

तद्दिग्भागं समाश्रित्य तदेवं जपते कुलम्।

त्रिभिरब्दैरनायासात्साधयेदुत्तमं फलम्॥ १९.२३॥

taddigbhāgaṁ samāśritya tadevaṁ japate kulam|
tribhirabdairanāyāsātsādhayeduttamaṁ phalam||19.23||

लोकयात्रापरित्यक्तो ग्रासमात्रपरिग्रहः।

अथवा नाभिचक्रे तु ध्यानचक्रं कुलात्मकम्॥ १९.२४॥

lokayātrāparityakto grāsamātraparigrahaḥ|
athavā nābhicakre tu dhyānacakraṁ kulātmakam||19.24||

चेतसा भ्रमणं कुर्यात्सर्वकालक्रमेण तु।

ततोऽस्य वत्सरार्धेन देहान्तं योगिनीकुलम्॥ १९.२५॥

cetasā bhramaṇaṁ kuryātsarvakālakrameṇa tu|
tato'sya vatsarārdhena dehāntaṁ yoginīkulam||19.25||

आविर्भवत्यसन्देहात्स्वविज्ञानप्रकाशकम्।

तेनाविर्भूतमात्रेण योगी योगिकुले कुली॥ १९.२६॥

āvirbhavatyasandehātsvavijñānaprakāśakam|
tenāvirbhūtamātreṇa yogī yogikule kulī||19.26||

भवेदपि पतिर्देवि योगिनां परमेश्वरि।

अथवा चिन्तयेद्देवि यकारादिकमष्टकम्॥ १९.२७॥

bhavedapi patirdevi yogināṁ parameśvari|
athavā cintayeddevi yakārādikamaṣṭakam||19.27||

स्वरूपेण प्रभाकारकरालाकुलविग्रहम्।

तस्य मध्ये कुलेशानं स्वबोधकमनुस्मरन्॥ १९.२८॥

svarūpeṇa prabhākārakarālākulavigraham|
tasya madhye kuleśānaṁ svabodhakamanusmaran||19.28||

सर्वमेव च तत्पश्चाच्चक्रं दीपशिखाकृति।

सम्भूतं चिन्तयेद्योगी योगिनीपदकाङ्क्षया॥ १९.२९॥

sarvameva ca tatpaścāccakraṁ dīpaśikhākṛti|
sambhūtaṁ cintayedyogī yoginīpadakāṅkṣayā||19.29||

एतस्मिन्व्यक्तिमापन्ने पिण्डस्थं बुद्ध उच्यते।

ततोऽस्याकस्मिकी देवि महामुद्रोपजायते॥ १९.३०॥

etasminvyaktimāpanne piṇḍasthaṁ buddha ucyate|
tato'syākasmikī devi mahāmudropajāyate||19.30||

शृङ्गारवीरकारुण्यशोककोपादयस्तथा।

प्रबुद्धमेतदुद्दिष्टं पिण्डस्थममरार्चिते॥ १९.३१॥

śṛṅgāravīrakāruṇyaśokakopādayastathā|
prabuddhametaduddiṣṭaṁ piṇḍasthamamarārcite||19.31||

दिवसैरभियुक्तस्य ततोऽस्य बहुभिर्दिनैः।

धरादितत्त्वभावानां संवित्तिरुपजायते॥ १९.३२॥

divasairabhiyuktasya tato'sya bahubhirdinaiḥ|
dharāditattvabhāvānāṁ saṁvittirupajāyate||19.32||

सुप्रबुद्धं तदिच्छन्ति पिण्डस्थं ज्ञानमुत्तमम्।

चक्रं च त्रिगुणाष्टारमथवा तत्र चिन्तयेत्॥ १९.३३॥

suprabuddhaṁ tadicchanti piṇḍasthaṁ jñānamuttamam|
cakraṁ ca triguṇāṣṭāramathavā tatra cintayet||19.33||

कादिहान्ताक्षराक्रान्तं पूर्वरूपं सविन्दुकम्।

तत्रापि पूर्ववत्सर्वं कुर्वन्नेतत्फलं लभेत्॥ १९.३४॥

kādihāntākṣarākrāntaṁ pūrvarūpaṁ savindukam|
tatrāpi pūrvavatsarvaṁ kurvannetatphalaṁ labhet||19.34||

आदिवर्णान्वितं वाथ षोडशारमनुस्मरन्।

मध्यक्रमेण वा योगी पञ्चमं चुम्बकादिभिः॥ १९.३५॥

ādivarṇānvitaṁ vātha ṣoḍaśāramanusmaran|
madhyakrameṇa vā yogī pañcamaṁ cumbakādibhiḥ||19.35||

द्वासप्ततिसहस्राणि नाडीनां नाभिचक्रके।

यतः पिण्डत्वमायान्ति तेनासौ पिण्ड उच्यते॥ १९.३६॥

dvāsaptatisahasrāṇi nāḍīnāṁ nābhicakrake|
yataḥ piṇḍatvamāyānti tenāsau piṇḍa ucyate||19.36||

तत्र स्थितं तु यज्ज्ञेयं पिण्डस्थं तदुदाहृतम्।

अ … … मल … … त्केश … … … कम्॥ १९.३७॥

tatra sthitaṁ tu yajjñeyaṁ piṇḍasthaṁ tadudāhṛtam|

a … … mala … … tkeśa … … … kam||19.37||

विज्वरत्वमवाप्नोति वत्सरेण यदृच्छया।

चक्रपञ्चकमेतद्धि पूर्ववद्धृदये स्थितम्॥ १९.३८॥

vijvaratvamavāpnoti vatsareṇa yadṛcchayā|
cakrapañcakametaddhi pūrvavaddhṛdaye sthitam||19.38||

पदस्थमिति शंसन्ति चतुर्भेदं विचक्षणाः।

यत्रार्थावगतिर्देवि तत्स्थानं पदमुच्यते॥ १९.३९॥

padasthamiti śaṁsanti caturbhedaṁ vicakṣaṇāḥ|
yatrārthāvagatirdevi tatsthānaṁ padamucyate||19.39||

चतुष्कमत्र विज्ञेयं भेदं पञ्चदशात्मकम्।

सर्वतोभद्रसंसिद्धौ सर्वतोभद्रतां व्रजेत्॥ १९.४०॥

catuṣkamatra vijñeyaṁ bhedaṁ pañcadaśātmakam|
sarvatobhadrasaṁsiddhau sarvatobhadratāṁ vrajet||19.40||

जरामरणनैर्गुण्यनिर्मुक्तो योगचिन्तकः।

व्याप्तावपि प्रसिद्धायां मायाधस्तत्त्वगोचरः॥ १९.४१॥

jarāmaraṇanairguṇyanirmukto yogacintakaḥ|
vyāptāvapi prasiddhāyāṁ māyādhastattvagocaraḥ||19.41||

वेत्ति तत्पतितुल्यत्वं तदीशत्वं च गच्छति।

पदस्थे किन्तु चन्द्राभं प्रदीपाभं न चिन्तयेत्॥ १९.४२॥

vetti tatpatitulyatvaṁ tadīśatvaṁ ca gacchati|
padasthe kintu candrābhaṁ pradīpābhaṁ na cintayet||19.42||

एतदेवामृतौघेन देहमापूरयत्स्वकम्।

चिन्तितं मृत्युनाशाय भवतीति किमद्भुतम्॥ १९.४३॥

etadevāmṛtaughena dehamāpūrayatsvakam|
cintitaṁ mṛtyunāśāya bhavatīti kimadbhutam||19.43||

उपलक्षणमेतत्ते चन्द्रबिम्बाद्युदीरितम्।
येन येनैव रूपेण चिन्त्यते परमेश्वरी॥ १९.४४॥
upalakṣaṇametatte candrabimbādyudīritam|
yena yenaiva rūpeṇa cintyate parameśvarī||19.44||

पिण्डस्थादिप्रभेदेषु तेनैवेष्टफलप्रदा।
रूपमैश्वरमिच्छन्ति शिवस्यासिवहारिणः॥ १९.४५॥
piṇḍasthādiprabhedeṣu tenaiveṣṭaphalapradā|
rūpamaiśvaramicchanti śivasyāsivahāriṇaḥ||19.45||

यद्भ्रूमध्यस्थितं यस्मार्त्तेन तत्र व्यवस्थितम्।
पञ्चकं सूर्यसङ्काशं रूपस्थमभिधीयते॥ १९.४६॥
yadbhrūmadhyasthitaṁ yasmārttena tatra vyavasthitam|
pañcakaṁ sūryasaṅkāśaṁ rūpasthamabhidhīyate||19.46||

तत्रापि पूर्ववत्सिद्धिरीश्वरान्तपदोद्भवा।
रूपातीतं तु देवेशि प्रागेवोक्तमनेकधा॥ १९.४७॥
tatrāpi pūrvavatsiddhirīśvarāntapadodbhavā|
rūpātītaṁ tu deveśi prāgevoktamanekadhā||19.47||

एत्येषा कुलचक्रस्य समासाद्व्याप्तिरुत्तमा।
कथिता सर्वसिद्ध्यर्थं सिद्धयोगीश्वरीमते॥ १९.४८॥
etyeṣā kulacakrasya samāsādvyāptiruttamā|
kathitā sarvasiddhyarthaṁ siddhayogīśvarīmate||19.48||

सर्वदाथ विभेदेन पृथग्वर्णविभेदतः।
विद्यादिसर्वसंसिद्ध्यै योगिनां योगमिच्छताम्॥ १९.४९॥
sarvadātha vibhedena pṛthagvarṇavibhedataḥ|
vidyādisarvasaṁsiddhyai yogināṁ yogamicchatām||19.49||

भूयोऽपि सम्प्रदायेन वर्णभेदश्च कीर्त्यते।

स्त्रीरूपां हृदि सञ्चिन्त्य सितवस्त्रादिभूषिताम्॥ १९.५०॥
bhūyo'pi sampradāyena varṇabhedaśca kīrtyate|
strīrūpāṁ hṛdi sañcintya sitavastrādibhūṣitām||19.50||

नाभिचक्रोपविष्टां तु चन्द्रकोटिसमप्रभाम्।
बीजं यत्सर्वशास्त्राणां तत्तदा स्यादनारतम्॥ १९.५१॥
nābhicakropaviṣṭāṁ tu candrakoṭisamaprabhām|
bījaṁ yatsarvaśāstrāṇāṁ tattadā syādanāratam||19.51||

स्वकीयेनैव वक्त्रेण निर्गच्छत्प्रविचिन्तयेत्।
तारहारलताकारं विस्फुरत्किरणाकुलम्॥ १९.५२॥
svakīyenaiva vaktreṇa nirgacchatpravicintayet|
tārahāralatākāraṁ visphuratkiraṇākulam||19.52||

वर्णैस्तारकसङ्काशैरारब्धममितद्युति।
मासार्धाच्छास्त्रसङ्घातमुद्गिरत्यनिवारितम्॥ १९.५३॥
varṇaistārakasaṅkāśairārabdhamamitadyuti|
māsārdhācchāstrasaṅghātamudgiratyanivāritam||19.53||

स्वप्ने मासात्समाधिस्थः षड्भिर्मासैर्यथेच्छया।
उच्छिन्नान्यपि शास्त्राणि ग्रन्थतश्चार्थतोऽपि वा॥ १९.५४॥
svapne māsātsamādhisthaḥ ṣaḍbhirmāsairyathecchayā|
ucchinnānyapi śāstrāṇi granthataścārthato'pi vā||19.54||

जानाति वत्सराद्योगी यदि तन्मयतां गतः।
अनुषङ्गफलं चैतत्समासादुपवर्णितम्॥ १९.५५॥
jānāti vatsarādyogī yadi tanmayatāṁ gataḥ|
anuṣaṅgaphalaṁ caitatsamāsādupavarṇitam||19.55||

विद्येश्वरसमानत्वसिद्धिरन्याश्च सिद्धयः।
प्रतिवर्णविभेदेन यथेदानीं तथोच्यते॥ १९.५६॥
vidyeśvarasamānatvasiddhiranyāśca siddhayaḥ|

prativarṇavibhedena yathedānīṁ tathocyate||19.56||

ध्यातव्या योगिभिर्नित्यं तत्तत्फलबुभुक्षुभिः।
विन्यासक्रमयोगन त्रिविधेनापि वर्त्मना॥ १९.५७॥
dhyātavyā yogibhirnityaṁ tattatphalabubhukṣubhiḥ|
vinyāsakramayogana trividhenāpi vartmanā||19.57||

यो यत्राङ्गे स्थितो वर्णः कुलशक्तिसमुद्भवः।
तं तत्रैव समाधाय स्वरूपेणैव योगवित्॥ १९.५८॥
yo yatrāṅge sthito varṇaḥ kulaśaktisamudbhavaḥ|
taṁ tatraiva samādhāya svarūpeṇaiva yogavit||19.58||

स्फुरत्प्रभास्ततिमिरं कुवन्नत्र मनः स्थिरम्।
पूर्वकालक्रमादेव तत्त्वाभ्यासोक्तवर्त्मना॥ १९.५९॥
sphuratprabhāstatimiraṁ kuvannatra manaḥ sthiram|
pūrvakālakramādeva tattvābhyāsoktavartmanā||19.59||

तद्वर्णव्याप्तिजं सर्वं प्राप्नोति फलमुत्तमम्।
अथवा योजयेत्कश्चिदेनां वश्यादिकर्मसु॥ १९.६०॥
tadvarṇavyāptijaṁ sarvaṁ prāpnoti phalamuttamam|
athavā yojayetkaścidenāṁ vaśyādikarmasu||19.60||

तदा प्रसाधयत्याशु साधकस्य समीहितम्।
उदितादित्यवर्णाभां समस्ताक्षरपद्धतिम्॥ १९.६१॥
tadā prasādhayatyāśu sādhakasya samīhitam|
uditādityavarṇābhāṁ samastākṣarapaddhatim||19.61||

इच्छयैनां सुवर्णाभां स्रवन्तीं मदिरां मुहुः।
सप्ताहं चिन्तयेद्यस्य सर्वाङ्गेषु यथाक्रमम्॥ १९.६२॥
icchayaināṁ suvarṇābhāṁ sravantīṁ madirāṁ muhuḥ|
saptāhaṁ cintayedyasya sarvāṅgeṣu yathākramam||19.62||

स वश्यो दासवद्भूत्वा नान्यं स्वामिनमिच्छति।

त्रिसप्ताद्रूपसम्पन्नां पदविभ्रान्तलोचनाम्॥ १९.६३॥

sa vaśyo dāsavadbhūtvā nānyaṁ svāminamicchati|
trisaptādrūpasampannāṁ padavibhrāntalocanām||19.63||

उर्वशीमप्यनायासादानयेत्किमु मानुषीम्।

अनेनैव विधानेन वायुवह्निपुरान्तगाम्॥ १९.६४॥

urvaśīmapyanāyāsādānayetkimu mānuṣīm|
anenaiva vidhānena vāyuvahnipurāntagām||19.64||

पिण्डाकृष्टीकरी ज्ञेया योजनानां शतैरपि।

शरत्पूर्णनिशानाथवर्णाभैषानुसन्धिता॥ १९.६५॥

piṇḍākṛṣṭīkarī jñeyā yojanānāṁ śatairapi|
śaratpūrṇaniśānāthavarṇābhaiṣānusandhitā||19.65||

विदधात्यतुलां शान्तिमात्मनोऽथ परस्य वा।

द्रुतहेमप्रतीकाशा स्वस्थाने सम्प्रयोजिता॥ १९.६६॥

vidadhātyatulāṁ śāntimātmano'tha parasya vā|
drutahemapratīkāśā svasthāne samprayojitā||19.66||

महतीं पुष्टिमाधत्ते दशाहेनैव शाङ्करि।

जम्बूफलरसाभासां वज्रकीलकसन्निभाम्॥ १९.६७॥

mahatīṁ puṣṭimādhatte daśāhenaiva śāṅkari|
jambūphalarasābhāsāṁ vajrakīlakasannibhām||19.67||

कीलने चिन्तयेद्योगी मोहने शुकपिच्छवत्।

वज्रनीलप्रतीकाशां प्रतिस्थाननिकृन्तनीम्॥ १९.६८॥

kīlane cintayedyogī mohane śukapicchavat|
vajranīlapratīkāśāṁ pratisthānanikṛntanīm||19.68||

कालानलसमस्पर्शां रिपुनाशाय चिन्तयेत्।

मालायष्टरभीतानां कुलमद्रिसमोपमम्॥ १९.६९॥

kālānalasamasparśāṁ ripunāśāya cintayet|
mālāyaṣṭarabhītānāṁ kulamadrisamopamam||19.69||

चिन्तयेद्धूमसङ्काशामत्यन्तमनलाकुलाम्।
शान्तिकर्मोक्तवत्कोपप्रशान्तावप्यनुस्मरन्॥ १९.७०॥

cintayeddhūmasaṅkāśāmatyantamanalākulām|
śāntikarmoktavatkopapraśāntāvapyanusmaran||19.70||

तापने तु तथा किन्तु स्वरूपं सूर्यवद्बुधः।
विद्वेशे तु कपोताभां भञ्जने चाषसन्निभाम्॥ १९.७१॥

tāpane tu tathā kintu svarūpaṁ sūryavadbudhaḥ|
vidveśe tu kapotābhāṁ bhañjane cāṣasannibhām||19.71||

उत्सादे नीलहरितपीतरक्तासितां स्मरेत्।
प्रत्यङ्गव्याधिसम्भूतावेकमेव तदुद्भवम्॥ १९.७२॥

utsāde nīlaharitapītaraktāsitāṁ smaret|
pratyaṅgavyādhisambhūtāvekameva tadudbhavam||19.72||

वर्णं विचिन्तयेद्योगी मारणोक्तेन वर्त्मना।
तद्वत्तु शान्तिकर्मोक्तवर्त्मना तत्प्रसान्तये॥ १९.७३॥

varṇaṁ vicintayedyogī māraṇoktena vartmanā|
tadvattu śāntikarmoktavartmanā tatprasāntaye||19.73||

चिन्तयेत्कृतके व्याधिसङ्घाते सहजेऽपि वा।
अथवैतां जपन्कश्चिद्वाक्सिद्धिमभिवाञ्छति॥ १९.७४॥

cintayetkṛtake vyādhisaṅghāte sahaje'pi vā|
athavaitāṁ japankaścidvāksiddhimabhivāñchati||19.74||

तदानेन विधानेन प्रकुर्यादक्षमालिकाम्।
मणिमौक्तिकशङ्खादिपद्माक्षादिविनिर्मिताम्॥ १९.७५॥

tadānena vidhānena prakuryādakṣamālikām|

maṇimauktikaśaṅkhādipadmākṣādivinirmitām||19.75||

हेमादिधातुजां वाथ शतार्धप्रमितां बुधः।

यथा स्वबाहुमात्रा स्याद्वलयाकृतितां गता॥ १९.७६॥

hemādidhātujāṁ vātha śatārdhapramitāṁ budhaḥ|
yathā svabāhumātrā syādvalayākṛtitāṁ gatā||19.76||

तां गृहीत्वा समालभ्य गन्धधूपाधिवासिताम्।

पूजयित्वा कुलेशानं तत्र शक्तिं निवेशयेत्॥ १९.७७॥

tāṁ gṛhītvā samālabhya gandhadhūpādhivāsitām|
pūjayitvā kuleśānaṁ tatra śaktiṁ niveśayet||19.77||

प्रत्येकमुच्चरेद्बीजं पराबीजपुटान्तगम्।

प्रस्फुरत्क्षान्तमेकस्मिन्नाद्यक्षे विनियोजयेत्॥ १९.७८॥

pratyekamuccaredbījaṁ parābījapuṭāntagam|
prasphuratkṣāntamekasminnādyakṣe viniyojayet||19.78||

आद्यर्णं व्यापकं भूयः सर्वाधिष्ठायकं स्मरेत्।

द्विविधेऽपि हि वर्णानां भेदे विधिरयं मतः॥ १९.७९॥

ādyarṇaṁ vyāpakaṁ bhūyaḥ sarvādhiṣṭhāyakaṁ smaret|
dvividhe'pi hi varṇānāṁ bhede vidhirayaṁ mataḥ||19.79||

द्वितीयं व्यापकं वर्णं द्वितीयं पूर्ववन्न्यसेत्।

तृतीयादिषु वर्णेषु फान्तेष्वप्येवमिष्यते॥ १९.८०॥

dvitīyaṁ vyāpakaṁ varṇaṁ dvitīyaṁ pūrvavannyaset|
tṛtīyādiṣu varṇeṣu phānteṣvapyevamiṣyate||19.80||

ततः शक्तिमनुस्मृत्य सूत्राभामेकमानसः।

अक्षमध्यगतां कुर्यादक्षसूत्रप्रसिद्धये॥ १९.८१॥

tataḥ śaktimanusmṛtya sūtrābhāmekamānasaḥ|
akṣamadhyagatāṁ kuryādakṣasūtraprasiddhaye||19.81||

चक्रवद्भ्रामयेदेनां यदेवात्र प्रभाषते।

तत्सर्वं मन्त्रसंसिद्ध्यै जपत्वेन प्रकल्पते॥ १९.८२॥

cakravadbhrāmayedenāṁ yadevātra prabhāṣate|
tatsarvaṁ mantrasaṁsiddhyai japatvena prakalpate||19.82||

होमः स्याद्दीक्षिते तद्वद्दह्यमानेऽत्र वस्तुनि।

विपरीतप्रयोगेन सङ्क्रुद्धो भ्रामयेद्यदि॥ १९.८३॥

homaḥ syāddīkṣite tadvaddahyamāne'tra vastuni|
viparītaprayogena saṅkruddho bhrāmayedyadi||19.83||

नदा मारयते शत्रुं सभृत्यबलवाहनम्।

अभिमन्त्र्य यदेवात्र चेतसा कर्म साधकः॥ १९.८४॥

nadā mārayate śatruṁ sabhṛtyabalavāhanam|
abhimantrya yadevātra cetasā karma sādhakaḥ||19.84||

रात्रौ सौम्यादिभेदेऽत्र भ्रामयेदक्षसूत्रकम्।

तदेव सिद्ध्यते देवि कृतसेवाविधेः प्रिये॥ १९.८५॥

rātrau saumyādibhede'tra bhrāmayedakṣasūtrakam|
tadeva siddhyate devi kṛtasevāvidheḥ priye||19.85||

सेवा चात्राक्षसूत्रस्य षण्मासं परिवर्तनम्।

विधावत्र नियुक्तस्य योगिनो वत्सरत्रयात्॥ १९.८६॥

sevā cātrākṣasūtrasya ṣaṇmāsaṁ parivartanam|
vidhāvatra niyuktasya yogino vatsaratrayāt||19.86||

वाक्सिद्धिर्जायते देवि सर्वलोकसुदुर्लभा।

वाक्सिद्धेर्नापरा सिद्धिरुत्तमा भुवि जातुचित्॥ १९.८७॥

vāksiddhirjāyate devi sarvalokasudurlabhā|
vāksiddhernāparā siddhiruttamā bhuvi jātucit||19.87||

वाचो वर्णात्मिका यस्माद्वर्णरूपा च मालिनी।

अथवा चिन्तयेदेनामुल्काकारां विचक्षणः॥ १९.८८॥

vāco varṇātmikā yasmādvarṇarūpā ca mālinī|
athavā cintayedenāmulkākārāṁ vicakṣaṇaḥ||19.88||

निर्गच्छन्तीं स्वकाद्देहाद्विस्फुरन्तीं ततोऽप्यतः।

स्फुलिङ्गैः कोटिसङ्ख्यातैः सन्ततैः किरणाकुलैः॥ १९.८९॥

nirgacchantīṁ svakāddehādvisphurantīṁ tato'pyataḥ|
sphuliṅgaiḥ koṭisaṅkhyātaiḥ santataiḥ kiraṇākulaiḥ||19.89||

ग्रामं वा पत्तनं वापि नगरं देशमेव वा।

मण्डलं पृथिवी वापि ब्रह्माण्डं वा समस्तकम्॥ १९.९०॥

grāmaṁ vā pattanaṁ vāpi nagaraṁ deśameva vā|
maṇḍalaṁ pṛthivī vāpi brahmāṇḍaṁ vā samastakam||19.90||

विस्तीर्णं वा जनानीकमेकैकमुत्तमोत्तमम्।

स बाह्याभ्यन्तरं व्याप्य पुनः प्रतिनिवृत्त्य च॥ १९.९१॥

vistīrṇaṁ vā janānīkamekaikamuttamottamam|
sa bāhyābhyantaraṁ vyāpya punaḥ pratinivṛttya ca||19.91||

प्रविशन्तीं स्वकं देहं पूर्वाकारामनुस्मरेत्।

एवं दिने दिने कुर्यात्तद्गतेनान्तरात्मना॥ १९.९२॥

praviśantīṁ svakaṁ dehaṁ pūrvākārāmanusmaret|
evaṁ dine dine kuryāttadgatenāntarātmanā||19.92||

ततोऽस्य मासमात्रेण जनास्तत्र निवासिनः।

आगच्छन्ति यथा तीर्थं शक्तितेजोपबृंहिताः॥ १९.९३॥

tato'sya māsamātreṇa janāstatra nivāsinaḥ|
āgacchanti yathā tīrthaṁ śaktitejopabṛṁhitāḥ||19.93||

रूपिण्यो विविधाकारा ललनाद्यास्तथा पराः।

भूचर्यः क्षोभमायान्ति षण्मासान्नात्र संशयः॥ १९.९४॥

rūpiṇyo vividhākārā lalanādyāstathā parāḥ|

bhūcaryaḥ kṣobhamāyānti ṣaṇmāsānnātra saṁśayaḥ||19.94||

योनिजा द्वा मजा क्षेत्रजाताः पीठसमुद्भवाः।

नायिकाश्च महादेवि क्रमात्क्षुभ्यन्ति वत्सरात्॥ १९.९५॥

yonijā dvā majā kṣetrajātāḥ pīṭhasamudbhavāḥ|
nāyikāśca mahādevi kramātkṣubhyanti vatsarāt||19.95||

अन्तरिक्षगता दिव्या ब्रह्मलोकगताश्च याः।

ब्रह्माण्डान्तर्गताः सर्वाः क्षोभं यान्ति समात्रयात्॥ १९.९६॥

antarikṣagatā divyā brahmalokagatāśca yāḥ|
brahmāṇḍāntargatāḥ sarvāḥ kṣobhaṁ yānti samātrayāt||19.96||

स्वं स्वं ददति विज्ञानं साधकेन समीहितम्।

यदि ता न प्रयच्छन्ति साधकेन समीहितम्॥ १९.९७॥

svaṁ svaṁ dadati vijñānaṁ sādhakena samīhitam|
yadi tā na prayacchanti sādhakena samīhitam||19.97||

नश्यते दिव्यविज्ञानं त्रुट्यते कुलसन्ततिः।

दत्त्वा तु साधकेन्द्रेण प्रार्थितं फलमादरात्॥ १९.९८॥

naśyate divyavijñānaṁ truṭyate kulasantatiḥ|
dattvā tu sādhakendreṇa prārthitaṁ phalamādarāt||19.98||

अनुपालितगुर्वाज्ञाः सिद्धिं प्राप्स्यन्त्यनुत्तमाम्।

ताभ्यो विज्ञानमासाद्य योगी योगिकुले कुली॥ १९.९९॥

anupālitagurvājñāḥ siddhiṁ prāpsyantyanuttamām|
tābhyo vijñānamāsādya yogī yogikule kulī||919.9||

भुक्त्वा यथेप्सितान्भोगान्यात्यन्ते परमं पदम्।

इत्ययं कथितो लेशात्कौलिको विधिरुत्तमः॥ १९.१००॥

bhuktvā yathepsitānbhogānyātyante paramaṁ padam|
ityayaṁ kathito leśātkauliko vidhiruttamaḥ||19.100||

**योगिनां सर्वसिद्ध्यर्थं कुलमार्गानुसारिणाम्॥ १९.१०१॥**

yogināṁ sarvasiddhyarthaṁ kulamārgānusāriṇām||19.101||

**इति श्रीमालिनीविजयोत्तरे तन्त्रे कुलचक्राधिकार एकोनविंशः॥ १९॥**

iti śrīmālinīvijayottare tantre kulacakrādhikāra ekonaviṁśaḥ||19||

सर्वमन्त्रनिर्णयाधिकारः विंशः २० ॥

## अथ विंशोऽधिकारः।
atha viṁśo'dhikāraḥ|

अथ पिण्डादिभेदेन शाक्तं विज्ञानमुच्यते।
योगिनां योगसिध्यर्थं सङ्क्षेपान्न तु विस्तरात्॥ २०.१ ॥
atha piṇḍādibhedena śāktaṁ vijñānamucyate|
yogināṁ yogasidhyarthaṁ saṅkṣepānna tu vistarāt||20.1||

पिण्डं शरीरमित्युक्तं तद्वच्छक्तिशिवात्मनोः।
ब्रह्मानन्दो बलं तेजो वीर्यमोजश्च कीर्त्यते॥ २०.२ ॥
piṇḍaṁ śarīramityuktaṁ tadvachaktiśivātmanoḥ|
brahmānando balaṁ tejo vīryamojaśca kīrtyate||20.2||

अज्ञानेन निरुद्धं तदनाद्येव सदात्मनः।
तदाविभूतये सर्वमनिरुद्धं प्रवर्तते॥ २०.३ ॥
ajñānena niruddhaṁ tadanādyeva sadātmanaḥ|
tadāvibhūtaye sarvamaniruddhaṁ pravartate||20.3||

तेनाविर्भाव्यमानं तत्पूर्वावस्थां परित्यजत्।
याः संवित्तीरवाप्नोति ता अधस्तात्प्रकीर्तिताः॥ २०.४ ॥
tenāvirbhāvyamānaṁ tatpūrvāvasthāṁ parityajat|
yāḥ saṁvittīravāpnoti tā adhastātprakīrtitāḥ||20.4||

तदेव पदमिच्छन्ति सर्वार्थावगतिर्यतः।
तस्मात्सञ्जायते नित्यं नित्यमेव शिवात्मनोः॥ २०.५ ॥
tadeva padamicchanti sarvārthāvagatiryataḥ|
tasmātsañjāyate nityaṁ nityameva śivātmanoḥ||20.5||

तदेव रूपमित्युक्तमात्मनश्च विनश्वरम्।

रूपातीतं तदेवाहुर्यतोक्षाविषयं परम्॥ २०.६॥

tadeva rūpamityuktamātmanaśca vinaśvaram|
rūpātītaṁ tadevāhuryatokṣāviṣayaṁ param||20.6||

भावनां तस्य कुर्वीत नमस्कृत्य गुरुं बुधः।

तावदालोचयेद्वस्तु यावत्पदमनामयम्॥ २०.७॥

bhāvanāṁ tasya kurvīta namaskṛtya guruṁ budhaḥ|
tāvadālocayedvastu yāvatpadamanāmayam||20.7||

नैवं न चैवं नाप्येवं नापि चैवमपि स्फुटम्।

चेतसा योगयुक्तेन यावत्तदिदमप्यलम्॥ २०.८॥

naivaṁ na caivaṁ nāpyevaṁ nāpi caivamapi sphuṭam|
cetasā yogayuktena yāvattadidamapyalam||20.8||

कृत्वा तन्मयमात्मानं सर्वाक्षार्थविवर्जितम्।

मुहूर्तं तिष्ठते यावत्तावत्कम्पः प्रजायते॥ २०.९॥

kṛtvā tanmayamātmānaṁ sarvākṣārthavivarjitam|
muhūrtaṁ tiṣṭhate yāvattāvatkampaḥ prajāyate||20.9||

भ्रमणोद्भवनिद्राश्च किञ्चिदानन्द इत्यपि।

तत्र यत्नेन सन्दध्याच्चेतः परफलेच्छया॥ २०.१०॥

bhramaṇodbhavanidrāśca kiñcidānanda ityapi|
tatra yatnena sandadhyāccetaḥ paraphalecchayā||20.10||

तदेतदात्मनो रूपं शिवेन प्रकटीकृतम्।

यत्र तु यच्चं विज्ञेयं शिवात्मकमपि स्थितम्॥ २०.११॥

tadetadātmano rūpaṁ śivena prakaṭīkṛtam|
yatra tu yaccaṁ vijñeyaṁ śivātmakamapi sthitam||20.11||

तद्रूपोद्बलकत्वेन स्थितमित्यवधारयेत्।

तत्समभ्यसतो नित्यं स्थूलपिण्डाद्युपाश्रयात्॥२०.१२॥

tadrūpodbalakatvena sthitamityavadhārayet|
tatsamabhyasato nityaṁ sthūlapiṇḍādyupāśrayāt||20.12||

चतुर्भेदत्वमायाति भक्त्याभिन्नमपि स्वतः।

स्थूलपिण्डे द्विधा प्रोक्तं बाह्याभ्यन्तरभेदतः॥२०.१३॥

caturbhedatvamāyāti bhaktyābhinnamapi svataḥ|
sthūlapiṇḍe dvidhā proktaṁ bāhyābhyantarabhedataḥ||20.13||

भौतिकं बाह्यमिच्छन्ति द्वितीयं चातिवाहिकम्।

तत्राद्योपाश्रयाद्योगी ससंवित्तिरपि स्फुटान्॥२०.१४॥

bhautikaṁ bāhyamicchanti dvitīyaṁ cātivāhikam|
tatrādyopāśrayādyogī sasaṁvittirapi sphuṭān||20.14||

बाह्यार्थान्सम्प्रगृह्णाति किञ्चिदाध्यात्मिकानपि।

द्वितीयोपाश्रयात्तत्त्वभावार्थान्सम्प्रपद्यते॥२०.१५॥

bāhyārthānsampragr̥hṇāti kiñcidādhyātmikānapi|
dvitīyopāśrayāttattvabhāvārthānsamprapadyate||20.15||

ईक्षते च स्वदेहान्तः पीठक्षेत्रादिकं स्फुटम्।

स्वरूपालोचनादस्य यत्किञ्चिदुपजायते॥२०.१६॥

īkṣate ca svadehāntaḥ pīṭhakṣetrādikaṁ sphuṭam|
svarūpālocanādasya yatkiñcidupajāyate||20.16||

तत्र चेतः स्थिरीकुर्वंस्तदेव सकलं लभेत्।

तेन तत्र न कुर्वीत चैतदुत्तमवाञ्छया॥२०.१७॥

tatra cetaḥ sthirīkurvaṁstadeva sakalaṁ labhet|
tena tatra na kurvīta caitaduttamavāñchayā||20.17||

पिण्डद्वयविनिर्मुक्ता किञ्चित्तद्वासनान्विता।

विज्ञानकेवलान्तस्था पदमित्यभिधीयते॥२०.१८॥

piṇḍadvayavinirmuktā kiñcittadvāsanānvitā|

vijñānakevalāntasthā padamityabhidhīyate||20.18||

यतं एतामनुपाप्तो विज्ञानक्रमयोगतः।

रूपोदयातिविज्ञानपदत्वं प्रतिपद्यते॥२०.१९॥

yataṁ etāmanupāpto vijñānakramayogataḥ|
rūpodayātivijñānapadatvaṁ pratipadyate||20.19||

एतच्चतुर्विधं ज्ञेयं चतुर्धार्थप्रतिश्रयात्।

स च तत्त्वादिसंवित्तिपूर्वस्तत्पतितावधिः॥२०.२०॥

etaccaturvidhaṁ jñeyaṁ caturdhārthapratiśrayāt|
sa ca tattvādisaṁvittipūrvastatpatitāvadhiḥ||20.20||

पदभावविनिर्मुक्ता किञ्चित्तदनुवर्जिता।

अवस्था स्वस्वरूपस्य प्रकाशकरणी यतः॥२०.२१॥

padabhāvavinirmuktā kiñcittadanuvarjitā|
avasthā svasvarūpasya prakāśakaraṇī yataḥ||20.21||

तेन सारूप्यमित्युक्ता रूपस्थं यत्तदान्वितम्।

उदितादिप्रभेदेन तदप्युक्तं चतुर्विधम्॥२०.२२॥

tena sārūpyamityuktā rūpasthaṁ yattadānvitam|
uditādiprabhedena tadapyuktaṁ caturvidham||20.22||

ज्ञानोदया च देवेशि ममत्वात्तत्फलप्रदम्।

अमुना क्रमयोगेन अन्तरा येषु सन्दधत्॥२०.२३॥

jñānodayā ca deveśi mamatvāttatphalapradam|
amunā kramayogena antarā yeṣu sandadhat||20.23||

चेतः शुद्धमवाप्नोति रूपातीतं परं पदम्।

चतुर्विधं तदप्युक्तं संवित्तिफलभेदतः॥२०.२४॥

cetaḥ śuddhamavāpnoti rūpātītaṁ paraṁ padam|
caturvidhaṁ tadapyuktaṁ saṁvittiphalabhedataḥ||20.24||

त्रिविधं तत्समभ्यस्य सर्वसिद्धिफलेच्छया।

चतुर्थात्तु तनुं त्यक्त्वा तत्क्षणादपवृज्यते॥२०.२५॥

trividhaṁ tatsamabhyasya sarvasiddhiphalecchayā|
caturthāttu tanuṁ tyaktvā tatkṣaṇādapavṛjyate||20.25||

इति पिण्डादिभेदेन शिवज्ञानमुदाहृतम्।

योगाभ्यासविधानेन मन्त्रविद्यागणं शृणु॥२०.२६॥

iti piṇḍādibhedena śivajñānamudāhṛtam|
yogābhyāsavidhānena mantravidyāgaṇaṁ śṛṇu||20.26||

पूर्वोक्तविधिसन्नद्धः प्रदेशे पूर्वचोदिते।

नाभ्यादिपञ्चदेशानां परार्णं क्वापि चिन्तयत्॥२०.२७॥

pūrvoktavidhisannaddhaḥ pradeśe pūrvacodite|
nābhyādipañcadeśānāṁ parārṇaṁ kvāpi cintayat||20.27||

स्वरूपेण प्रभाभात्प्रकाशिततनूदरम्।

दीप्तिभिस्तस्य तीव्राभिराब्रह्मभुवनं ततः॥२०.२८॥

svarūpeṇa prabhābhātprakāśitatanūdaram|
dīptibhistasya tīvrābhirābrahmabhuvanaṁ tataḥ||20.28||

एवं संस्मरतस्तस्य दिवसैः सप्तभिः प्रिये।

रुद्रशक्तिसमावेशः सुमहान्सम्प्रजायते॥२०.२९॥

evaṁ saṁsmaratastasya divasaiḥ saptabhiḥ priye|
rudraśaktisamāveśaḥ sumahānsamprajāyate||20.29||

आविष्टो बहुवाक्यानि संस्कृतादीनि जल्पति।

महाहास्यं तथा गेयं शिवारुदितमेव च॥२०.३०॥

āviṣṭo bahuvākyāni saṁskṛtādīni jalpati|
mahāhāsyaṁ tathā geyaṁ śivāruditameva ca||20.30||

करोत्याविष्टचित्तस्तु न तु जानाति किञ्चन।

मासेनैवं यदा मुक्तो यत्र यत्रावलोकयेत्॥ २०.३१ ॥

karotyāviṣṭacittastu na tu jānāti kiñcana|
māsenaivaṁ yadā mukto yatra yatrāvalokayet||20.31||

तत्र तत्र दिशः सर्वा ईक्षते किरणाकुलाः।
यां यामेव दिशं षड्भिर्मासैर्युक्तस्तु वीक्षते॥ २०.३२ ॥

tatra tatra diśaḥ sarvā īkṣate kiraṇākulāḥ|
yāṁ yāmeva diśaṁ ṣaḍbhirmāsairyuktastu vīkṣate||20.32||

नानाकराणि रूपाणि तस्यां तस्यां प्रपश्यति।
न तेषु सन्दधेच्चेतो न चाभ्यासं परित्यजेत्॥ २०.३३ ॥

nānākarāṇi rūpāṇi tasyāṁ tasyāṁ prapaśyati|
na teṣu sandadhecceto na cābhyāsaṁ parityajet||20.33||

कुर्वन्नेतद्विधं योगी भीरुरुन्मत्तको भवेत्।
वीरः शक्तिं पुनर्याति प्रमादात्तद्गतोऽपि सन्॥ २०.३४ ॥

kurvannetadvidhaṁ yogī bhīrurunmattako bhavet|
vīraḥ śaktiṁ punaryāti pramādāttadgato'pi san||20.34||

वत्सराद्योगसंसिद्धिं प्राप्नोति मनसेप्सिताम्।
परापरामथैतस्या अपरां वा यथेच्छया॥ २०.३५॥

vatsarādyogasaṁsiddhiṁ prāpnoti manasepsitām|
parāparāmathaitasyā aparāṁ vā yathecchayā||20.35||

सद्भावं मातृसङ्घस्य हृदयं भैरवस्य वा।
नवात्मानमपि ध्यायेद्रतिशेखरमेव वा॥ २०.३६ ॥

sadbhāvaṁ mātṛsaṅghasya hṛdayaṁ bhairavasya vā|
navātmānamapi dhyāyedratiśekharameva vā||20.36||

अघोर्याद्यष्टकं वापि माहेश्यादिकमेव वा।
अमृतादिप्रभेदेन रुद्रान्वा शक्तयोऽपि वा॥ २०.३७॥

aghoryādyaṣṭakaṁ vāpi māheśyādikameva vā|

amṛtādiprabhedena rudrānvā śaktayo'pi vā||20.37||

सर्वे तुल्यबलाः प्रोक्ता रुद्रशक्तिसमुद्भवाः।

अथवामृतपूर्णानां प्रभेदः प्रोच्यते परः॥२०.३८॥

sarve tulyabalāḥ proktā rudraśaktisamudbhavāḥ|
athavāmṛtapūrṇānāṁ prabhedaḥ procyate paraḥ||20.38||

प्राणस्थं परयाक्रान्तं प्रत्येकमपि दीपितम्।

विद्यां प्रकल्पयेन्मन्त्रं प्राणाक्रान्तं परासनम्॥२०.३९॥

prāṇasthaṁ parayākrāntaṁ pratyekamapi dīpitam|
vidyāṁ prakalpayenmantraṁ prāṇākrāntaṁ parāsanam||20.39||

द्वादशारस्य चक्रस्य षोडशारस्य वा स्मरेत्।

अष्टारस्याथ वा देवि तस्य त्रेधा शतस्य वा॥२०.४०॥

dvādaśārasya cakrasya ṣoḍaśārasya vā smaret|
aṣṭārasyātha vā devi tasya tredhā śatasya vā||20.40||

षडरस्याथ वा मन्त्री यथा सर्वं तथा श्णु।

सङ्क्षेपादिदमाख्यातं सार्धं चक्रशतद्वयम्॥२०.४१॥

ṣaḍarasyātha vā mantrī yathā sarvaṁ tathā śṛṇu|
saṅkṣepādidamākhyātaṁ sārdhaṁ cakraśatadvayam||20.41||

एतत्त्रिगुणतां याति स्त्रीपुंयामलभेदतः।

शान्त्यादिकर्मभेदेन प्रत्येकं द्वादशात्मताम्॥२०.४२॥

etattriguṇatāṁ yāti strīpuṁyāmalabhedataḥ|
śāntyādikarmabhedena pratyekaṁ dvādaśātmatām||20.42||

दक्षश्चण्डो हरः शौण्डी प्रमथो भीममन्मथौ।

शकुनिः सुमतिर्नन्दो गोपालोऽथ पितामहः॥२०.४३॥

dakṣaścaṇḍo haraḥ śauṇḍī pramatho bhīmamanmathau|
śakuniḥ sumatirnando gopālo'tha pitāmahaḥ||20.43||

नन्दा भद्रा जया काली कराली विकृतानना।

क्रोष्टकी भीममुद्रा च वायुवेगा हयानना॥२०.४४॥

nandā bhadrā jayā kālī karālī vikṛtānanā|
kroṣṭakī bhīmamudrā ca vāyuvegā hayānanā||20.44||

गम्भीरा घोषणी चैव द्वादशैताः प्रकीर्तिताः।

आग्नेय्यादिचतुष्कोणा ब्रह्माण्याद्या अपि प्रिये॥२०.४५॥

gambhīrā ghoṣaṇī caiva dvādaśaitāḥ prakīrtitāḥ|
āgneyyādicatuṣkoṇā brahmāṇyādyā api priye||20.45||

सिद्धी ऋद्धिस्तथा लक्ष्मीर्दीप्तिर्माला शिखा शिवा।

सुमुखी वामनी नन्दा हरिकेशी हयानना॥२०.४६॥

siddhī ṛddhistathā lakṣmīrdīptirmālā śikhā śivā|
sumukhī vāmanī nandā harikeśī hayānanā||20.46||

विश्वेशी च सुमाख्या च एता वा द्वादश क्रमात्।

एतासां वाचका ज्ञेयाः स्वराः षण्ठविवर्जिताः॥२०.४७॥

viśveśī ca sumākhyā ca etā vā dvādaśa kramāt|
etāsāṁ vācakā jñeyāḥ svarāḥ ṣaṇṭhavivarjitāḥ||20.47||

षोडशारेऽमृताद्याश्च स्त्रीषुपाठप्रभेदतः।

श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्तिः शर्वरीश्वरः॥२०.४८॥

ṣoḍaśāre'mṛtādyāśca strīṣupāṭhaprabhedataḥ|
śrīkaṇṭho'nantasūkṣmau ca trimūrtiḥ śarvarīśvaraḥ||20.48||

अर्घेषो भारभूतिश्च स्थितिः स्थाणुर्हरस्तथा।

झिण्ठीशो भौतिकश्चैव सद्योजातस्तथापरः॥२०.४९॥

argheṣo bhārabhūtiśca sthitiḥ sthāṇurharastathā|
jhiṇṭhīśo bhautikaścaiva sadyojātastathāparaḥ||20.49||

अनुग्रहेश्वरः क्रूरो महासेनोऽथ षोडश।

सिद्धी ऋद्धिर्द्युतिर्लक्ष्मीर्मेधा कान्तिः स्वधा धृतिः॥२०.५०॥
anugraheśvaraḥ krūro mahāseno'tha ṣoḍaśa|
siddhī ṛddhirdyutirlakṣmīrmedhā kāntiḥ svadhā dhṛtiḥ||20.50||

दीप्तिः पुष्टिर्मतिः कीर्तिः संस्थितिः सुगतिः स्मृतिः।
सुप्रभा षोडशी चेति श्रीकण्ठादिकशक्तयः॥२०.५१॥
dīptiḥ puṣṭirmatiḥ kīrtiḥ saṁsthitiḥ sugatiḥ smṛtiḥ|
suprabhā ṣoḍaśī ceti śrīkaṇṭhādikaśaktayaḥ||20.51||

षोडशारे स्वरा ज्ञेया वाचकत्वेन सर्वतः।
अघोराद्यास्तथाष्टारे अघोर्याद्याश्च देवताः॥२०.५२॥
ṣoḍaśāre svarā jñeyā vācakatvena sarvataḥ|
aghorādyāstathāṣṭāre aghoryādyāśca devatāḥ||20.52||

माहेश्याद्यास्तथा देवि चतुर्विंशत्यतः शृणु।
नन्दादिकाः क्रमात्सर्वा ब्रह्माण्याद्यास्तथैव च॥२०.५३॥
māheśyādyāstathā devi caturviṁśatyataḥ śṛṇu|
nandādikāḥ kramātsarvā brahmāṇyādyāstathaiva ca||20.53||

संवर्तो लकुलीशश्च भृगुः श्वेतो बकस्तथा।
खड्गी पिनाकी भुजगो नवमो बलिरेव च॥२०.५४॥
saṁvarto lakulīśaśca bhṛguḥ śveto bakastathā|
khaḍgī pinākī bhujago navamo balireva ca||20.54||

महाकालो द्विरण्डश्च च्छगलाण्डः शिखी तथा।
लोहितो मेषमीनौ च त्रिदण्ड्याषाढिनामकौ॥२०.५५॥
mahākālo dviraṇḍaśca cchagalāṇḍaḥ śikhī tathā|
lohito meṣamīnau ca tridaṇḍyāṣāḍhināmakau||20.55||

उमाकान्तोऽर्धनारीशो दारुको लाङ्गुली तथा।
तथा सोमेशशर्माणौ चतुर्विंशत्यमी मताः॥२०.५६॥
umākānto'rdhanārīśo dāruko lāṅgulī tathā|

tathā someśaśarmāṇau caturviṁśatyamī matāḥ||20.56||

कादिभान्ताः परिज्ञेया अष्टारे याद्यमष्टकम्।

मकारो बिन्दुरूपस्थः सर्वेषामुपरि स्थितः॥२०.५७॥

kādibhāntāḥ parijñeyā aṣṭāre yādyamaṣṭakam|

makāro bindurūpasthaḥ sarveṣāmupari sthitaḥ||20.57||

जुङ्कारोऽथ तथा स्वाहा षडरे षट्क्रमेण तु।

बलिश्च बलिनन्दश्च दशग्रीवो हरो हयः॥२०.५८॥

juṅkāro'tha tathā svāhā ṣaḍare ṣaṭkrameṇa tu|

baliśca balinandaśca daśagrīvo haro hayaḥ||20.58||

माधवश्च महादेवि षष्ठः सम्परिकीर्तितः।

विश्वा विश्वेश्वरी चैव हाराद्री वीरनायिका॥२०.५९॥

mādhavaśca mahādevi ṣaṣṭhaḥ samparikīrtitaḥ|

viśvā viśveśvarī caiva hārādrī vīranāyikā||20.59||

अम्बा गुर्वीति योगिन्यो बीजैस्तैरेव षट् स्मृताः।

अन्योन्यवलिताः सर्वे स्वाम्यावरणभेदतः॥२०.६०॥

ambā gurvīti yoginyo bījaistaireva ṣaṭ smṛtāḥ|

anyonyavalitāḥ sarve svāmyāvaraṇabhedataḥ||20.60||

अकारादिक्षकारान्ताः सर्वसिद्धिफलप्रदाः।

ध्यानाराधनयुक्तानां योगिनां मन्त्रिणामपि॥२०.६१॥

akārādikṣakārāntāḥ sarvasiddhiphalapradāḥ|

dhyānārādhanayuktānāṁ yogināṁ mantriṇāmapi||20.61||

अथवा सर्वचक्राणां मध्ये विद्यां यथेप्सिताम्।

मन्त्रं वा पूर्वमुद्दिष्टं जपन्ध्यायन्प्रसिध्यति॥२०.६२॥

athavā sarvacakrāṇāṁ madhye vidyāṁ yathepsitām|

mantraṁ vā pūrvamuddiṣṭaṁ japandhyāyanprasidhyati||20.62||

इति सङ्क्षेपतः प्रोक्तः सर्वकामफलप्रदम्।
iti saṅkṣepataḥ proktaḥ sarvakāmaphalapradam|

इति श्रीमालिनीविजयोत्तरे तन्त्रे सर्वमन्त्रनिर्णयो नाम विंशतितमोऽधिकारः॥२०॥
iti śrīmālinīvijayottare tantre sarvamantranirṇayo nāma viṁśatitamo'dhikāraḥ||20||

चन्द्राकृष्ट्यधिकारः एकविंशतितमः २१ ॥

अथ एकविंशतितमोऽधिकारः।
atha ekaviṁśatitamo'dhikāraḥ|

अथातः परमं गुह्यं शिवज्ञानामृतोत्तमम्।
व्याधिमृत्युविनाशाय योगिनामुपवर्ण्यते॥ २१.१॥
athātaḥ paramaṁ guhyaṁ śivajñānāmṛtottamam|
vyādhimṛtyuvināśāya yogināmupavarṇyate||21.1||

षोडशारे खगे चक्रे चन्द्रकल्पितकर्णिके।
स्वरूपेण परां तत्र स्रवन्तीममृतं स्मरेत्॥ २१.२॥
ṣoḍaśāre khage cakre candrakalpitakarṇike|
svarūpeṇa parāṁ tatra sravantīmamṛtaṁ smaret||21.2||

पूर्वन्यासेन सन्नद्धः क्षणमेकं विचक्षणः।
ततस्तु रसनां नीत्वा लम्बके विनियोजयत्॥ २१.३॥
pūrvanyāsena sannaddhaḥ kṣaṇamekaṁ vicakṣaṇaḥ|
tatastu rasanāṁ nītvā lambake viniyojayat||21.3||

स्रवन्तममृतं दिव्यं चन्द्रबिम्बसितं स्मरेत्।
मुखमापूर्यते तस्य किञ्चिल्लवणवारिणा॥ २१.४॥
sravantamamṛtaṁ divyaṁ candrabimbasitaṁ smaret|
mukhamāpūryate tasya kiñcillavaṇavāriṇā||21.4||

लोहगन्धेन तच्चात्र न पिवेत्किन्तु निक्षिपेत्।
एवं समभ्यसेत्तावद्यावत्तत्स्वादु जायते॥ २१.५॥
lohagandhena taccātra na pivetkintu nikṣipet|
evaṁ samabhyasettāvadyāvattatsvādu jāyate||21.5||

जराव्याधिविनिर्मुक्तो जायते तत्पिवंस्ततः।

पड्भिर्मासैरनायासाद्वत्सरान्मृत्युजिद्भवेत्॥ २१.६॥

jarāvyādhivinirmukto jāyate tatpivaṁstataḥ|
paḍbhirmāsairanāyāsādvatsarānmṛtyujidbhavet||21.6||

तत्र स्वादुनि सञ्जाते तदाप्रभृति तत्रगम्।

यदेव चिन्तयेद्द्रव्यं तेनास्यापूर्यते मुखम्॥ २१.७॥

tatra svāduni sañjāte tadāprabhṛti tatragam|
yadeva cintayeddravyaṁ tenāsyāpūryate mukham||21.7||

रुधिरं मदिरां वाथ वसां वा क्षीरमेव वा।

घृततैलादिकं वाथ द्रवद्द्रव्यमनन्यधीः॥ २१.८॥

rudhiraṁ madirāṁ vātha vasāṁ vā kṣīrameva vā|
ghṛtatailādikaṁ vātha dravaddravyamananyadhīḥ||21.8||

अथान्यं सम्प्रवक्ष्यामि सङ्क्रान्तिविधिमुत्तमम्।

मृते जीवच्छरीरे तु प्रविशेद्योगविद्यया॥ २१.९॥

athānyaṁ sampravakṣyāmi saṅkrāntividhimuttamam|
mṛte jīvaccharīre tu praviśedyogavidyayā||21.9||

निवातस्थो जितप्राणो जितासनविधिक्रमः।

कुर्वीत वायुनावेशमर्कतूले शनैः शनैः॥ २१.१०॥

nivātastho jitaprāṇo jitāsanavidhikramaḥ|
kurvīta vāyunāveśamarkatūle śanaiḥ śanaiḥ||21.10||

स्वादाकृष्टिविधिं यावद्गुडे निम्बे च कारयेत्।

श्रीखण्डगुडकर्पूरैस्ततः कृत्वाकृतिं शुभाम्॥ २१.११॥

svādākṛṣṭividhiṁ yāvadguḍe nimbe ca kārayet|
śrīkhaṇḍaguḍakarpūraistataḥ kṛtvākṛtiṁ śubhām||21.11||

प्रगुणामगुण … … … न्यङ्गेषु सन्दधत्।

न्यासं कृत्वापि तत्रापि वेधं कुर्याच्छनैः शनैः॥२१.१२॥
praguṇāmaguṇa ... ... ... nyaṅgeṣu sandadhat|
nyāsaṁ kṛtvāpi tatrāpi vedhaṁ kuryācchanaiḥ śanaiḥ||21.12||

निरोधं तत्र कुर्वीत घट्टनं तदनन्तरम्।
घट्टनं नाम विज्ञेयमङ्गप्रत्यङ्गचालनम्॥२१.१३॥
nirodhaṁ tatra kurvīta ghaṭṭanaṁ tadanantaram|
ghaṭṭanaṁ nāma vijñeyamaṅgapratyaṅgacālanam||21.13||

एवमभ्यसतस्तस्य योगयुक्तस्य योगिनः।
चलते प्रतिमा सा तु धावते चापि संमुखी॥२१.१४॥
evamabhyasatastasya yogayuktasya yoginaḥ|
calate pratimā sā tu dhāvate cāpi saṁmukhī||21.14||

पुनस्तां प्रेरयेत्तावद्यावत्स्वस्थानमागताम्।
पतितां चालयेद्भूय उत्तानां पार्श्वतः स्थिताम्॥२१.१५॥
punastāṁ prerayettāvadyāvatsvasthānamāgatām|
patitāṁ cālayedbhūya uttānāṁ pārśvataḥ sthitām||21.15||

एवं सर्वात्मनस्तावद्यावत्स्ववशतां गता।
ततः प्रभृत्यसौ योगी प्रविशेद्यत्र रोचते॥२१.१६॥
evaṁ sarvātmanastāvadyāvatsvavaśatāṁ gatā|
tataḥ prabhṛtyasau yogī praviśedyatra rocate||21.16||

मृते जीवच्छरीरे वा सङ्क्रान्त्याक्रान्तिभेदतः।
प्रक्षिप्य जलवच्छक्तिजालं सर्वाङ्गसन्धिषु॥२१.१७॥
mṛte jīvaccharīre vā saṅkrāntyākrāntibhedataḥ|
prakṣipya jalavacchaktijālaṁ sarvāṅgasandhiṣu||21.17||

प्रत्यङ्गमङ्गतस्तस्य शक्तिं तेनाक्रमेद्बुधः।
स्वकीयं रक्षयेद्देहमाक्रान्तावन्यथा त्यजेत्॥२१.१८॥
pratyaṅgamaṅgatastasya śaktiṁ tenākramedbudhaḥ|

svakīyaṁ rakṣayeddehahamākrāntāvanyathā tyajet||21.18||

बहून्यपि शरीराणि दृढलक्ष्यो यदा भवेत्।

तदा गृह्णात्यसन्देहं युगपत्सन्त्यजन्नपि॥२१.१९॥

bahūnyapi śarīrāṇi dṛḍhalakṣyo yadā bhavet|
tadā gṛhṇātyasandehaṁ yugapatsantyajannapi||21.19||

अथापरं प्रवक्ष्यामि सद्यः प्रत्ययकारकम्।

समाधानामृतं दिव्यं योगिनां मृत्युनाशनम्॥२१.२०॥

athāparaṁ pravakṣyāmi sadyaḥ pratyayakārakam|
samādhānāmṛtaṁ divyaṁ yogināṁ mṛtyunāśanam||21.20||

चन्द्राकृष्टिकरं नाम मासाद्वा योगभोगदम्।

शुक्लपक्षे द्वितीयायां मेषस्थे तिग्मरोचिषि॥२१.२१॥

candrākṛṣṭikaraṁ nāma māsādvā yogabhogadam|
śuklapakṣe dvitīyāyāṁ meṣasthe tigmarociṣi||21.21||

स्नातः शुचिर्निराहारः कृतपूजाविधिर्बुधः।

न्यसेच्चन्द्रे कलाजालं परया समधिष्ठितम्॥२१.२२॥

snātaḥ śucirnirāhāraḥ kṛtapūjāvidhirbudhaḥ|
nyaseccandre kalājālaṁ parayā samadhiṣṭhitam||21.22||

सर्वबाधापरित्यक्ते प्रदेशे संस्थितो बुधः।

एकचित्तः प्रशान्तात्मा शिवसद्भावभावितः॥२१.२३॥

sarvabādhāparityakte pradeśe saṁsthito budhaḥ|
ekacittaḥ praśāntātmā śivasadbhāvabhāvitaḥ||21.23||

तावदालोकयेच्चन्द्रं यावदस्तमुपागतः।

ततो भुञ्जीत दुग्धेन चन्द्रध्यानसमन्वितः॥२१.२४॥

tāvadālokayeccandraṁ yāvadastamupāgataḥ|
tato bhuñjīta dugdhena candradhyānasamanvitaḥ||21.24||

एवं दिने दिने कुर्याद्यावत्पञ्चदशी भवेत्।

शेषां रात्रिं स्वपेद्ध्यायंश्चन्द्रबिम्बगतां पराम्॥२१.२५॥

evaṁ dine dine kuryādyāvatpañcadaśī bhavet|
śeṣāṁ rātriṁ svapeddhyāyaṁścandrabimbagatāṁ parām||21.25||

पौर्णमास्यां तथा योगी अर्धरात्र उपस्थितः।

जने निःशब्दतां याते प्रसुप्ते सर्वजन्तुभिः॥२१.२६॥

paurṇamāsyāṁ tathā yogī ardharātra upasthitaḥ|
jane niḥśabdatāṁ yāte prasupte sarvajantubhiḥ||21.26||

चन्द्रकोटिकरप्रख्यां तारहारविभूषणाम्।

सिताम्बरपरीधानां सितचन्दनचर्चिताम्॥२१.२७॥

candrakoṭikaraprakhyāṁ tārahāravibhūṣaṇām|
sitāmbaraparīdhānāṁ sitacandanacarcitām||21.27||

मौक्तिकाभरणोपेतां सुरूपां नवयौवनाम्।

आप्यायनकरीं देवीं समन्तादमृतस्रवाम्॥२१.२८॥

mauktikābharaṇopetāṁ surūpāṁ navayauvanām|
āpyāyanakarīṁ devīṁ samantādamṛtasravām||21.28||

राजीवासनसंस्थां च योगनिद्रामवस्थिताम्।

चन्द्रबिम्बे परां देवीमीक्षते नात्र संशयः॥२१.२९॥

rājīvāsanasaṁsthāṁ ca yoganidrāmavasthitām|
candrabimbe parāṁ devīmīkṣate nātra saṁśayaḥ||21.29||

ततस्तां चेतसा व्याप्य तावदाकर्षयेत्सुधीः।

यावन्मुखाग्रमायाता तत्र कुर्यात्स्थिरं मनः॥२१.३०॥

tatastāṁ cetasā vyāpya tāvadākarṣayetsudhīḥ|
yāvanmukhāgramāyātā tatra kuryātsthiraṁ manaḥ||21.30||

ततः प्रसार्य वदनं ध्यानासक्तेन चेतसा।

निगिरेत्तां समाकृष्य भूयो हृदि विचिन्तयेत्॥२१.३१॥
tataḥ prasārya vadanaṁ dhyānāsaktena cetasā|
nigirettāṁ samākṛṣya bhūyo hṛdi vicintayet||21.31||

तया प्रविष्टया देहं योगी दुःखविवर्जितः।
शक्तितुल्यबलो भूत्वा जीवेदाचन्द्रतारकम्॥२१.३२॥
tayā praviṣṭayā dehaṁ yogī duḥkhavivarjitaḥ|
śaktitulyabalo bhūtvā jīvedācandratārakam||21.32||

एकोऽप्यनेकधात्मानं संविभज्य निजेच्छया।
त्रैलोक्यं यौगपद्येन भुनक्ति वशतां गतम्॥२१.३३॥
eko'pyanekadhātmānaṁ saṁvibhajya nijecchayā|
trailokyaṁ yaugapadyena bhunakti vaśatāṁ gatam||21.33||

आसाद्य विपुलान्भोगान्प्रलये समुपस्थिते।
परमभ्येति निर्वाणं दुष्पापमकृतामनाम्॥२१.३४॥
āsādya vipulānbhogānpralaye samupasthite|
paramabhyeti nirvāṇaṁ duṣpāpamakṛtāmanām||21.34||

अथवा तन्न शक्नोति गगने परिचिन्तितुम्।
प्रतिबिम्बे तथा ध्यायेदुदकादिषु पूर्ववत्॥२१.३५॥
athavā tanna śaknoti gagane paricintitum|
pratibimbe tathā dhyāyedudakādiṣu pūrvavat||21.35||

तत्पीत्वा मनसा शेषां स्वपेद्रात्रिमनुस्मरन्।
पूरोक्तं समवाप्नोति षड्भिर्मासैरखण्डितम्॥२१.३६॥
tatpītvā manasā śeṣāṁ svapedrātrimanusmaran|
pūroktaṁ samavāpnoti ṣaḍbhirmāsairakhaṇḍitam||21.36||

इति श्रीमालिनीविजयोत्तरे तन्त्रे चन्द्राकृष्ट्यधिकार एकविंशतितमः॥२१॥
iti śrīmālinīvijayottare tantre candrākṛṣṭyadhikāra ekaviṁśatitamaḥ||21||

अथ द्वाविंशतितमोऽधिकारः।
atha dvāviṁśatitamo'dhikāraḥ|

अथान्यत्परमं गुह्यं कथयामि तव प्रिये।
यन्न कस्यचिदाख्यातं योगामृतमनुत्तमम्॥२२.१॥
athānyatparamaṁ guhyaṁ kathayāmi tava priye|
yanna kasyacidākhyātaṁ yogāmṛtamanuttamam||22.1||

सूर्याकृष्टिकरं नाम योगिनां योगसिद्धिदम्।
सम्यङ्मासचतुष्केण दिनाष्टाभ्यधिकेन तु॥२२.२॥
sūryākṛṣṭikaraṁ nāma yogināṁ yogasiddhidam|
samyaṅmāsacatuṣkeṇa dināṣṭābhyadhikena tu||22.2||

प्रहरस्याष्टमो भागो नाडीकेत्यभिधीयते।
तत्पादक्रमवृद्ध्या तु प्रतिवासरमभ्यसेत्॥२२.३॥
praharasyāṣṭamo bhāgo nāḍīketyabhidhīyate|
tatpādakramavṛddhyā tu prativāsaramabhyaset||22.3||

उदयास्तमयं यावद्यत्र सूर्यः प्रदृश्यते।
प्रदेशे तत्र विजने सर्वबाधाविवर्जिते॥२२.४॥
udayāstamayaṁ yāvadyatra sūryaḥ pradṛśyate|
pradeśe tatra vijane sarvabādhāvivarjite||22.4||

अहोरात्रोषितो योगी मकरस्थे दिवाकरे।
शूचिर्भूत्वा कृतन्यासः कृतशीतप्रतिक्रियः॥२२.५॥
ahorātroṣito yogī makarasthe divākare|
śūcirbhūtvā kṛtanyāsaḥ kṛtaśītapratikriyaḥ||22.5||

भानुबिम्बे न्यसेच्चक्रमष्टषट्द्वादशारकम्।
शिवशक्तिगणोपेतं भैरवाष्टकसंयुतम्॥२२.६॥
bhānubimbe nyaseccakramaṣṭaṣaṭdvādaśārakam|
śivaśaktigaṇopetaṁ bhairavāṣṭakasaṁyutam||22.6||

वर्षादिरृतुसंयुक्तं मासैरृक्षादिभिर्युतम्।
अष्टारं चिन्तयेद्बिम्बे शेषं रश्मिषु चिन्तयेत्॥२२.७॥
varṣādirṛtusaṁyuktaṁ māsairṛkṣādibhiryutam|
aṣṭāraṁ cintayedbimbe śeṣaṁ raśmiṣu cintayet||22.7||

तत्र चित्तं समाधाय प्रोक्तकालं विवक्षणः।
अनिमीलितनेत्रस्तु भानुबिम्बं निरीक्षयेत्॥२२.८॥
tatra cittaṁ samādhāya proktakālaṁ vivakṣaṇaḥ|
animīlitanetrastu bhānubimbaṁ nirīkṣayet||22.8||

ततः काले व्यतिक्रान्ते सुनिमीलितलोचनः।
प्रविशेदन्धकारान्तर्भुवनं निरुपद्रवम्॥२२.९॥
tataḥ kāle vyatikrānte sunimīlitalocanaḥ|
praviśedandhakārāntarbhuvanaṁ nirupadravam||22.9||

तत्रोन्मीलितनेत्रस्तु बिम्बाकारं प्रपश्यति।
सन्धाय तत्र चैतन्यं तिष्ठेद्यावन्न पश्यति॥२२.१०॥
tatronmīlitanetrastu bimbākāraṁ prapaśyati|
sandhāya tatra caitanyaṁ tiṣṭhedyāvanna paśyati||22.10||

नष्टेऽपि चेतसा शेषं तिष्ठेत्कालमनुस्मरन्।
एवं पासेन देवेशि स्थिरं तदुपजायते॥२२.११॥
naṣṭe'pi cetasā śeṣaṁ tiṣṭhetkālamanusmaran|
evaṁ pāsena deveśi sthiraṁ tadupajāyate||22.11||

मासद्वयेन सर्वत्र प्रेक्षते नात्र संशयः।

त्रिभिः समीक्षते सर्वं रविबिम्बसमाकुलम्॥२२.१२॥

māsadvayena sarvatra prekṣate nātra saṁśayaḥ|
tribhiḥ samīkṣate sarvaṁ ravibimbasamākulam||22.12||

प्रोक्तकालावसानेन वृषस्थे तिग्मरोचिषि।

प्रेक्षते सूर्यबिम्बान्तः सचक्रं परमेश्वरम्॥२२.१३॥

proktakālāvasānena vṛṣasthe tigmarociṣi|
prekṣate sūryabimbāntaḥ sacakraṁ parameśvaram||22.13||

उपलब्धं समाकृष्य मुखाग्ने स्थिरतां नयेत्।

आपीय पूर्ववत्पश्चाद्वृत्तिं निश्चलतां नयेत्॥२२.१४॥

upalabdhaṁ samākṛṣya mukhāgne sthiratāṁ nayet|
āpīya pūrvavatpaścādvṛttiṁ niścalatāṁ nayet||22.14||

तत्र तेन सहात्मानमेकीकृत्य मुहूर्तकम्।

यावत्तिष्ठति देवेशि तावत्सन्त्यजति क्षितिम्॥२२.१५॥

tatra tena sahātmānamekīkṛtya muhūrtakam|
yāvattiṣṭhati deveśi tāvatsantyajati kṣitim||22.15||

पश्यतो जनवृन्दस्य याति सूर्येण चैकतः।

अनेन विधिना देवि सिद्धयोगीश्वरेश्वरः॥२२.१६॥

paśyato janavṛndasya yāti sūryeṇa caikataḥ|
anena vidhinā devi siddhayogīśvareśvaraḥ||22.16||

शिवाद्यवनिपर्यन्तं न क्वचित्प्रतिहन्यते।

भुक्त्वा तु विपुलान्भोगान्निष्कले लीयते परे॥२२.१७॥

śivādyavaniparyantaṁ na kvacitpratihanyate|
bhuktvā tu vipulānbhogānniṣkale līyate pare||22.17||

तदेतत् खेचरीचक्रं यत्र खेचरतां व्रजेत्।

सिद्धयोगीश्वरीतन्त्रे सरहस्यमुदाहृतम्॥२२.१८॥

tadetat khecarīcakraṁ yatra khecaratāṁ vrajet|

siddhayogīśvarītantre sarahasyamudāhṛtam||22.18||

अथवा चक्ररूपेण सबाह्याभ्यन्तरं स्वकम्।
देहं चिन्तयतः पूर्वं फलं स्यान्निश्चितात्मनः॥२२.१९॥
athavā cakrarūpeṇa sabāhyābhyantaraṁ svakam|
dehaṁ cintayataḥ pūrvaṁ phalaṁ syānniścitātmanaḥ||22.19||

उच्चरन्फादिनान्ता वा ध्वनिज्योतिर्मरुद्युताम्।
विश्राम्य मस्तके चित्तं क्षणमेकं विचक्षणः॥२२.२०॥
uccaranphādināntā vā dhvanijyotirmarudyutām|
viśrāmya mastake cittaṁ kṣaṇamekaṁ vicakṣaṇaḥ||22.20||

त्रीशूलेन प्रयोगेन सद्यस्त्यजति मेदिनीम्।
एवं समभ्यसन्मासाच्चक्रवद्भ्रमति क्षितौ॥२२.२१॥
trīśūlena prayogena sadyastyajati medinīm|
evaṁ samabhyasanmāsāccakravadbhramati kṣitau||22.21||

मुहूर्तं स्पृशते भूमिं मुहूर्ताच्च नभस्तलम्।
शिवारावादि कुरुते वलनास्फोटनानि च॥२२.२२॥
muhūrtaṁ spṛśate bhūmiṁ muhūrtācca nabhastalam|
śivārāvādi kurute valanāsphoṭanāni ca||22.22||

मुद्राबन्धादिकं वाथ भाषा वा वक्त्यनेकधा।
षण्मासान्मेदिनी त्यक्त्वा समाधिस्थो दृढेन्द्रियः॥२२.२३॥
mudrābandhādikaṁ vātha bhāṣā vā vaktyanekadhā|
ṣaṇmāsānmedinī tyaktvā samādhistho dṛḍhendriyaḥ||22.23||

तिष्ठते हस्तमात्रेण गगने योगचिन्तकः।
पश्यते योगिनीवृन्दमनेकाकारलक्षणम्॥२२.२४॥
tiṣṭhate hastamātreṇa gagane yogacintakaḥ|
paśyate yoginīvṛndamanekākāralakṣaṇam||22.24||

संवत्सरेण युक्तात्मा तत्समानः प्रजायते।

पश्यतामेव लोकानां तेजोभिर्भासयन्दिशः॥२२.२५॥

saṁvatsareṇa yuktātmā tatsamānaḥ prajāyate|
paśyatāmeva lokānāṁ tejobhirbhāsayandiśaḥ||22.25||

यात्युत्कृष्य महीपृष्ठात् खेचरीणां पतिर्भवेत्।

मुद्रा खगेश्वरी नाम कथिता योगिनीमते॥२२.२६॥

yātyutkṛṣya mahīpṛṣṭhāt khecarīṇāṁ patirbhavet|
mudrā khageśvarī nāma kathitā yoginīmate||22.26||

जागरित्वाथ वा योगी त्र्यहोरात्रमतन्द्रितः।

चतुर्थेऽह्नि निशारम्भे पूजयित्वा महेश्वरम्॥२२.२७॥

jāgaritvātha vā yogī tryahorātramatandritaḥ|
caturthe'hni niśārambhe pūjayitvā maheśvaram||22.27||

ततोऽन्धकारे बहुले कृतरक्षाविधिर्बुधः।

भ्रुवोर्मध्ये समाधाय क्षणं चेतः प्रपश्यति॥२२.२८॥

tato'ndhakāre bahule kṛtarakṣāvidhirbudhaḥ|
bhruvormadhye samādhāya kṣaṇaṁ cetaḥ prapaśyati||22.28||

तेजो रूपप्रतीकाशं पर्यङ्कासनमास्थितः।

प्रयोगं त्वेव सततं योगयुक्तः समभ्यसेतु॥२२.२९॥

tejo rūpapratīkāśaṁ paryaṅkāsanamāsthitaḥ|
prayogaṁ tveva satataṁ yogayuktaḥ samabhyasetu||22.29||

पश्यते मासमात्रेण गृहान्तर्वस्तु यत् स्थितम्।

द्वाभ्यां बहिः स्थितं सर्वं त्रिभिः पत्तनसंस्थितम्॥२२.३०॥

paśyate māsamātreṇa gṛhāntarvastu yat sthitam|
dvābhyāṁ bahiḥ sthitaṁ sarvaṁ tribhiḥ pattanasaṁsthitam||22.30||

चतुर्भिर्विषयान्तःस्थं पञ्चभिर्मण्डलावधि।

षड्भिर्मासैर्महायोगी च्छिद्रां पश्यति मेदिनीम्॥२२.३१॥

caturbhirvipayāntaḥsthaṁ pañcabhirmaṇḍalāvadhi|
ṣaḍbhirmāsairmahāyogī cchidrāṁ paśyati medinīm||22.31||

सर्वज्ञत्वमवाप्नोति वत्सरान्नात्र संशयः।

योगिनीसिद्धसङ्घस्य सद्भावव्याप्तिसंस्थितम्॥२२.३२॥

sarvajñatvamavāpnoti vatsarānnātra saṁśayaḥ|
yoginīsiddhasaṅghasya sadbhāvavyāptisaṁsthitam||22.32||

पश्यते योगयुक्तात्मा तत्समानश्च जायते।

अनेनैव विधानेन स्वस्तिकासनसंस्थितः॥२२.३३॥

paśyate yogayuktātmā tatsamānaśca jāyate|
anenaiva vidhānena svastikāsanasaṁsthitaḥ||22.33||

बिन्दुं नानाविधं त्यक्त्वा शुद्धरूपमनुस्मरेत्।

तेनापि सर्वं पूर्वोक्तं व्याप्नोति फलमुत्तमम्॥२२.३४॥

binduṁ nānāvidhaṁ tyaktvā śuddharūpamanusmaret|
tenāpi sarvaṁ pūrvoktaṁ vyāpnoti phalamuttamam||22.34||

इति श्रीमालिनीविजयोत्तरे तन्त्रे सूर्याकृष्ट्यधिकारो द्वाविंशतितमः॥२२॥

iti śrīmālinīvijayottare tantre sūryākṛṣṭyadhikāro dvāviṁśatitamaḥ||22||

## सद्योपलब्ध्यधिकारः त्रयोविंशतितमः २३ ॥

अथ त्रयोविंशतितमोऽधिकारः।
atha trayoviṁśatitamo'dhikāraḥ|

अथातः परमं गुह्यं कथयामि तवाधुना।
सद्योपलब्धिजनकं योगिनां योगसिद्धये॥ २३.१ ॥
athātaḥ paramaṁ guhyaṁ kathayāmi tavādhunā|
sadyopalabdhijanakaṁ yogināṁ yogasiddhaye||23.1||

पूर्वन्यासेन सन्नद्धश्चित्तं श्रोत्रे निवेशयेत्।
निवाते स्वल्पवाते वा बाह्यशब्दविवर्जिते॥ २३.२ ॥
pūrvanyāsena sannaddhaścittaṁ śrotre niveśayet|
nivāte svalpavāte vā bāhyaśabdavivarjite||23.2||

ततस्तत्र शृणोत्येष योगी ध्वनिमनावृतम्।
सुविशुद्धस्य कांस्यस्य हतस्येह मुहुर्मुहुः॥ २३.३ ॥
tatastatra śṛṇotyeṣa yogī dhvanimanāvṛtam|
suviśuddhasya kāṁsyasya hatasyeha muhurmuhuḥ||23.3||

यमाकर्ण्य महादेवि पुण्यपापैः प्रमुच्यते।
तत्र सन्धाय चैतन्यं षण्मासाद्योगवित्तमः॥ २३.४ ॥
yamākarṇya mahādevi puṇyapāpaiḥ pramucyate|
tatra sandhāya caitanyaṁ ṣaṇmāsādyogavittamaḥ||23.4||

रुतं पक्षिगणस्यापि प्रस्फुटं वेत्त्ययत्नतः।
दूराच्छ्रवणविज्ञानं वत्सरेणास्य जायते॥ २३.५ ॥
rutaṁ pakṣigaṇasyāpi prasphuṭaṁ vettyayatnataḥ|
dūrācchravaṇavijñānaṁ vatsareṇāsya jāyate||23.5||

सर्वकामफलावाप्तिर्वत्सरत्रितयेन च।

सिद्ध्यतीति किमाश्चर्यमनायासेन सिद्ध्यति॥ २३.६॥

sarvakāmaphalāvāptirvatsaratritayena ca|
siddhyatīti kimāścaryamanāyāsena siddhyati||23.6||

अथवा ग्रहणे मासि कृत्वा सूर्यं तु पृष्ठतः।

पूर्वन्यासेन सन्नद्धः किञ्चिद्भित्तिमदाश्रितः॥ २३.७॥

athavā grahaṇe māsi kṛtvā sūryaṁ tu pṛṣṭhataḥ|
pūrvanyāsena sannaddhaḥ kiñcidbhittimadāśritaḥ||23.7||

लक्षयेदात्मनश्छायां मस्तकोर्ध्वमनाहताम्।

धूमवर्तिविनिष्क्रान्तां तद्गतेनान्तरात्मना॥ २३.८॥

lakṣayedātmanaśchāyāṁ mastakordhvamanāhatām|
dhūmavartiviniṣkrāntāṁ tadgatenāntarātmanā||23.8||

याति तन्मयता तत्र योगयुक्तो यथा यथा।

तथा तथास्य महती सा वित्तिरुपजायते॥ २३.९॥

yāti tanmayatā tatra yogayukto yathā yathā|
tathā tathāsya mahatī sā vittirupajāyate||23.9||

ततस्तत्र महातेजः स्फुरत्किरणसन्निभम्।

पश्यते यत्र दृष्टेऽपि सर्वपापक्षयो भवेत्॥ २३.१०॥

tatastatra mahātejaḥ sphuratkiraṇasannibham|
paśyate yatra dṛṣṭe'pi sarvapāpakṣayo bhavet||23.10||

तदस्याभ्यसतो मासात्सर्वत्र प्रविसर्पति।

ज्वालामालाकुलाकारा दिशः सर्वाः प्रपश्यति॥ २३.११॥

tadasyābhyasato māsātsarvatra pravisarpati|
jvālāmālākulākārā diśaḥ sarvāḥ prapaśyati||23.11||

षण्मासमभ्यसन्योगी सर्वज्ञत्वमवाप्नुयात्।

अब्दं दिव्यतनुर्भूत्वा शिववन्मोदते चिरम्॥२३.१२॥

ṣaṇmāsamabhyasanyogī sarvajñatvamavāpnuyāt|
abdaṁ divyatanurbhūtvā śivavanmodate ciram||23.12||

अथ जात्यः प्रवक्ष्यन्ते सपूर्वासनशाश्वताः।

हीं क्ष्लां क्ष्वीं वं तथा क्षं च पञ्चकस्य यथाक्रमम्॥२३.१३॥

atha jātyaḥ pravakṣyante sapūrvāsanaśāśvatāḥ|
hīṁ kṣlāṁ kṣvīṁ vaṁ tathā kṣaṁ ca pañcakasya yathākramam||23.13||

हं यं रं लं तथा वं च पञ्चकस्यापरस्य च।

ॠं ॠं ऌं ॡं तथा ॐ औं हः अं आकर्णिकावधौ॥२३.१४॥

haṁ yaṁ raṁ laṁ tathā vaṁ ca pañcakasyāparasya ca|
ṛṁ ṝṁ ḷṁ ḹṁ tathā oṁ auṁ haḥ aṁ ākarṇikāvadhau||23.14||

केसरेषु भकारान्ता हं हां हिं हीं च हुं तथा।

हूं हें हैं च दलेष्वेवं स्वसञ्ज्ञाभिश्च शक्तयः॥२३.१५॥

kesareṣu bhakārāntā haṁ hāṁ hiṁ hīṁ ca huṁ tathā|
hūṁ heṁ haiṁ ca daleṣvevaṁ svasañjñābhiśca śaktayaḥ||23.15||

मण्डलत्रितये शेषं सूक्ष्मं प्रेतस्य कल्पयेत्।

ज्रकारं शूलशृङ्गाणामित्येतत्परिकीर्तितम्॥२३.१६॥

maṇḍalatritaye śeṣaṁ sūkṣmaṁ pretasya kalpayet|
jrakāraṁ śūlaśṛṅgāṇāmityetatparikīrtitam||23.16||

अनुक्तासनयोगेषु सर्वत्रैवं प्रकल्पयेत्।

नमः स्वाहा तथा वौषट् हुं वषट् फट् च जातयः॥२३.१७॥

anuktāsanayogeṣu sarvatraivaṁ prakalpayet|
namaḥ svāhā tathā vauṣaṭ huṁ vaṣaṭ phaṭ ca jātayaḥ||23.17||

प्रायश्चित्तेषु सर्वेषु जपेन्मालामखण्डिताम्।

भिन्नां वाप्यथवाभिन्नामतिक्रमबलाबलाम्॥२३.१८॥

prāyaścitteṣu sarveṣu japenmālāmakhaṇḍitām|

bhinnāṁ vāpyathavābhinnāmatikramabalābalām||23.18||

सकृज्जपात्समारभ्य यावल्लक्षत्रयं प्रिये।

प्राणवृत्तिनिरोधेन ततः परतरं क्वचित्॥२३.१९॥

sakṛjjapātsamārabhya yāvallakṣatrayaṁ priye|
prāṇavṛttinirodhena tataḥ parataraṁ kvacit||23.19||

सदा भ्रमणशीलानां पीठक्षेत्रादिकं बहिः।

प्रयोगं सम्प्रवक्ष्यामि सुखसिद्धिफलप्रदम्॥२३.२०॥

sadā bhramaṇaśīlānāṁ pīṭhakṣetrādikaṁ bahiḥ|
prayogaṁ sampravakṣyāmi sukhasiddhiphalapradam||23.20||

नासाक्रान्तं महाप्राणं दण्डरूपं सबिन्दुकम्।

तद्वद्गुह्यं च कुर्वीत विद्येयं द्व्यक्षरां मता॥२३.२१॥

nāsākrāntaṁ mahāprāṇaṁ daṇḍarūpaṁ sabindukam|
tadvadguhyaṁ ca kurvīta vidyeyaṁ dvyakṣarāṁ matā||23.21||

अस्याः पूर्वोक्तविधिना कृतसेवः प्रसन्नधीः।

पीठादिकं भ्रमेत्सिद्ध्यै नान्यथा वीरवन्दिते॥२३.२२॥

asyāḥ pūrvoktavidhinā kṛtasevaḥ prasannadhīḥ|
pīṭhādikaṁ bhrametsiddhyai nānyathā vīravandite||23.22||

तत्प्रदेशं समासाद्य मन्त्रैरात्मानमादरात्।

विद्यया वेष्टयेत्स्थानं रक्तसूत्रसमानया॥२३.२३॥

tatpradeśaṁ samāsādya mantrairātmānamādarāt|
vidyayā veṣṭayetsthānaṁ raktasūtrasamānayā||23.23||

बहुधानन्यचित्तस्तु सबाह्याभ्यन्तरं बुधः।

ततस्तत्र क्वचित्क्षेत्रे योगिन्या भीमविक्रमाः॥२३.२४॥

bahudhānanyacittastu sabāhyābhyantaraṁ budhaḥ|
tatastatra kvacitkṣetre yoginyā bhīmavikramāḥ||23.24||

समागत्य प्रयच्छन्ति सम्प्रदायं स्वकं स्वकम्।

येनासौ लब्धमात्रेण सम्प्रदायेन सुब्रते॥ २३.२५॥

samāgatya prayacchanti sampradāyaṁ svakaṁ svakam|
yenāsau labdhamātreṇa sampradāyena subrate||23.25||

तत्समानबलो भूत्वा भुङ्क्ते भोगान्यथेप्सितान्।

अथवा कृतसेवस्तु लक्षमेकं जपेत्सुधीः॥ २३.२६॥

tatsamānabalo bhūtvā bhuṅkte bhogānyathepsitān|
athavā kṛtasevastu lakṣamekaṁ japetsudhīḥ||23.26||

तर्पयित्वा दशांशेन क्षुद्रकर्मसु योजयेत्।

तत्रोच्चारितमात्रेयं विषक्षयकरीं भवेत्॥ २३.२७॥

tarpayitvā daśāṁśena kṣudrakarmasu yojayet|
tatroccāritamātreyaṁ viṣakṣayakarīṁ bhavet||23.27||

चक्रवद्भ्रममाणैषा योनौ रक्तां विचिन्तयेत्।

गमागमक्रमाद्वापि विन्द ... ... ... वारिता॥ २३.२८॥

cakravadbhramamāṇaiṣā yonau raktāṁ vicintayet|
gamāgamakramādvāpi vinda ... ... ... vāritā||23.28||

तत्रस्थश्चाशु सङ्घातविघाताकुञ्चनेन तु।

क्षणादनन्यचित्तस्तु क्षोभयेदुर्वशीमपि॥ २३.२९॥

tatrasthaścāśu saṅghātavighātākuñcanena tu|
kṣaṇādananyacittastu kṣobhayedurvaśīmapi||23.29||

कृतसेवाविधिर्वाथ लक्षत्रयजपेन तु।

महतीं श्रियमाधत्ते पद्मश्रीफलतर्पिता॥ २३.३०॥

kṛtasevāvidhirvātha lakṣatrayajapena tu|
mahatīṁ śriyamādhatte padmaśrīphalatarpitā||23.30||

षडुत्थासनसंस्थाना साधिताप्युक्तवर्त्मना।

सर्वसिद्धिकरी देवी मन्त्रिणामुपजायते॥२३.३१॥

ṣaḍutthāsanasaṁsthānā sādhitāpyuktavartmanā|
sarvasiddhikarī devī mantriṇāmupajāyate||23.31||

शूलपद्मविधिं मुक्त्वा नवात्माद्यं च सप्तकम्।

षडुत्थमासनं दद्यात्सर्वचक्रविधौ बुधः॥३२॥

śūlapadmavidhiṁ muktvā navātmādyaṁ ca saptakam|
ṣaḍutthamāsanaṁ dadyātsarvacakravidhau budhaḥ||23.32||

मुद्रा च महती योज्या हृद्बीजेनोपचारकम्।

अथान्यत्सम्प्रवक्ष्यामि स्वप्नज्ञानमनुत्तमम्॥२३.३३॥

mudrā ca mahatī yojyā hṛdbījenopacārakam|
athānyatsampravakṣyāmi svapnajñānamanuttamam||23.33||

हृच्चक्रे तन्मयो भूत्वा रात्रौ रात्रावनन्यधीः।

मासादूर्ध्वं महादेवि स्वप्ने यत्किञ्चिदीक्षते॥२३.३४॥

hṛccakre tanmayo bhūtvā rātrau rātrāvananyadhīḥ|
māsādūrdhvaṁ mahādevi svapne yatkiñcidīkṣate||23.34||

तत्तथ्यं जायते तस्य ध्यानयुक्तस्य योगिनः।

तत्रैव यदि कालस्य नियमेन रतो भवेत्॥२३.३५॥

tattathyaṁ jāyate tasya dhyānayuktasya yoginaḥ|
tatraiva yadi kālasya niyamena rato bhavet||23.35||

तदा प्रथमयामे तु वत्सरेण शुभाशुभम्।

षट्त्रिमासेन क्रमशो द्वितीयादिष्वनुक्रमात्॥२३.३६॥

tadā prathamayāme tu vatsareṇa śubhāśubham|
ṣaṭtrimāsena kramaśo dvitīyādiṣvanukramāt||23.36||

अरुणोदयवेलायां दशाहेन फलं लभेत्।

सङ्कल्पपूर्वकेऽप्येवं परेषामात्मनोऽपि वा॥२३.३७॥

aruṇodayavelāyāṁ daśāhena phalaṁ labhet|

saṅkalpapūrvake'pyevaṁ pareṣāmātmano'pi vā||23.37||

क्वचित्कार्ये समुत्पन्ने सुप्तज्ञानमुपाक्रमेत्।

इत्येतत्कथितं देवि सिद्धयोगीश्वरीमतम्॥२३.३८॥

kvacitkārye samutpanne suptajñānamupākramet|
ityetatkathitaṁ devi siddhayogīśvarīmatam||23.38||

नातः परतरं ज्ञानं शिवाद्यवनिगोचरे।

य एवं तत्त्वतो वेद स शिवो नात्र संशयः॥२३.३९॥

nātaḥ parataraṁ jñānaṁ śivādyavanigocare|
ya evaṁ tattvato veda sa śivo nātra saṁśayaḥ||23.39||

तस्य पादरजः मूर्ध्नि घृतं पापप्रशान्तये।

एतच्छ्रुत्वा महादेवी परं सन्तोषमागता॥२३.४०॥

tasya pādarajaḥ mūrdhni ghṛtaṁ pāpapraśāntaye|
etacchrutvā mahādevī paraṁ santoṣamāgatā||23.40||

एवं क्षमापयामास प्रणिपत्य पुनः पुनः।

इति वः सर्वमाख्यातं मालिनीविजयोत्तरम्॥२३.४१॥

evaṁ kṣamāpayāmāsa praṇipatya punaḥ punaḥ|
iti vaḥ sarvamākhyātaṁ mālinīvijayottaram||23.41||

ममैतत्कथितं देव्या योगामृतमनुत्तमम्।

भवद्भिरपि नाख्येयमशिष्याणामिदं महत्॥२३.४२॥

mamaitatkathitaṁ devyā yogāmṛtamanuttamam|
bhavadbhirapi nākhyeyamaśiṣyāṇāmidaṁ mahat||23.42||

न चापि परशिष्याणामपरीक्ष्य प्रयत्नतः।

सर्वथैतत्समाख्यातं योगाभ्यासरतात्मनाम्॥२३.४३॥

na cāpi paraśiṣyāṇāmaparīkṣya prayatnataḥ|
sarvathaitatsamākhyātaṁ yogābhyāsaratātmanām||23.43||

प्रयतानां विनीतानां शिवैकार्पितचेतसाम्।

कार्त्तिकेयात्समासाद्य ज्ञानामृतमिदं महत्॥२३.४४॥

prayatānāṁ vinītānāṁ śivaikārpitacētasām|
kārttikēyātsamāsādya jñānāmr̥tamidaṁ mahat||23.44||

मुनयो योगमभ्यस्य परां सिद्धिमुपागताः।

इति श्रीमालिनीविजयोत्तरे तन्त्रे त्रयोविंशतितमोऽधिकारः॥२३॥

munayō yōgamabhyasya parāṁ siddhimupāgatāḥ|
iti śrīmālinīvijayōttarē tantrē trayōvinśatitamō:'dhikāraḥ||23||

समाप्तं चेदं मालिनीविजयोत्तरं नाम महातन्त्रम्॥

samāptaṁ cēdaṁ mālinīvijayōttaraṁ nāma mahātantram||